कुटिला कोमलस्पर्शा विषवैषम्यशंसिनी ।
दशत्यपि मनाक्स्पृष्टा तृष्णा कृष्णेव भोगिनी ॥१५॥(१।१७।१७)
पदं करोत्यलङ्घ्येऽपि तृप्तापि फलमीहते ।
चिरं तिष्ठति नैकत्र तृष्णा चपलमर्कटी ॥१६॥ (१।१७।२९)
सर्वसंसारदोषाणां तृष्णैका दीर्घदुःखदा ।
अन्तःपुरस्थमपि या योजयत्यतिसङ्कटे ॥१७॥ (१।१७।३२)

[ए] देहस्यारम्यत्वम् :—

समस्तरोगायतनं वलीपलितपत्तनम् ।
सर्वाधिसारगहनं नेष्टं देहगृहं मम ॥ १८ ॥ (१।१८।३४)
रक्तमांसमयस्यास्य सबाह्याभ्यन्तरं मुने ।
नाशैकधर्मिणो ब्रूहि कैव कायस्य रम्यता ॥१९॥ (१।१८।३८)

बद्धास्था ये शरीरेषु बद्धास्था ये जगत्स्थितौ ।
तान्मोहमदिरोन्मत्तान्धिग्धिगस्तु पुनःपुनः ॥२०॥ (१।१८।५२)

[ऐ] बाल्यावस्थादोषाः :—

अशक्तिरापदस्तृष्णा मूकता मूढबुद्धिता ।
गृध्नुता लोलता दैन्यं सर्वं बाल्ये प्रवर्तते ॥२१॥ (१।१९।२)

[ओ] यौवनदोषाः :—

निमेषभासुराकारमालोलघनगर्जितम् ।
विद्युत्प्रकाशमशिवं यौवनं मे न रोचते ॥२२॥ (१।२०।८)
आपातमात्ररमणं सद्भावरहितान्तरम् ।
वेश्यास्त्रीसङ्गमप्रख्यं यौवनं मे न रोचते ॥२३॥ (१।२०।१३)
सुनिर्मलापि विस्तीर्णा पावन्यपि हि यौवने ।
मतिः कलुषतामेति प्रावृषीव तरङ्गिणी ॥२४॥ (१।२०।१८)

[औ] स्त्रीजुगुप्सा :—

मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाःकिमिव शोभनम्।२५।(१।२१।१)
त्वङ्मांसरक्तबाष्पाम्बु पृथक्कृत्वा विलोचनम् ।
समालोकय रम्यं चेत्किं मुधा परिमुह्यसि ॥२६॥ (१।२१।२)

आपातरमणीयत्वं कल्पते केवलं स्त्रियाः ।
मन्ये तदपि नास्त्यत्र मुने मोहैककारणम् ॥२७॥ (१।२१।८)
ज्वलतामतिदूरेऽपि सरसा अपि नीरसाः ।
स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् ॥२८॥ (१।२१।१२)
पुष्पकेसरगौराङ्गी नरमारणतत्परा ।
ददात्युन्मत्तवैवश्यं कान्ता विषलता यथा ॥२९॥ (१।२१।१६)
मन्दुरं च तुरङ्गाणामालानमिव दन्तिनाम् ।
पुंसां मंत्र इवाहीनां बन्धनं वामलोचना ॥३०॥ (१।२१।२१)

[अं] भोगवैरस्यम् :—

आपातमात्ररमणेषु सुदुस्तरेषु
भोगेषु नाहमलिपक्षतिचञ्चलेषु ।
ब्रह्मन्रमे मरणरोगजरादिभीत्या
शाम्याम्यहं परमुपैमि पदं प्रयत्नात् ॥३१॥ (१।२१।३६)

[अः] जराजुगुप्सा :—

जरामार्जारिका भुंक्ते यौवनाखुं तथोद्धता ।
परमुल्लासमायाति शरीरामिषगर्धिनी ॥३२॥ (१।२२।२५)
न जिताः शत्रुभिः संख्ये प्रविष्टा येऽद्रिकोटरे ।
ते जराजीर्णराक्षस्या पश्याशु विजिता मुने ॥३३॥ (१।२२।३१)
हिमाशनिरिवाम्भोजं वात्येव शरदम्बुकम् ।
देहं जरा नाशयति भंजन्दी तीरतरुं यथा ॥३४॥ (१।२२।२)

किं तेन दुर्जीवितदुर्ग्रहेण
जरागतेनापि हि जीव्यते यत् ।
जराजगत्यामजिता जनानां
सर्वैषणास्तात तिरस्करोति ॥ ३५ ॥ (१।२२।३८)

[क] कालसाम्राज्यम् :—

न तदस्तीह यद्यं कालः सकलघस्मरः ।
ग्रसते तज्जगज्जातं प्रोत्थाब्धिमिव वाडवः ॥३६॥ (१।२३।४)
किं श्रिया किं च राज्येन किं कायेन किमीहितैः ।
दिनैः कतिपयैरेव कालः सर्वं निकृन्तति ॥३७॥ (१।१८।३७)
ग्रसतेऽविरतं भूतजालं सर्प इवानिलम् ।
कृतान्तः कर्कशाचारो जरां नीत्वाऽजरं वपुः ॥३८॥ (१।२६।६)

[ख] संसारदुर्दशा :—

आयुरत्यन्तचपलं मृत्युरेकान्तनिष्ठुरः ।
तारुण्यं चातितरलं बाल्यं जडतया हृतम् ॥३९॥ (१।२६।९)
कलाकलङ्कितो लोको बन्धवो भवबन्धनम् ।
भोगा भवमहारोगास्तृष्णाश्च मृगतृष्णिकाः ॥४०॥(१।२६।१०)
शत्रवश्चेन्द्रियाण्येव सत्यं यातमसत्यताम् ।
प्रहरत्यात्मनैवात्मा मनसैव मनो रिपुः ॥४१॥ (१।२६।११)
वस्त्ववस्तुतया ज्ञातं दत्तं चित्तमहंकृतौ ।
अभाववेधिता भावा भावान्तो नाधिगम्यते ॥४२॥(१।२६।१४)

आगमापायिनो भावा भावना भवबन्धनी ।
नीयते केवलं क्वापि नित्यं भूतपरम्परा ॥४३॥ (१।२६।२२)
सर्वे एव नरा मोहाद्दुराशापाशपाशिनः ।
दोषगुल्मकसारङ्गा विशीर्णा जन्मजङ्गले ॥४४॥ (१।२६।४१)

बाल्ये गते कल्पितकेलिलोले
मनोमृगे दारदरीषु जीर्णे ।
शरीरके जर्जरतां प्रयाते
विदूयते केवलमेव लोकः ॥ ४५ ॥ (१।२७।२)

जरातुषाराभिहतां शरीर-
सरोजिनीं दूरतरे विमुच्य ।
क्षणाद्गते जीवितचञ्चरीके
जनस्य संसारसरोऽवशुष्कम् ॥ ४६ ॥ (१।२७।३)

तृष्णानदी सारतरप्रवाह-
ग्रस्ताखिलानन्तपदार्थजाता ।
तटस्थसंतोषसुवृक्षमूल-
निकाषदक्षा वहतीह लोके ॥ ४७ ॥ (१।२७।५)

तृष्णालताकाननचारिणोऽमी
शाखाशतं काममहीरुहेषु ।
परिभ्रमन्तः क्षपयन्ति कालं
मनोमृगा नो फलमाप्नुवन्ति ॥ ४८ ॥ (१।२७।७)

पुत्राश्च दाराश्च धनं च बुद्ध्या
प्रकल्प्यते तात रसायनाभम् ।
सर्वं तु तन्नोपकरोत्यथान्ते
यत्रातिरम्या विषमूर्च्छनैव ॥ ४९ ॥ (१।२७।१३)

पर्णानि जीर्णानि यथा तरूणां
समेत्य जन्माशु लयं प्रयान्ति ।
तथैव लोकाः स्वविवेकहीनाः
समेत्य गच्छन्ति कुतोप्यहोभिः ॥ ५० ॥ (१।२७।१८)

[ग] सर्वत्रदोषदृष्टिः :—

कास्ता दृशो यासु न सन्ति दोषाः
कास्ता दिशो यासु न दुःखदाहः ।
कास्ताः प्रजा यासु न भङ्गुरत्वं
कास्ताः क्रिया यासु न नाम माया ॥५१॥ (१।२७।३१)

[घ] अस्थिरता :—

यच्चेदं दृश्यते किञ्चिज्जगत्स्थावरजंगमम् ।
तत्सर्वमस्थिरं ब्रह्मन्स्वप्नसङ्गमसन्निभम् ॥ ५२ ॥ (१।२८।१)
अनित्यं यौवनं बाल्यं शरीरं द्रव्यसञ्चयाः ।
भावाद्भावान्तरं यान्ति तरङ्गवदनारतम् ॥५३॥ (१।२८।१०)
वातान्तर्दीपकशिखालोलं जगति जीवितम् ।
तडित्स्फुरणसंकाशा पदार्थश्रीर्जगत्त्रये ॥५४॥ (१।२८।११)

प्रागासोदन्य एवेह जातस्त्वन्यो नरो दिनैः ।
सदैकरूपं भगवन्किञ्चिदस्ति न सुस्थिरम् ॥५५॥ (१।२८।३२)
बाल्यमल्पदिनैरेव यौवनश्रीस्ततो जरा ।
देहेऽपि नैकरूपत्वं कास्था बाह्येषु वस्तुषु ॥५६॥ (१।२८।३७)
क्षणमानन्दितामेति क्षणमेति विषादिताम् ।
क्षणं सौम्यत्वमायाति सर्वस्मिन्नटवन्मनः ॥५७॥ (१।२८।३८)
इतश्चान्यदितश्चान्यदितश्चान्यदयं विधिः ।
रचयन्वस्तुनायाति खेदं लीलास्विवार्भकः ॥५८॥ (१।२८।३८)

[ङ] संसारदुःखासहनीयत्वम् :—

क्रकचाग्रविनिष्पेषं सोढुं शक्नोम्यहं मुने ।
संसारव्यवहारोत्थं नाशाविषयवैशसम् ॥५९॥ (१।२९।१७)

(३) राघवप्रश्नाः :—

अतोऽतुच्छमनायासमनुपाधि गतभ्रमम् ।
किं तत्स्थितिपदं साधो यत्र शोको न विद्यते ॥१॥ (१।३०।११)
किं तत्स्यादुचितं श्रेयः किं तस्यादुचितं फलम् ।
वर्तितव्यं च संसारे कथं नामासमञ्जसे ॥२॥ (१।३०।२०)
केन पावनमन्त्रेण दुःसंसृतिविषूचिका ।
शाम्यतीयमनायासमायासशतकारिणी ॥३॥ (१।३०।२४)
कथं शीतलतामन्तरानन्दतरुमञ्जरीम् ।
पूर्णचन्द्र इवाक्षीणां भृशमासादयाम्यहम् ॥४॥ (१।३०।२५)

क उपायो गतिः का वा का चिन्ता कः समाश्रयः ।
केनेयमशुभोदर्का न भवेज्जीविताटवी ॥५॥ (१।३१।६)।
संसार एव निवहे जनो व्यवहरन्नपि ।
न बन्धं कथमाप्नोति पद्मपत्रे पयो यथा ॥६॥ (१।३०।१७)
कथं सुस्वादुतामेति नीरसो मूढतां विना ।
अयं हि दग्धसंसारो नीरन्ध्रकलनाकुलः ॥७॥ (१।३१।८)
दृष्टसंसारगतिना दृष्टादृष्टविनाशिना ।
केनेव व्यवहर्तव्यं संसारवनवीथिषु ॥८॥ (१।३१।११)
रागद्वेषमहारोगा भोगपूगा विभूतयः ।
कथं जन्तुं न बाधन्ते संसारार्णवचारिणाम् ॥९॥ (१।३१।१२)
व्यवहारवतो युक्त्या दुःखं नायाति मे यथा ।
अथवा व्यवहारस्य ब्रूत ताम्युक्तिमुत्तमाम् ॥१०॥ (१।३१।१७)

(४) जिज्ञासातीव्रत्वम् :—

अथवा तादृशी युक्तिर्यदि ब्रह्मन्न विद्यते ।
न वक्ति मम वा कश्चिद्विद्यमानामपि स्फुटम् ॥१॥ (१।३१।२०)
स्वयं चैव न चाप्नोमि तां विश्रान्तिमनुत्तमाम् ।
तदहं त्यक्तसर्वेहो निरहंकारतां गतः ॥२॥ (१।३१।२१)
न भोक्ष्ये न पिबाम्यम्बु नाहं परिदधेऽम्बरम् ।
करोमि नाहं व्यापारं स्नानदानाशनादिकम् ॥३॥ (१।३१।२२)
न च तिष्ठामि कार्येषु सम्पत्स्वापद्दशासु च ।
न किञ्चिदपि वाञ्छामि देहत्यागादृते मुने ॥४॥ (१।३१।२३)

नाहमस्य न मे नान्यः शाम्याम्यस्नेहदीपवत् ।
सर्वमेव परित्यज्य त्यजामीदं कलेवरम् ॥५॥ (१।३१।२६)

३—दुःखनिवृत्त्युपायः ।

(१) संसारराग एव दुःखस्य कारणम् :—

वसिष्ठ उवाच—

विषमो ह्यतितरां संसाररागो भोगीव दशति, असिरिव च्छिनत्ति, कुन्त इव वेधयति, रज्जुरिवावेष्टयति, पावक इव दहति, रात्रिरिवान्धयति, अशंकितपरिपतितपुरुषान्पाषाण इव विवशीकरोति, हरति प्रज्ञां, नाशयति स्थितिं, पातयति मोहान्धकूपे, तृष्णा जर्जरीकरोति, न तदस्ति किञ्चिद्दुःखं संसारी यन्न प्राप्नोति ॥ १ ॥ (२।१२।१४)

दुरन्तेयं किल विषयविषूचिका यदि न चिकित्स्यते तन्नितरां नरकनगरनिकरफलानुबन्धिनी तत्तत्करोति ॥२॥(२।१२।१५)
दुःसहा राम संसारविषावेशविषूचिका ॥ ३ ॥ (२।१२।१०)
सर्वापदां शिरसि तिष्ठति मौर्ख्यमेकम् ॥ ४ ॥ (६/१।८८।२७)
इयं संसारसरणिर्वहत्यज्ञप्रमादतः ।
अज्ञस्योग्राणि दुःखानि सुखान्यपि दृढानि च ॥५॥ (६/१।६।३३)
इदं दुर्दुःखमज्ञस्य न कदाचन शाम्यति ।
अनात्मनि शठे देहे आत्मभावमुपेयुषि ॥ ६ ॥ (६/१।६।३५)

अवस्तुनि सनेत्रस्य लुठतश्च पदे पदे ।
विषमुत्पद्यते चन्द्रादामोदः कुसुमादिव ॥ ७ ॥ (६।६।३७)

(२) ज्ञानमेव दुःखनिवृत्त्युपाय :—

संसारविषवृक्षोऽयमेकमास्पदमापदाम् ।
अज्ञं संमोहयेन्नित्यं मौर्ख्यं यत्नेन नाशयेत् ॥ १ ॥ (२।११।६६)
प्राज्ञं विज्ञातविज्ञेयं सम्यग्दर्शनमाधयः ।
न दहन्ति वनं वर्षासिक्तमग्निशिखा इव ॥ २ ॥ (२।११।४१)
ज्ञानयुक्तिप्लवेनैव संसाराब्धिं सुदुस्तरम् ।
महाधियः समुत्तीर्णा निमेषेण रघूद्वह ॥ ३ ॥ (२।११।३६)
शीतवातातपादीनि द्वन्द्वदुःखानि राघव ।
ज्ञानयुक्तिं विना केन सह्यतां यांति साधुषु ॥ ४ ॥ (२।११।३६)
निर्वाणं नाम परमं सुखं येन पुनर्जनः ।
न जायते न म्रियते तज्ज्ञानादेव लभ्यते ॥ ५ ॥ (२।१०।२१)
संसारोत्तरणे जन्तोरुपायो ज्ञानमेव हि ।
तपो दानं तथा तीर्थमनुपायाः प्रकीर्तिताः ॥ ६ ॥ (२।१०।२२)
विचारेण परिज्ञातवस्तुनोऽस्य जनस्य धीः ।
सर्वानधः करोत्याधीन्सौम्याम्भ इव वालुकाः ॥७॥ (५।५।१६)

अवश्यमेव हि विचारे कृते सकलदुःखपरिक्षयो भवतीति मन्तव्यम् ॥ ८ ॥ (२।१२।१२)

विचारवता पुरुषेण सकलमिदमाधिपञ्जरं सर्पेण त्वचमिव

परिपक्वां संत्यज्य विगतज्वरेण शीतलान्तःकरणेन विनोदादिन्द्रजालमिव जगदखिलमालोक्यते ॥ ६ ॥ (२।१२।१३)

(४) आत्मज्ञानमेव विश्रान्तिसाधनम् :—

आत्मज्ञानं विदुर्ज्ञानं ज्ञानान्यन्यानि यानि तु ।
तानि ज्ञानावभासनानि सारस्याऽनवबोधनात्॥ १ ॥ (६।२१।७)
करोतु भुवने राज्यं विशत्वम्भोदमम्बु वा ।
नात्मलाभादृते जन्तुर्विश्रान्तिमधिगच्छति ॥ २ ॥ (४।५७।३४)
आत्मावलोकने यत्नः कर्तव्यो भूतिमिच्छता ।
सर्वदुःखशिरश्छेद आत्मावलोकेन जायते ॥३॥ (५।७५।४६)
ज्ञायते परमात्मा चेद्राम दुःखस्य संततिः ।
क्षयमेति विषावेशशान्ताविव विषूचिका ॥ ४ ॥ (३।७।१७)
हे जना अपरिज्ञात आत्मा वो दुःखसिद्धये ।
परिज्ञातस्त्वनन्ताय सुखायोपशमाय च ॥ ५ ॥ (५।५।२३)

४—तत्त्वज्ञानावतरणम् ।

इदमुक्तं पुराकल्पे ब्रह्मणा परमेष्ठिना ।
सर्वदुःखक्षयकरं परमाश्वासनं धियः ॥ १ ॥ (२।१०।९)
गच्छेदानीं महीपृष्ठे जम्बूद्वीपान्तरस्थितम् ।
साधो भरतवर्षं त्वं लोकानुग्रहहेतुना ॥ २ ॥ (२।१०।४०)
तत्र क्रियाकाण्डपरास्त्वया पुत्र महाधिया ।
उपदेश्याः क्रियाकाण्डक्रमेण क्रमशालिना ॥ ३ ॥ (२।१०।४१)

विरक्तचित्ताश्च तथा महाप्राज्ञा विचारिणः ।
उपदेश्यास्त्वया साधो ज्ञानेनानन्ददायिना ॥ ४ ॥ (३।१०। २)
इति तेन नियुक्तोऽहं पित्रा कमलयोनिना ।
इह राघव तिष्ठामि यावद्भूतपरम्परा ॥ ५ ॥ (२।१०।४३)
पूर्वमुक्तं भगवता यज्ज्ञानं पद्मजन्मना ।
सर्गादौ लोकशान्त्यर्थं तदिदं कथयाम्यहम्॥ ६ ॥ (२।३।१)

५—पौरुषमहिमा ।

[१] पौरुषेण सर्वमासाद्यते :—

अत्रैकं पौरुषं यत्नं वर्जयित्वेतरा गतिः ।
सर्वदुःखक्षयप्राप्तौ न काचिदुपपद्यते ॥ १ ॥ (३।६।१४)
इह होन्दोरिवोदेति शीतलाह्लादनं हृदि ।
परिस्पन्दफलप्राप्तौ पौरुषादेव नान्यतः ॥ २ ॥ (२।४।६)
न तदस्ति जगत्कोशे शुभकर्मानुपातिना ।
यत्पौरुषेण शुद्धेन न समासाद्यते जनैः ॥ ३ ॥ (३।६२।८)
न किञ्चन महाबुद्धे तदस्तीह जगत्त्रये ।
यदनुद्वेगिना नाम पौरुषेण न लभ्यते ॥४॥ (६।१५७।२८)
सर्वमेवेह हि सदा संसारे रघुनन्दन ।
सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते ॥ ५ ॥ (२।४।८)
यो यमर्थं प्रार्थयते तदर्थं चेहते क्रमात् ।
अवश्यं स तमाप्नोति न चेदर्धान्निवर्तते ॥ ६ ॥ (२।४।१२)

पुरुषार्थेन देवानां गुरुरेव बृहस्पतिः ।
शुक्रो दैत्येन्द्रगुरुतां पुरुषार्थेन चास्थितः ॥ ७ ॥ (२।७।७)
पौरुषेण जिता दैत्याः स्थापिता भुवनक्रियाः ।
रचितानि जगन्तीह विष्णुना न च दैवतः ॥८॥ (२।७।३१)
दैन्यदारिद्र्यदुःखार्ता अप्यन्ये पुरुषोत्तमाः ।
पौरुषेणैव यत्नेन याता देवेन्द्रतुल्यताम् ॥ ९ ॥ (२।५।२७)
पौरुषेण दुरन्तेभ्यः संकटेभ्यः सुबुद्धयः ।
समुत्तरन्त्ययत्नेन न तु मोघतयाऽनया ॥१०॥ (२।७।१८)
यो यो यथा प्रयतते स स तत्तत्फलैकभाक् ।
न तु तूष्णीं स्थितेनेह केनचित्प्राप्यते फलम् ॥११॥ (२।७।१९)
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मात्मना न चेत्त्रातस्तदुपायोऽस्ति नेतरः ॥१२॥(६/१।१६२।१८
पुरुषातिशयः सर्वः सर्वभावोपमर्दने ।
ददात्यविघ्नेन फलं मनो हि मनसो मुने ॥१३॥ (३।९२।१९)
मनसैव मनस्तस्मात्पौरुषेण पुमानिह ।
स्वकमेव स्वकेनैव योजयेत्पावने पथि ॥१४॥ (३।९२।२८)

[२] परायत्तवानिन्दा :—

ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा ।
स सदैव पराधीनः पशुरेव न संशयः ॥ १५ ॥ (२।६।२७)
कश्चिन्मां प्रेरयत्येवमित्यनर्थकुकल्पने ।
यः स्थितो दृष्टमुत्सृज्य त्याज्योऽसौ दूरतोऽधमः॥१६॥ (२।६।२९)

ये शूरा ये च विक्रान्ता ये प्राज्ञा ये च पण्डिताः ।
तैस्तैः किमिव लोकेऽस्मिन्वद दैवं प्रतीक्ष्यते ॥१७॥ (२।८।१७)
ये समुद्योगमुत्सृज्य स्थिता दैवपरायणाः ।
ते धर्ममर्थं कामञ्च नाशयन्त्यात्मविद्विषः ॥ १८ ॥ (२।७।३)
इति प्रत्यक्षतो दृष्टमनुभूतं श्रुतं कृतम् ।
दैवायत्तमिति मन्यन्ते ये हतास्ते कुबुद्धयः ॥१९॥ (२।५।२९)

[३] दैवनिराकरणम् :—

दैवं नाम न किञ्चन ॥ २० ॥ (२।५।१८)
दैवं न विद्यते ॥ २१ ॥ (२।८।१३)
दैवमसत्सदा ॥ २२ ॥ (२।८।११)
दैवं न किञ्चित्कुरुते केवलं कल्पनेदृशी ॥ २३ ॥ (२।९।३)
न च निस्पन्दता लोके दृष्टेह शवतां विना ।
स्पन्दाच्च फलसंप्राप्तिस्तस्माद्दैवं निरर्थकम् ॥ २४ ॥ (२।८।८)
मूढैः प्रकल्पितं दैवं तत्परास्ते क्षयं गताः ।
प्राज्ञास्तु पौरुषार्थेन पदमुत्तमतां गताः ॥ २५ ॥ (२।८।१६)
दैवमाश्वासनमात्रं दुःखे पेलवबुद्धिषु । (२।७।१५)
समाश्वासनवागेषा न दैवं परमार्थतः ॥ २६ ॥ (२।८।१५)

[४] दैवशब्दार्थः :—

सिद्धस्य पौरुषेणेह फलस्य फलशालिना ।
शुभाशुभार्थसम्पत्तिर्दैवशब्देन कथ्यते ॥ २७ ॥ (२।९।४)

पौरुषोपनता नित्यमिष्टानिष्टस्य वस्तुनः ।
प्राप्तिरिष्टाप्यनिष्टा वा दैवशब्देन कथ्यते ॥ २८ ॥ (१।६।५)
भावी त्ववश्यमेवार्थः पुरुषार्थैकसाधनः ।
यः सोऽस्मिँल्लोकसंघाते दैवशब्देन कथ्यते ॥ २९ ॥ (२।९६)
पुरुषार्थफलप्राप्तिर्देशकालवशादिह ।
प्राप्ता चिरेण शीघ्रं वा याऽसौ दैवमिति स्मृता॥३०॥ (२।७।२१)
पुरुषार्थस्य सिद्धस्य शुभाशुभफलोदये ।
इदमित्थं स्थितमिति योक्तिस्तद्दैवमुच्यते ॥ ३१ ॥ (२।९।८)
यदेव तीव्रसंवेगाद्दृढं कर्मकृतं पुरा ।
तदेव दैवशब्देन पर्यायेणेह कथ्यते ॥ ३२ ॥ (२।९।१६)
स्वकर्मफलसम्प्राप्ताविदमित्थमितीति याः ।
गिरस्ता दैवनाम्नैताः प्रसिद्धिं समुपागताः ॥ ३३ ॥ (२।८।२)
तत्रैव मूढमतिभिर्दैवमस्तीति निश्चयः ।
आत्तो दुरवबोधेन रज्ज्वामिव भुजङ्गमः ॥ ३४ ॥ (२।८।३)
प्राक्स्वकर्मेतराकारं दैवं नाम न विद्यते । (२।६।४)
प्राक्तनं पौरुषं तद्वै दैवशब्देन कथ्यते ॥ ३५ ॥ (२।६।३५)
यथा यथा प्रयत्नः स्याद्भवेदाशु फलं तथा ।
इति पौरुषमेवास्ति दैवमस्तु तदेव च ॥३६॥ (२।६।२)

[५] पौरुषप्राबल्यम् :—

बालः प्रबलपुंसेव तज्जेतुमिह शक्यते ॥ ३७ ॥ (२।६।४)

द्वौ हुडाविव युध्येते पुरुषार्थौ परस्परम् ।
य एव बलवाँस्तत्र स एव जयति क्षणात् ॥३८॥ (२।६।१०)
ह्यस्तनी दुष्क्रियाभ्येति शोभां सत्क्रियया यथा ।
अद्यैव प्राक्तनीं तस्माद्यत्नात्सत्कार्यवान्भव ॥३९॥(६।१५७।२९)
ऐहिकः प्राक्तनं हन्ति प्राक्तनोऽद्यतनं बलात् ।
सर्वदा पुरुषस्पन्दस्तत्रानुद्वेगवाञ्जयी ॥ ४० ॥ (२।६।१८)
द्वयोरद्यतनस्यैव प्रत्यक्षाद्बलिता भवेत् ।
दैवं जेतुं यतो यत्नैर्बालो यूनेव शक्यते ॥ ४१ ॥ (२।६।१९)
परं पौरुषमाश्रित्य दन्तैर्दन्तान्विचूर्णयन् ।
शुभेनाऽशुभमुद्युक्तं प्राक्तनं पौरुषं जयेत् ॥ ४२ ॥ (२।५।९)
प्राक्तनः पुरुषार्थोऽसौ मां नियोजयतीति धीः ।
बलादधस्पदीकार्या प्रत्यक्षादधिका न सा ॥४३॥ (२।५।१०)
तावत्तावत्प्रयत्नेन यतितव्यं सुपौरुषम् ।
प्राक्तनं पौरुषं यावदशुभं शाम्यति स्वयम् ॥४४॥ (२।५।११)
दोषः शाम्यत्यसंदेहं प्राक्तनोऽद्यतनैर्गुणैः ।
दृष्टान्तोऽत्र ह्यस्तनस्य दोषस्याद्यगुणैः क्षयः ॥४५॥ (२।५।१२)

[६] सत्पौरुषम् :—

उच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषं स्मृतम् ।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ॥४६॥ (२।५।४)
तस्मात्पौरुषमाश्रित्य सच्छास्त्रैः सत्समागमैः ।
प्रज्ञाममलतां नीत्वा संसारजलधिं तरेत् ॥४७॥ (२।६।२४)

[७] आलस्यनिन्दा :—

आलस्यं यदि न भवेज्जगत्यनर्थः
को न स्याद्बहुधनको बहुश्रुतो वा ।
आलस्यादियमवनिः ससागरान्ता
सम्पूर्णा नरपशुभिश्च निर्धनैश्च ॥४८॥ (२।५।३०)

६—मुमुक्षुगुणाः ।

मनस्युपशमं याते त्यक्तभोगैषणे स्थिते ।
कषायपाके निर्वृत्ते सर्वेन्द्रियगणस्य च ॥१॥ (६।१०१।१०)
यान्ति चेतसि विश्रान्ति विमला देशिकोक्तयः ।
यथा सितांशुके शुद्धे बिन्दवः कुङ्कुमाम्भसः ॥२॥(६।१०१।११)
वासनात्मसु यातेषु मलेषु विमलं सखे ।
यद्वक्ति गुरुरन्तस्तद्विशतीषुर्यथा बिसे ॥ ३ ॥ (६।१०१।१४)
सन्तोषः साधुसङ्गश्च विचारोऽथ शमस्तथा ।
एत एव भवाम्भोधावुपायास्तरणे नृणाम् ॥४॥(२।१६।१८)
एकोऽप्येकोऽपि सर्वेषामेषां प्रसवभूरिह ।
सर्वसंसिद्धये तस्माद्यत्नेनैकं समाश्रयेत् ॥५॥ (२।१६।२२)

[१] शमः :—

शमशालिनि सौहार्दवति सर्वेषु जन्तुषु ।
सुजने परमं तत्त्वं स्वयमेव प्रसीदति ॥१॥ (२।१३।६०)
शमेनासाद्यते श्रेयः शमो हि परमं पदम् ।

शमः शिवः शमः शान्तिः शमो भ्रान्तिनिवारणम् ॥२॥(२।१३।५२)

यः समः सर्वभूतेषु भावि काङ्क्षति नोज्झति ।
जित्वेन्द्रियाणि यत्नेन स शान्त इति कथ्यते ॥३॥(२।१३।७३)

तुषारकरबिम्बाभं मनो यस्य निराकुलम् ।
मरणोत्सवयुद्धेषु स शान्त इति कथ्यते ॥४॥ (२।१३।७५)

अमृतस्यन्दसुभगा यस्य सर्वजनं प्रति ।
दृष्टिः प्रसरति प्रीता स शान्त इति कथ्यते॥५॥ (२।१३।७७)

अप्यापत्सु दुरन्तासु कल्पान्तेषु महत्स्वपि ।
तुच्छेहं न मनो यस्य स शान्त इति कथ्यते॥६॥ (२।१३।७६)

परित्यक्तसमस्तेहं मनो मधुरवृत्तिमत् ।
सर्वतः सुखमभ्येति चन्द्रबिम्ब इव स्थितम् ॥७॥ (२।१३।६)

त्रैलोक्योदरवर्तिन्यो नानन्दाय तथा श्रियः ।
साम्राज्यसंपत्प्रतिमा यथा शमविभूतयः ॥८॥ (२।१३।५७)

न पिशाचा न रक्षांसि न दैत्या न च शत्रवः ।
न च व्याघ्रभुजङ्गा वा द्विषन्ति शमशालिनम् ॥९॥ (२।१३।६६)

[२] संतोषः :—

आशावैवश्यविवशे चित्ते संतोषवर्जिते ।
म्लाने वक्रमिवादर्शे न ज्ञानं प्रतिबिम्बति ॥१॥ (२।१५।९)

संतोषपुष्टमनसं भृत्या इव महर्द्धयः ।
राजानमुपतिष्ठन्ति किंकरत्वमुपागताः ॥२॥ (२।१५।१६)

अप्राप्तवाञ्छामुत्सृज्य संप्राप्ते समतां गतः ।

अदृष्टखेदाखेदो यः स संतुष्ट इहोच्यते ॥३॥ (२।१५।६)

[३] साधुसङ्गः :—

साधुसङ्गतयो लोके सन्मार्गस्य च दीपिकाः ।
हार्दान्धकारहारिण्यो भासो ज्ञानविवस्वतः ॥१॥ (२।१६।६)
यः स्नातः शीतसितया साधुसंगतिगङ्गया ।
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः॥२॥(२।१६।१०)
नीरागाश्छिन्नसंदेहा गलितग्रन्थयोऽनघ ।
साधवो यदि विद्यन्ते किं तपस्तीर्थसंग्रहैः ॥३॥(२।१६।११)

[४] विचारः :—

न विचारादृते तत्त्वं ज्ञायते साधु किञ्चन । (२।१४।५२)
विचाराज्जायते तत्त्वं तत्त्वाद्विश्रान्तिरात्मनि ॥१॥ (२।१४।५३)
कोऽहं कथमयं दोषः संसाराख्य उपागतः ।
न्यायेनेति परामर्शो विचार इति कथ्यते ॥२॥ (२।१४।५०)

इति प्रथमोऽध्यायः ।

अथ तत्त्वज्ञानं नाम द्वितीयोऽध्यायः ॥२॥

१—प्रामाणनिरूपणम् ।

[१] प्रत्यक्षमेवात्मज्ञाने प्रमाणम् :—

सर्वप्रमाणसत्त्वानां पदमब्धिरपामिव ।
प्रमाणमेकमेवेह प्रत्यक्षं तदतः शृणु ॥१॥ (२।१६।१६)
प्रमाणमत्र शृणु मे प्रत्यक्षं नाम नेतरत् । (३।४२।१५)
अनुभूतिं विना रूपं नात्मनश्चानुभूयते ॥२॥ (५।६४।५३)
नात्मास्त्यनुमया राम न चाप्तवचनादिना ।
सर्वदा सर्वथो सर्वं स प्रत्यक्षोऽनुभूतितः ॥३॥(५। २।१५)
न शास्त्रैर्नापि गुरुणा दृश्यते परमेश्वरः ।
दृश्यते स्वात्मनैवात्मा स्वया सत्वस्थया धिया॥४॥(६।११८।४)
तद्विदा तत्पदस्थेन तन्मुक्तेनानुभूयते ।
अन्यैः केवलमाम्नातैरागमैरेव वर्ण्यते ॥५॥ (६।५२।२६)

[२] दृष्टान्तोपयोगिता :—

येनेहाननुभूतेऽर्थे दृष्टेनार्थेन बोधनम् ।
बोधोपकारफलदं तं दृष्टान्तं विदुर्बुधाः ॥१॥ (२।१८।५०)
दृष्टान्तेन विना राम नापूर्वार्थोऽवबुध्यते ।
यथा दीपं विना रात्रौ भाण्डोपस्करणं गृहे ॥२॥ (२।१८।५१)

ब्रह्मोपदेशे दृष्टान्तो यस्तवेह हि कथ्यते ।
एकदेशसधर्मत्वं तत्रान्तः परिगृह्यते ॥३॥ (२।१८।५४)
उपमेयस्योपमानादेकांशेन सधर्मता ।
अङ्गीकार्यावबोधाय धीमता निर्विवादिना ॥४॥ (२।१८।६४)
एकदेशसमर्थत्वादुपमेयावबोधनम् ।
उपमानं करोत्यङ्ग दीपोऽर्थप्रभया यथा ॥५॥ (२।१८।६६)

२—कल्पनावादः ।

[१] दृश्यस्य बोधरूपत्वं बुद्धत्वात् :—

बोधावबुद्धं यद्वस्तु बोध एव तदुच्यते ।
नाबोधं बुध्यते बोधो वैरूप्यात्तेन नान्यता॥१॥(३।२५।१२)
द्रष्टृदर्शनदृश्येषु प्रत्येकं बोधमात्रता ।
सारस्तेन तदन्यत्वं नास्ति किञ्चित्खपुष्पवत्॥२॥(३।२५।१३)
सजातीयः सजातीयेनैकतामनुगच्छति ।
अन्योन्यानुभवस्तेन भवत्वेकत्वनिश्चयः ॥३॥ (३।२५।१४)
द्रष्टृदृश्ये न यद्येकमभविष्यच्चिदात्मके ।
तद्दृश्यास्वादमज्ञः स्यान्नाद्रष्टृवेत्तुमिवोपलः ॥४॥ (३।३८।९)
यदा चिन्मात्रमेवेयं द्रष्टृदर्शनदृश्यदृक् ।
तदानुभवनं तत्र सर्वस्य फलितं स्थितम् ॥५॥ (३।३८।८)
चिन्मयत्वाद्यदा चेत्यमेति द्रष्टृ चितैकताम् ।
तदा दृश्याङ्गयैवैतच्चेत्यते नान्यथा चिता ॥६॥ (३।३८।७)

चिन्मयत्वाच्चितौ चेत्यं जलमप्स्विव मज्जति ।
तेनानुभूतिर्भवति नान्यथा काष्ठयोरिव ॥७॥ (६।३८।१०)
सजातीयैकताभावाद्यद्वत्काष्ठं न चेतते ।
दारू तद्वदपि द्रष्टा दृश्यं नाज्ञास्यदाजडम् ॥८॥ (६।३८।११)
यदि काष्ठोपलादीनां न भवेद्बोधरूपता ।
तत्सदानुपलम्भः स्यादेतेषामसतामिव ॥९॥(६।२५।१५)
मृण्मयं तु यथा भाण्डं मृच्छून्यं नोपलभ्यते ।
चिन्मयादितया चेत्यं चिच्छून्यं नोपलभ्यते ॥१०॥(६।२५।११)
सर्वं जगद्गतं दृश्यं बोधमात्रमिदं ततम् ।
स्पन्दमात्रं यथा वायुर्जलमात्रं यथार्णवः ॥११॥ (६।२५।१७)

[२] अद्वैतं सन्बन्धात् :—

न संभवति सम्बन्धो विषमाणां निरन्तरः ।
न परस्परसंवन्धाद्विनानुभवनं मिथः ॥१॥ (३।१२१।३७)
ऐक्यं च विद्धि सम्बन्धं नास्त्यसावसमानयोः॥२॥(३।१२१।४२)
सम्बन्धे दृश्यदृष्टीनां मध्ये द्रष्टुर्हि यद्वपुः ।
द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं परम् ॥३॥ (३।१२१।५३)

[३] सर्वस्य चिन्मयत्वम् :—

एकं वस्तु जगत्सर्वं चिन्मात्रं वारिवाम्बुधिः ।
तदेव स्पन्दते धीभिः शुद्धवारिव वीचिभिः ॥१॥(६।१०१।५४)
द्वितीया नास्ति सत्तैका नामरूपक्रियात्मिका

परे नानातरङ्गेऽब्धौ कल्पनेव जलेतरा ॥२॥(३।१००।२७)
न बहिर्नान्तरे सन्ति पदार्थाः केचन क्वचित् ।
संविदेका जगद्रूपैर्यथेच्छति तथा स्थिता ॥३॥ (६/२।१४८।७)

[४] पदार्थजातस्य सङ्कल्पमयत्वम् :—

समस्तं कल्पनामात्रमिदम् ॥ १ ॥ (६/१।२१०।११)
विश्वं नास्त्येव मननादृते ॥ २ ॥ (३।४०।५७)
मनसीदं जगत्कृत्स्नं स्फारं स्फुरति चास्ति च ॥३॥ (४।४।११)
मनोमनननिर्माणमात्रमेतज्जगत्त्रयम् ॥ ४ ॥ (४।११।२३)
मनोविजृम्भणमिदं संसार इति संमतम् । (४।४७।४८)
जगद्दीर्घमहास्वप्नः सोऽयमन्तः समुत्थितः ॥५॥ (४।१८।४७)
चितः सर्वाः समायान्ति संतताः सृष्टिदृष्टयः । (४।४७।५६)
बहिर्न किञ्चिदप्यस्ति खाद्यब्ध्युर्वीदिगादिकम् ॥६॥(५।४८।४६)
एतत्स्वचित्त एवास्ति पत्रपुञ्जमिवाङ्कुरे । (५।४८।४६)
फलादि स्फारतामेति यथैव बहिरङ्कुरात् ॥७॥(५।४८।५०)
बहिः प्रकटतां याति तथा पृथ्व्यादि चेतसः । (५।४८।५०)
सत्यं पृथ्व्यादि चित्तस्थं न बहिष्ठं कदाचन ॥८॥ (५।४८।५१)
रूपालोकमनस्कारतत्ताकालक्रियात्मकम् ।
कुम्भकारो घटमिव चेतो हन्ति करोति च ॥९॥ (५।४८।५२)
सर्वं संकल्परूपेण चिच्चमत्कुरुते चिति ।
स्वप्नपत्तननिर्माणपातोत्पातनवज्जगत् ॥ १० ॥ (६/२।४२।१६)
बाह्यं न विद्यते किञ्चिद्बोधः स्फुरति बाह्यवत् ।

उदेति बोधहृदयाद्बीजादिव वरद्रुमः ॥११॥(३।५१।८)
बोधस्यान्तरिदं विश्वं स्थितमेव रघूद्वह । (३।५१।९)
देशकालक्रियाद्रव्यसम्पत्त्योदेति भावना ॥१२॥ (३।५६।३७)
द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः
संकल्पकचितं सर्वमेवं स्वप्नवदात्मनः ॥१३॥(३।१०१।३५)
धाराकणोर्मिफेणश्रीर्यथा संलक्ष्यतेऽम्भसः ।
तथा विचित्रविभवा नानातेयं हि चेतसः ॥१४॥(३।११०।४८)
व्यतिरिक्ता यथा हेम्नो न हेमवनिता तथा ।
जाग्रत्स्वप्नक्रियालक्ष्मीर्व्यतिरिक्ता न चेतसः॥१५॥(३।११०।४७)
यदन्तः स्वप्नसंकल्पपुरं च कचनं चितेः । (३।४४।२०)
तदेतद्बाह्यनाम्नैव स्वभ्यासात्सत्स्फुटं स्थितम् ॥१६॥ (३।४४।२१)

(अ) देशः :—

चिदणुर्यत्र भातोऽसौ देशो मितिमुपागतः ।
यदा भातस्तदा कालो यद्भानं तत्क्रिया स्मृता ॥१॥(६।७३।१९)
मनोरथे तथा स्वप्ने संकल्पकलनासु च ।
गोष्पदं योजनव्यूहः स्वासु लीलासु चेतसः ॥२॥ (३।१०३।१३)
न देशकालदीर्घत्वम् ॥३॥ (३।४४।१९)

(आ) कालः :—

देशकालाभिधानेन राम संकल्प एव हि ।
कथ्यते तद्वशाद्यस्माद्देशकालौ स्थितिं गतौ ॥१॥(३।११०।५९)

यथैतत्प्रतिभामात्रं जगत्सर्गावभासनम्
तथैतत्प्रतिभामात्रं क्षणकल्पावभासनम् ॥२॥ (३।२०।२९)
निमेषे यदि कल्पौघसंविदं परिविन्दति ।
निमेष एव तत्कल्पो भवत्यत्र न संशयः॥ ३॥ (३।६०।२०)
कल्पे यदि निमेषत्वं वेत्ति कल्पोऽप्यसौ ततः ।
निमेषीभवति क्षिप्रं तादृग्रूपात्मिका हि चित् ॥४॥(३।६०।२१)
दुःखितस्य निशा कल्पः सुखितस्यैव च क्षणः ।
क्षणः स्वप्ने भवेत्कल्पः कल्पश्च भवति क्षणः ॥५॥ (३।६०।२२)
रात्रिं द्वादशवर्षाणि हरिश्चन्द्रोऽनुभूतवान् ।
लवणो भुक्तवानायुरेकरात्र्या समाः शतम् ॥६॥ (३।६०।२४)
यन्मुहूर्तः प्रजेशस्य स मनोर्जीवितं मुनेः ।
जीवितं यद्धरिश्चस्य तद्दिनं किल चक्रिणः ॥७॥(३।६०।२५)
विष्णोर्यज्जीवितं राम तद्वृषाङ्कस्य वासरः ।
ध्यानप्रक्षीणचित्तस्य न दिनानि न रात्रयः ॥८॥(३।६०।२६)
रात्रिर्द्वादशवर्षाणि हरिश्चन्द्रे तथाह्यभूत् ।
कान्ताविरहिणामेकं वासरं वत्सरायते ॥९॥ (३।२०।५१)

(इ) द्रव्यम् :—

यथा ज्ञप्तिरुदेत्यन्तस्तथानुभवति क्षणात् ।
चितिश्चेत्यार्थतामेति चित्तं चित्तार्थतामिव ॥१ ॥ (३।४४।१८)
यादृगर्थं जगद्रूपं तत्रैवोदेति तत्क्षणात् ।
न देशकालदीर्घत्वं न वैचित्र्यं पदार्थजम् ॥२॥ (३।४४।१९)

यथाभावितमेतेषां पदार्थानामतो वपुः ।
अभ्यासजनितं भाति नास्त्येकं परमार्थतः ॥३॥ (३।२६।५२)
असदेवाङ्ग सदिव भाति पृथ्व्यादिवेदनात् ।
यथा बालस्य वेतालो नाभाति तदवेदनात् ॥४॥(३।२६।४५)
स्वप्ने नगरमुर्वी वा शून्यं खातं च बुध्यते ।
स्वप्नाङ्गना च कुरुते शून्याप्यर्थक्रियां नृणाम् ॥५॥(३।२६।४८)
खं पृथ्व्यादितया बुद्धं पृथ्व्यादि भवति क्षणात् ।
मूर्च्छायां परलोकोऽपि प्रत्यक्षमनुभूयते ॥६॥ (३।२६।४९)
बालो व्योमैव वेतालं म्रियमाणोऽम्बरे वनम् ।
केशोण्डूकं खमन्यस्तु खमन्यो वेत्ति मौक्तिकम् ॥७॥(३।२६।५०)
त्रस्तक्षीबार्धनिद्राश्च नौयानाश्च सदैव खे ।
वेतालवनवृक्षादि पश्यन्त्यनुभवन्ति च ॥८॥ (३।२६।५१)

(ई) नियतिः :—

नियत्यनियती ब्रूहि कीदृशे स्वप्नसंविदि । (६।१४८।२०)
यावज्ज्ञानं किल स्वप्ने तावत्सैव नियन्त्रणा ॥१॥(६।१४८।२१)

(उ) स्थिरता :—

स्वप्ने निमग्नधीर्जन्तुः पश्यति स्थिरतां यथा । (६।६१।२९)
सर्गस्वप्ने मग्नबुद्धिः पश्यति स्थिरतां तथा ॥१॥ (६।६१।३०)

(ऊ) देहः :—

मदृशक्तिरिव ज्ञानमिति नास्मासु सिध्यति ।
देहो विज्ञानतोऽस्माकं स्वप्नवन्नतु तत्त्वतः ॥१॥ (६।५२।११)

(ए) आधिभौतिकत्वम् :—

आतिवाहिक एवायं त्वादृशैश्चित्तदेहकः ।
आधिभौतिकताबुध्या गृहीतश्चिरभावनात् ॥ १ ॥ (३।२१।५४)
आतिवाहिकदेहस्य कालेनाभ्युदितो भ्रमः ।
आधिभौतिकदेहोऽहमिति रज्जुभुजङ्गवत् ॥ २ ॥(३।५७।१४)
आतिवाहिकदेहेन दृश्यं यदवलोकितम् ।
भूम्यादि नाम तस्यैव कृतं तच्चाधिभौतिकम् ॥३॥ (३।५७।१५)
वास्तवेन तु रूपेण भूम्याद्यात्माधिभौतिकः ।
न शब्देन न चार्थेन सत्यात्मा शशशृङ्गवत् ॥४॥ (३।५७।१६)
आतिवाहिकमेवैषां भूतानां विद्यते वपुः ।
अत्राधिभौतिकभ्रान्तिरसत्यैव पिशाचिका ॥ ५ ॥ (६।६८।३४)

[५] द्रष्टृदृश्ययोरनन्यत्वम :—.

किञ्चित्प्रचलिता भोगात्पयोराशेरिवोर्मयः । (३।६४।२०)
स्वतेजःस्पन्दिताभोगाद्दीपादिव मरीचयः ॥१॥ (३।६४।२१)
स्वमरीचिवलोद्भूता ज्वलिताग्नेः कणा इव । (३।६४।२२)
मन्दारमञ्जरीरूपाश्चन्द्रबिम्बादिवांशवः ॥ २ ॥ (३।६४।२३)

यथा विटपिनश्चित्रास्तद्रूपा विटपश्रियः । (३।९३.२४)
कटकाङ्गदकेयूरयुक्तयः कनकादिव ॥ ३ ॥ (३।९४।२५)
निर्भरादमलोद्योतात्पयसामिव बिन्दवः । (३।९४।२६)
आकाशस्य घटस्थालीरन्ध्राकाशादयो यथा॥ ४ ॥(३।९४।२७)
सीकरावर्तलहरीबिन्दवः पयसो यथा । (३।९४।२८)
मृगतृष्णातरङ्गिण्यो यथा भास्करतेजसः ॥ ५ ॥ (३।९४।२९)
सर्वा दृश्यदृशो द्रष्टुर्व्यतिरिक्ता न रूपतः । (३।९४।२९)
पद्माक्षे पद्मिनीवान्तर्मनो हृद्यस्ति दृश्यता ।
मनोदृश्यदृशौ भिन्ने न कदाचन केनचित् ॥ ६ ॥(३।३।३६)

[६] द्रष्टुर्दृश्यबीजत्वम् :—

आलीनवल्लरीरूपं यथा पद्माक्षकोटरे ।
अस्ते कमलिनीबीजं तथा द्रष्टरि दृश्यधीः ॥ १ ॥(३।१।४२)
यथा रसः पदार्थेषु यथा तैलं तिलादिषु ।
कुसुमेषु यथाऽऽमोदस्तथा द्रष्टरि दृश्यधीः ॥ २ ॥(३।१।४३)
यत्र यत्र स्थितस्यापि कर्पूरादेः सुगन्धिता ।
यथोदेति तथा दृश्यं चिद्धातोरुदरे जगत् ॥ ३ ॥(३।१।४४)
यथा चात्र तव स्वप्नः संकल्पश्चित्तराज्यधीः ।
स्वानुभूत्यैव दृष्टान्तस्तथा हृद्यस्ति दृश्यभूः ॥ ४ ॥(३।१।४५)
यथाऽङ्कुरोऽन्तर्बीजस्य संस्थितो देशकालतः ।
करोति भासुरं देहं तनोत्येवं हि दृश्यधीः ॥ ५ ॥(३।१।४७)

[७] जाग्रत्स्वप्नयोरभेदः :—

जाग्रत्स्वप्नदशाभेदो न स्थिरास्थिरते विना ।
समः सदैव सर्वत्र समस्तोऽनुभवोऽनयोः ॥ १ ॥(४।१९।११)
स्थिरप्रत्ययुक्तं यत्तज्जाग्रदिति कथ्यते ।
अस्थिरप्रत्ययं यत्स्यात्तत्स्वप्नः समुदाहृतः ॥ २ ॥(४।१९।९)
जाग्रत्त्वे क्षणदृष्टः स्यात्स्वप्नः कालान्तरे स्थितः ।
तज्जाग्रत्स्वप्नतामेति स्वप्नो जाग्रत्वमृच्छति ॥३॥(४।१९।१०)
स्वप्नोऽपि स्वप्नसमये स्थैर्याज्जाग्रत्वमृच्छति ।
अस्थैर्याज्जाग्रदेवास्ते स्वप्नस्तादृशबोधतः ॥४॥(४।१९।१२)
स्वप्नोऽपि जाग्रद्बुध्द्यंशो जाग्रत्त्वमुपगच्छति ।
स्वप्नता स्वप्नबुध्या तु यथा संवेदनं स्थितम् ॥५॥(४।१९।१३)
आदिसर्गे हि चित्स्वप्नो जाग्रदित्यभिशब्द्यते ।
अद्य रात्रौ चितेः स्वप्नः स्वप्न इत्यपि शब्द्यते ॥६॥ (ई।५५।९)
इदं जाग्रदयं स्वप्न इति नास्त्येव भिन्नता ।
सत्ये वस्तुनि निःशेषसमयोर्यानुभूतितः ॥७॥ (ई।१६१।२४)
नैतदेवमिति स्वप्नप्रबोधात्प्रत्ययो यथा ।
मृत्वामुत्र प्रबुद्धस्य जाग्रति प्रत्ययस्तथा ॥८॥(ई।१६१।२५)
कालमल्पमनल्पं च स्वप्नजाग्रदितीह धीः ।
वर्तमानानुभवनसाम्यात्तुल्ये तयोर्द्वयोः ॥९॥ (ई।१६१।२६)
बाह्ये तदेवमित्यादिगुणसाम्यादशेषतः ।
न जाग्रत्स्वप्नयोर्जातानेकोऽपि यमयोरिव ॥१०॥(ई।१६१।२७)

आजीवितान्तं स्वप्नानां शतान्यनियतं यथा ।
आनिर्वाणमहाबोधे तथा जाग्रच्छतान्यपि ॥११॥(६।१६१।२६)
उत्पन्नध्वंसिनः स्वप्नाः स्मर्यन्ते बहवो यथा ।
तथैव बुद्धैः स्मर्यन्ते सिद्धैर्जन्मशतान्यपि ॥१२॥(६।१६१।३०)
यथा स्वप्नस्तथा जाग्रदिदं नास्त्यत्र संशयः ।
स्वप्ने पुरमसद्भाति सर्गादौ भात्यसज्जगत् ॥१३॥ (३।५७।५०)

[८] जगतः स्वप्नरूपत्वम् :—

रूपालोकमनस्काराः शब्दपाठवचांसि च ।
यथा स्वप्ने नभस्येव सन्ति तत्र तथाम्बरे ॥१॥ (६।६२।२३)
रूपालोकमनस्कारैः स्वप्ने चिन्नभ एव ते ।
यथोदेति तथा तत्र तद्दृश्यं स्वात्मकं स्थितम् ॥२॥(६।६२।२४)
न केवलं तु तद्दृश्यं यावत्तु विषयं वयम् ।
जगच्चेदं स्वमेवाच्छं यथा तन्नस्तथाखिलम् ॥३॥(६।६२।२५)
शरीरस्थानकरणसत्तायां का तव भ्रमा ।
यथैव तेषां देहादि तथास्माकमिदं स्थितम् ॥४॥(६।६२।२७)
यथा स्वप्ने धराध्वाद्रिपृष्ठव्यवहृतिर्नभः ।
तदा अहं च त्वं सा च तदिदं च तथा नभः ॥५॥ (६।६२।२६)
यथा स्वप्ने नृभिर्युद्धकोलाहलगमागमाः ।
असन्तोऽप्यनुभूयन्ते संसारनिकरास्तथा ॥६॥ (६।६२।३०)
स्वप्नस्य विद्यते द्रष्टा साकारो युष्मदादिकः ।
द्रष्टा तु सर्गस्वप्नस्य चिद्व्योमैवामलं स्वतः ॥७॥(६।६२।४०)

निरुपादानसम्भारमभित्तावेव चिन्नभः ।
पश्यत्यकृतमेवेमं जगत्स्वप्नं कृतं यथा ॥८॥(६।६२।४४)

[९] विश्वस्वप्नः :—

दीर्घस्वप्नमिदं विश्वं विद्धयहन्तादिसंयुतम् । (३।४२।८)
सर्गादावात्मभूर्भाति स्वप्नाभानुभवात्मकः ॥१॥ (३।४२।१६)
स्वप्ने नगरवास्तव्याः सत्या न स्युरिमे यदि ।
तदिहापि तदाकारे न सत्यं मे मनागपि ॥२॥(३।४२।१८)
एतदास्तामिदं तावद्यज्जाग्रदिव मन्यसे ।
विद्धि तत्स्वप्नमेवान्तर्देशकालाद्यपूरकम् ॥ ३ ॥ (३।४२।२३)
एवं सर्वमिदं भाति न सत्यं सत्यवत्स्थितम् ।
रञ्जयत्यपि मिथ्यैव स्वप्नस्त्रीसुरतोपमम् ॥४॥(३।४२।२४)

[१०] जीवं जीवं प्रति विश्वस्वप्नः :—

प्रत्येकमुदितो राम नूनं संसृतिखण्डकः ।
रात्रौ सैन्यनरस्वप्नजालवत्स्वात्मनि स्फुटः ॥१॥(४।१७।२७)
पृथक्प्रत्येकमुदितः प्रतिचित्तं जगद्भ्रमः । (३।४०।२६)
न किञ्चिदपि जानाति निजसंवेदनादृते ॥२॥(३।५५।६१)
यं प्रत्युदेति सर्गोऽयं स एवैनं हि चेतति ।
पदार्थैः सन्निवेशं स्वमिव स्वप्नं पुमानिव ॥४ ॥ (६।१३।४)
रूपालोकमनस्कारैरन्धैर्बहिरिव स्थितम् ।
सृष्टिं पश्यति जीवोऽन्तः सरसीमिव पर्वतः ॥५॥(६।२२।२७)

स्वसंज्ञानुभवे लीनास्तथा स्थावरजङ्गमाः । (३।५५।६२)
अन्यस्यान्यं न जानाति सीधुस्वादुमिव द्विजः ॥६॥(६।१६५।३१)
परमाणौ परमाणौ सर्गवर्गानिरर्गलम् ।
महाचितेः स्फुरन्त्यर्करुचीव त्रसरेणवः ॥७॥(३।२७।२६)
जगद्गुञ्जासहस्राणि यत्रासंख्यान्यणावणौ ।
अपरस्परलग्नानि काननं ब्रह्म नाम तत् ॥८॥(४।१८।६)

[१] सर्गादौ प्रजापतिकृतमद्यापि संस्थितं जगत् :—

सर्गादौ स्वप्नपुरुषन्यायेनादिप्रजापतिः ।
यथा स्फुटं प्रकचितस्तथाद्यापि स्थिता स्थितिः ॥१॥(३।५५।४७)
एवं भ्रान्तिमये विश्वे पदार्थाः संविदंशवः ।
सर्गादिषु यथैवासंस्तथैवाद्यपि संस्थिताः ॥२॥(३।५५।६७)
सङ्कल्पयति यन्नाम प्रथमोऽसौ प्रजापतिः ।
तत्तदेवाशु भवति तस्येदं कल्पनं जगत् ॥३॥(६।१८६।६५)
आदिसर्गे जगद्भ्रान्तिर्यथेयं स्थितिमागता ।
तथा तदाप्रभृत्येवं नियतिः प्रौढिमागता॥४॥(३।२१।४६)
तस्मिन्प्रथमतः सर्गे या यथा यत्र संविदः ।
कचितास्तास्तथा तत्र स्थिता अद्यापिनिश्चलाः ॥५॥(३।५४।१३)
सर्गादौ स्वयमेवान्तश्चिद्यथा कचितात्मनि ।
हिमाग्न्यादितयाऽद्यापि सा तथास्ते स्वसत्तया॥६॥(३।५४।१६)
यद्यथा कचितं यत्र व्योमरूप्यपि पार्थिवम् ।
सर्गादौ तस्य चलितुमद्ययावन्न युज्यते ॥७॥(३।५४।१८)

[१२] बाह्यार्थवादविज्ञानवादयोरैक्यम् :—

बाह्यार्थवादविज्ञानवादयोरैक्यमेव नः ।
वेदनात्मैकरूपत्वात्सर्वदा सदसंस्थितेः ॥ १ ॥ (६।३८।४)
ब्रह्मपुर्यष्टकस्यादावर्थसंविद्यथोदिता ।
पुर्यष्टकस्य सर्वस्य तथैवोदेति सर्वदा ॥ २ ॥ (६।५१।२)
प्रथमोऽसौ प्रतिस्पन्दः पदार्थानां हि बिम्बकम् ।
प्रतिबिम्बतमेतस्माद्यत्तदद्यापि संस्थितम् ॥ ३ ॥ (३।५५।४८)
महाचित्प्रतिभासत्वान्महानियतिनिश्चयात् ।
अन्योन्यमेव पश्यन्ति मिथः सम्प्रतिबिम्बितात्॥४॥(३।५३।२५)
स्वसंज्ञानुभवे लीनास्तथा स्थावरजङ्गमाः ।
परस्परं यदा सर्वे स्वसंकेतपरायणाः ॥ ५ ॥ (३।५५।६२)
कदाचित्प्रतिभैकैव बहूनामपि जायते ।
काकोलतालस्थितिवद्विचित्रा हि मनोगतिः ॥६॥ (५।४६।१०)
तथाहि बहवः स्वप्नमेकं पश्यन्ति मानवाः ।
स्वापभ्रमदमैरेयमदमन्थरचित्तवत् ॥ ७ ॥ (५।४६।११)
यादृगेव विराडात्मन्येष विस्तार आगतः ।
तादृगेवेह सर्वस्मिन्नणुमात्रेऽपि भूतके ॥ ८ ॥ (६।२०।७)
यथेन्दुत्वं स्वसंकल्पात्सर्वध्यातुः पृथक्पृथक् ।
भात्येवमेव वनितालाभः काल्पनिकः स्वतः ॥ ६ ॥(६।२१०।८)
अस्माकं त्वं स्वप्ननरस्तव स्वप्ननरा वयम् । (६।१५१।१०)
एवमेतदिदं सर्वमन्योन्यं स्वप्नवत्स्थितम् ॥१०॥(६।१५४।११)

संसारे विपुले स्वप्ने यथा सत्यमहं तव ।
तथा त्वमपि मे सत्यं सर्वं स्वप्नेष्विति क्रमः॥११॥(३।४२।२०)

[१३] आत्मख्यातिवादः :—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
इत्येताश्चिच्चमत्कृत्या आत्मख्यातेर्विभूतयः ॥ १ ॥ (६।१९९।९)



३—जगत्

[१] जगन्नामानि :—

जगत्स्वप्नमित्यादिर्मिथ्यात्मा दृश्यमुच्यते ।
यावदेतत्संभवति तावन्मोक्षो न विद्यते ॥ १ ॥ (३।१।२३)
अविद्या संसृतिर्बन्धो माया मोहो महत्तमः ।
कल्पितानीति नामानि यस्याः सकलवेदिभिः ॥ २ ॥ (३।१।२०)

[२] सङ्कल्पितस्यापि सङ्कल्पयितृत्वम्:—

स्वयं स्वभाव एवैष चिद्घनस्यास्य सुस्फुटम् ।
यद्यत्सङ्कल्पयत्याशु तत्र तेऽवयवा अपि ॥ १ ॥(६।२०८।२७)
चिदात्मकतया भान्ति नानात्मकतयात्मना ।
अप्येकसारास्तिष्ठन्ति नानाकारस्वभावगाः॥ २ ॥(६।२०८।२८)
प्रत्येकं किल तत्रास्ति ब्रह्म चिन्मात्रतात्मनि ।
सर्वात्मिका सा यत्रास्ते यथान्तर्भाति तत्तथा॥३॥(६।२०८।२९)
योयो नाम यथा ग्रीष्मे कल्पस्वेदाद्भवेत्कृमिः।
यद्यद्दृश्यं शुद्धचित्स्वं तज्जीवो भवति स्वतः ॥ ४ ॥(४।१९।३)

[३] सर्गे सर्गे सर्गान्तराणि :—

सर्गे सर्गे पृथग्रूपं सन्ति सर्गान्तराण्यपि । (४।१८।१६)
तेष्वप्यन्तस्थसर्गौघाः कदलीदलपीठवत् ॥ १ ॥ (४।१८।१७)

जीवबीजं परं ब्रह्म सर्वत्र खमिव स्थितम् ।
तेन जीवोदरजगत्यपि जीवोऽस्त्यनेकधा ॥ २ ॥ (४।१६।१)
चिद्घनैकघनात्मत्वाज्जीवान्तर्जीवजातयः ।
कदलीदलवत्सन्ति कीटा इव धरोदरे ॥ ३ ॥ (४।१६।२)
त्रिजगच्चिदणावन्तरस्ति स्वप्नपुरं यथा ।
तस्याप्यन्तश्चिदणवस्तेष्वप्येकैकशो जगत् ॥ ४ ॥ (३।५२।२०)
आकाशे परमाण्वन्तर्द्रव्यादेरणुकेऽपि च । (३।४४।३४)
जीवाणुर्यत्र तत्रेदं जगद्वेत्ति निजं वपुः ॥ ५ ॥ (३।४४।३५)
अन्तरन्तस्तदन्तश्च स्वकोशेऽप्यणुकं प्रति ।
जातानि जायमानानि कदलीदलपीठवत् ॥ ६ ॥ (३।५१। ३)
परस्परमदृष्टानि नानुभूतानि वै मिथः ।
सैनिकस्वप्नजालानि जातानीव महान्त्यपि॥ ७ ॥ (३।५६।३४)
जगतोऽन्तरहंरूपमहंरूपान्तरे जगत् ।
स्थितमन्योन्यवलितं कदलीदलपीठवत् ॥ ८ ॥ (३।२२।२६)
जगन्ति सुबहून्येव सम्भवन्त्यणुकेऽपि च ।
कदलीपल्लवानीव सन्निवेशेन भूरिशः॥ ९ ॥ (३।५२।१६)
महारम्भगुरूण्येवमपि ब्रह्माण्डकानि हि ।
तुलया धानकामात्रमपि तानि भवन्ति नो ॥१०॥ (३।२७।२६)
परमाणुनिमेषाणां लक्षांशकलनास्वपि ।
जगत्कल्पसहस्राणि सत्यानीव विभान्त्यलम्॥११॥(३।६२।१)
तेष्वप्यन्तस्तथैवान्तः परमाणुकणं प्रति ।
भ्रान्तिरेवमनन्ताहो इयमित्यवभासते ॥१२॥(३।६२।२)

अणावणावसंख्यानि तेन सन्ति जगन्ति खे ।
तेषां तान्यवहारौघान्संख्यातुं क इव क्षमः ॥१३॥(६।१७६।६)

[४] परस्परमदृष्टानि सर्गजालानि :—

प्रत्येकमन्तरन्यानि तथैवाभ्युदितानि च ।
परस्परमदृष्टानि बहूनि विविधानि च ॥ १ ॥(६।६३।१२)
अन्योन्यं तानि सर्वाणि न पश्यन्त्येव किंचन ।
जडानीवैकराशीनि बीजानीव गलन्त्यपि ॥ २ ॥ (६।६३।१३)
स्वप्नरूपाणि सुप्तानां तुल्यकालं नृणामिव ।
महारम्भानुमृष्टानि शून्यानि च परस्परम् ॥ ३ ॥(६।५६।१६)
परस्परमदृष्टानि नानुभूतानि वै मिथः ।
सैनिकस्वप्नजालानि जातानीव महान्त्यपि ॥ ४ ॥(६।५६।३४)
संकल्पनगरं सत्यं यथा संकल्पितं प्रति ।
सदेहं वा विदेहं वा नेतरं प्रति किञ्चन ॥ ५ ॥(३।२१।४५)

[५] सर्वस्य सर्वत्र सर्वदा संभवः :—

ब्रह्म सर्वगतं यस्माद्यथा यत्र यदोदितम् ।
भवत्याशु तथा तत्र स्वप्नशक्त्यैव पश्यति ॥ १ ॥(३।५२।४२)
सर्वत्र सर्वशक्तित्वाद्यत्र या शक्तिरुन्नयेत् ।
आस्ते तत्र तथा भाति तीव्रसंवेगहेतुतः ॥ २ ॥ (३।५२।४३)
सर्वत्र सर्वथा सर्वं सर्वदा सर्वरूपिणि । (६।१५६।४१)
सर्वं सर्वात्म सर्वत्र सर्वदास्ति तथा परे ॥ ३ ॥(६।१३।२८)

[६] जगद्वैचित्र्यम् :—

अनन्तानि जगन्त्यस्मिन्ब्रह्मतत्त्वमहाम्बरे ।
अम्भोधिवीचिजलवन्निमज्जन्त्युद्भवन्ति च ॥१॥ (४।४७।१४)
यथा तरङ्गा जलधौ मृगतृष्णा मरौ यथा ।
कुसुमानि यथा चूते तथा विश्वश्रियः परे ॥ २ ॥(४।४७।१५)
भूयोभूयो विवर्तन्ते सर्गेष्वप्स्विव वीचयः ।
अत्यन्तसदृशाः केचित्केचिदर्धसमक्रमाः ॥ ३ ॥ (३।६६।२३)
केचिदीषत्समाः केचिन्न कदाचित्पुनस्तथा । (३।६३।२४)
सर्वासां सृष्टिराशीनां चित्राकारविचेष्टिताः ॥ ४ ॥(४।४७।२७)
दैवमात्रैकसर्गाणि नरमात्रमयानि च ।
दैत्यवृन्दमयान्येव कृमिनिर्विवराणि च ॥ ५ ॥ (३।५६।३२)
कदाचित्सृष्टयः शार्व्यः कदाचित्पद्मजोद्भवाः ।
कदाचिदपि वैष्णव्यः कदाचिन्मनुनिर्मिताः॥ ६ ॥(४।४७।८)
भूरभून्मृन्मयी काचित्काचिदासीद्दृषन्मयी ।
आसीद्धेममयी काचित्काचित्ताम्रमयी तथा ॥७॥ (४।४७।१२)
यथा मशकजालानि वर्षादिष्वाकुलानि तु ।
उत्पत्योत्पत्य नश्यन्ति तथेमा लोकसृष्टयः॥ ८ ॥(४।४७।१७)
न च विज्ञायते कस्मात्कालात्प्रभृति चागताः।
नित्यागमापायपरा एताः सर्गपरम्पराः ॥६॥ (४।४७।१८)
अनादिमत्योऽविरतं प्रस्फुरन्ति तरङ्गवत् ।
पूर्वात्पूर्वं किलाभूवन्स्ततः पूर्वतरं यथा ॥ १० ॥ (४।४७।१६)

भूत्वा भूत्वा प्रलीयन्ते ससुरासुरमानवाः ।
सरित्तरङ्गभङ्ग्यैव समस्ता भूतजातयः ॥ ११ ॥ (४।४७।२०)

[७] सृष्टिलययोः पौनःपुन्यम् :—

जीवौघाश्चोद्भविष्यन्ति मधाविव नवाङ्कुराः ।
तत्रैव लयमेष्यन्ति ग्रीष्मे मधुरसा इव ॥ १ ॥ (३।६५।१०)
तिष्ठन्त्यजस्रं कालेषु त एवान्ये च भूरिशः ।
जायन्ते च प्रलीयन्ते परस्मिञ्जीवराशयः ॥ २ ॥(३।६५।११)
काश्चिज्जन्मसहस्रान्ते जातयश्चिरकालिकाः ।
काश्चित्कतिपयातीतजन्मरूपा व्यवस्थिताः ॥ ३ ॥ (३।६४।३१)
उत्पत्योत्पत्य कालेन भुक्त्वा देहपरम्पराम् ।
स्वत एव पदे यान्ति निलयं जीवराशयः ॥ ४ ॥ (४।४३।४४)

[८] कल्पान्ते सर्वसंक्षयः :—

पुत्र शेषमशेषेण दृश्यमाशु विनश्यति ।
यथा तथा स्वप्नपुरं सौषुप्तौ स्थितिमायुषः ॥ १ ॥ (६/२।२१३।५)
निर्विशेषेण नश्यन्ति भुवः शैला दिशो दश ।
क्रिया कालः क्रमश्चैव न किञ्चिदवशिष्यते ॥२॥ (६/२।२१३।६)
नश्यन्ति सर्वभूतानि व्योमापि परिणश्यति ।
स सर्वजगदाभासमुपलब्धुरसंभवात् ॥ ३ ॥ (६/२।२१३।७)
ब्रह्मविष्ण्विन्द्ररुद्राद्या ये हि कारणकारणम् ।
तेषामप्यतिकल्पान्ते नामापीह न विद्यते ॥४॥ (६/२।२१३।८)

यदिदं दृश्यते सर्वं जगत्स्थावरजङ्गमम् ।
तत्सुषुप्ताविव स्वप्नः कल्पान्ते प्रविनश्यति ॥ ५ ॥ (३।१।१०)
शाम्यतीदमशेषेण तथा सर्वत्र सर्वदा ।
यथा जाग्रद्दिवौ स्वप्नः स्वप्ने वा जागरो यथा॥६॥(३।२१३।१५)
यथा स्वप्नपुरं शान्तं न जाने क्वाशु गच्छति ।
शान्तं तथा जगद्दृश्यं न जाने क्वाशु गच्छति॥७॥(३।२१३।१६)

[९] ब्रह्मैव कल्पान्तेऽवशिष्यते :—

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत्किञ्चिदवशिष्यते ॥ १ ॥(३।१।११)
ब्रह्मास्ते शान्तमजरमनन्तात्मैव केवलम् । (३।२।३६)
शून्यं नित्योदितं सूक्ष्मं निरुपाधि परं स्थितम् ॥२॥(३।२।३७)

[१०] जगदुत्पत्तिवर्णनम् :—

सुषुप्तं स्वप्नवद्भाति भाति ब्रह्मैव सर्गवत् ।
सर्वात्मकं च तत्स्थानं तत्र तावत्क्रमं शृणु ॥ १ ॥ (३।१२।२)
तदात्मनि स्वयं किञ्चिच्चेत्यतामिव गच्छति ।
अगृहीतात्मकं संविदहंमर्शनपूर्वकम् ॥ २ ॥ (३।१२।४)
भाविनामार्थकलनैः किञ्चिदूहितरूपकम् ।
आकाशादणु शुद्धं च सर्वस्मिन्भाति बोधनम्॥३॥ (३।१२।५)
ततः सा परमा सत्ता सचेतश्चेतनोन्मुखी ।
चिन्नामयोग्या भवति किंचिल्लभ्यतया तथा ॥ ४ ॥ (३।१२।६)

घनसंवेदना पश्चाद्भाविजीवादिनामिका ।
सम्भवत्याचकलना यदोज्झति परं पदम् ॥ ५ ॥ (३।१२।७)
सत्तैव भावनामात्रसारा संसरणोन्मुखी ।
तदा वस्तुस्वभावेन त्वनुत्तिष्ठति तामिमाम् ॥ ६ ॥ (३।१२।८)
समनन्तरमेवास्याः खसत्तोदेति शून्यता ।
शब्दादिगुणबीजं सा भविष्यदभिधार्थदा ॥ ७ ॥ (३।१२।९)
अहन्तोदेति तदनु सह वै कालसत्तया ।
भविष्यदभिधार्थेन बीजं मुख्यजगत्स्थितेः ॥ ८ ॥ (३।१२।१०)
एवंप्रायात्मिका संविद्बीजं सङ्कल्पशाखिनः ।
भवत्यहंकारकणस्ततः स्पन्दतया मरुत् ॥ ९ ॥ (३।१२।१२)
चिदहं तावती व्योमशब्दतन्मात्रभावनात् ।
खतो घनीभूय शनैः खतन्मात्रं भवत्यलम् ॥१०॥(३।१२।१३)
भाविनामार्थरूपं तद्बीजं शब्दौघशाखिनः ।
पदवाक्यप्रमाणाख्यं वेदवृन्दं विकासितम् ॥११॥ (३।११।१४)
तस्मादुदेष्यत्यखिला जगच्छ्रीः परमात्मनः ।
शब्दौघनिर्मितार्थौघपरिणामविसारिणः ॥ १२ ॥ (३।१२।१५)
चिदेवंपरिवारा सा जीवशब्देन कथ्यते ।
भाविशब्दार्थजालेन बीजं रूपौघशाखिनः ॥१३॥ (३।१२।१६)
चतुर्दशविधं भूतजालमावलितान्तरम् ।
जगज्जठरगर्तौघं प्रसरिष्यति वै ततः ॥१४॥ (३।१२।१७)
असम्प्राप्ताभिधाचारा चिज्जवात्मस्फुरद्वपुः ।
सा चैव स्पर्शतन्मात्रं भावनाद्भवति क्षणात् ॥१५॥ (३।१२।१८)

पवनस्कन्धविस्तारं बीजं स्पर्शौघशाखिनः ।
सर्वभूतक्रियास्पन्दस्तस्मात्सम्प्रसरिष्यति ॥१६॥ (३।१२।१९)
तत्रैव चिद्विलासेन प्रकाशोऽनुभवाद्भवेत् ।
तेजस्तन्मात्रकं तत्तु भविष्यदभिधार्थकम् ॥१७॥ (३।१२।२०)
तत्सूर्याग्निविजृम्भादिबीजमालोकशाखिनः ।
तस्माद्रूपविभेदेन संसारः प्रसरिष्यति ॥ १८ ॥ (३।१२।२१)
भावयन्स्तनुतामेव रसस्कन्ध इवाम्भसः ।
स्वदनं तस्य सङ्घस्य रसतन्मात्रमुच्यते ॥ १९ ॥ (३।१२।२२)
भाविवारिविलासात्मा तद्बीजं रसशाखिनः ।
अन्योन्यस्वदने तस्मात्संसारः प्रसरिष्यति ॥२०॥ (३।१२।२३)
भविष्यद्रूपसङ्कल्पनामासौ कल्पनात्मकः ।
सङ्कल्पात्मगुणैर्गन्धतन्मात्रत्वं प्रपश्यति ॥२१॥ (३।१२।२४)
भाविभूगोलकत्वेन बीजमाकृतिशाखिनः ।
सर्वाधारात्मनस्तस्मात्संसारः प्रसरिष्यति ॥२२॥ (३।१२।२५)
चिता विभाव्यमानानि तन्मात्राणि परस्परम् ।
स्वयं परिणतान्यन्तरम्बुनीव निरन्तरम् ॥ २३ ॥ (३।१२।२६)
तथैतानि विमिश्राणि विविक्तानि पुनर्यथा ।
न शुद्धान्युपलभ्यन्ते सर्वनाशान्तमेव हि ॥२४॥ (३।१२।२७)
संवित्तिमात्ररूपाणि स्थितानि गगनोदरे ।
भवन्ति वटजालानि यथा बीजकणान्तरे ॥२५॥ (३।१२।२८)
प्रसवं परिपश्यन्ति शतशाखं स्फुरन्ति च ।
परमाण्वन्तरे भान्ति क्षणात्कल्पीभवन्ति च ॥२६॥(३।१२।२९)

विवर्तमेव धावन्ति निर्विवर्तानि सन्ति च ।
चिद्वेधितानि सर्वाणि क्षणात्पिण्डीभवन्ति च ॥२७॥(३।१२।३०)

[११] आकाशत्रयम् :—

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं वरानने ॥१॥ (३।१७।१०)
देशदेशान्तरप्राप्तौ संविदो मध्यमेव यत् ।
निमेषेण चिदाकाशं तद्विद्धि वरवर्णिनि ॥ २ ॥ (३।१७।१२)
तच्चिदाकाशकोशात्म चिदाकाशैकभावनात् ।
अविद्यमानमप्याशु दृश्यतेऽथानुभूयते ॥ ३ ॥ (३।१७।११)
तस्मिन्निरस्तनिःशेषसङ्कल्पस्थितिमेषि चेत् ।
सर्वात्मकं पदं तत्त्वं त्वं तदाप्नोष्यसंशयम् ॥ ४ ॥ (३।१७।१३)
चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
विद्ध्येतत्त्रयमेकं त्वमविनाभावनावशात् ॥ ५ ॥ (३।४०।१६)

[१२] नियतिः :—

आदिसर्गे हि नियतिर्भाववैचित्र्यमक्षयम् ।
अनेनेत्थं सदा भाव्यमिति सम्पद्यते परम् ॥ १ ॥ (३।६२।६)
अवश्यंभवितव्यैषा त्विदमित्थमिति स्थितिः ।
न शक्यते लङ्घयितुमपि रुद्रादिबुद्धिभिः ॥ २ ॥ (३।६२।२६)

सर्वज्ञोऽपि बहुज्ञोऽपि माधवोऽपि हरोऽपि च ।
अन्यथा नियतिं कर्तुं न शक्तः कश्चिदेव हि ॥३॥ (५।८९।२६)
पाषाणोदरलेखौघन्यायेनात्मनि तिष्ठता ।
ब्रह्मणा नियतिः सर्गौ बुद्धोऽबोधवतेव खम् ॥४॥ (३।६२।१६)
सर्गादौ या यथा रूढा संवित्कचनसन्ततिः ।
साऽद्याप्यचलितान्येन स्थिता नियतिरुच्यते ॥ ५ ॥(३।५४।२२)
आमहारुद्रपर्यन्तमिदमित्थमिति स्थितेः ।
आतृणापब्जजस्पन्दं नियमान्नियतिः स्मृता ॥ ६ ॥ (६/१।३७।२२)

[१३] नियतेः काकतालीयवत्त्वम् :—

नियत्यनियती ब्रूहि कीदृशे स्वप्नसंविदि । (६/२।१४८।२०)
यावज्ज्ञानं किल स्वप्ने तावत्सैव नियन्त्रणा ॥१॥ (६/२।१४८।२१)
एवमस्या मुधाभ्रान्तेः का सत्ता कैव वासना ।
कावास्था काच नियतिः काऽवश्यंभावितोच्यताम् ॥२॥(३।६०।७)

[१४] नियतिपौरुषयोर्न विरोधः :—

पौरुषं न परित्याज्यमेतामाश्रित्य धीमता ।
पौरुषेणैव रूपेण नियतिर्हि नियामिका ॥ १ ॥ (३।६२।२७)

[१५] नियतिरपि पौरुषेण जीयते :—

नियतिं यादृशीमेतत्सङ्कल्पयति सा तथा ।
नियतानियतान्कांश्चिदर्थाननियतानपि ॥ १ ॥ (५।२४।३१)

करोति चित्तं तेनैतच्चित्तं नियतियोजकम् ।
नियत्यां नियतिं कुर्वन्कदाचित्स्वार्थनामिकाम् ॥२॥(५।२४।३२)
जीवो हि पुरुषो जातः पौरुषेण स यद्यथा । (५।२४।३५)
सङ्कल्पयति लोकेऽस्मिन्स्तत्तथा तस्य नान्यथा॥३॥(५।२४।३६)

४—मनः

[१] मनोरूपम् :—

सङ्कल्पनं मनो विद्धि सङ्कल्पात्तन्न भिद्यते ।
यथा द्रवत्वात्सलिलं तथा स्पन्दो यथानिलात् ॥१॥ (३।४।४३)

यत्र सङ्कल्पनं तत्र तन्मनोऽङ्ग तथा स्थितम् ।
सङ्कल्पमनसी भिन्ने न कदाचन केचन ॥ २ ॥ (३।४।४४)

यदर्थप्रतिभानं तन्मन इत्यभिधीयते । (३।४।४२)
परस्य पुंसः सङ्कल्पमयत्वं चित्तमुच्यते ॥ ३ ॥ (५।१३।८०)

अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः ।
संकल्पशक्तिरचितं यद्रूपं तन्मनो विदुः ॥ ४ ॥ (३।९६।३)

सम्पन्ना कलनानाम्नी संकल्पानुविधायिनी ।
अवच्छेदवती वाग्रा हेयोपादेयधर्मिणी ॥ ५ ॥ (५।१३।५६)

तत्स्वयं स्वैरमेवाशु संकल्पयति नित्यशः ।
तेनेत्थमिन्द्रजालश्रीर्विततेयं वितन्यते ॥ ६ ॥ (३।१।१६)

चिन्निःस्पन्दो हि मलिनः कलङ्कविकलान्तरम् ।
मन इत्युच्यते राम न जडं न च चिन्मयम् ॥७॥ (३।९६।४१)

चितो यच्चेत्यकलनं तन्मनस्त्वमुदाहृतम् ।
चिद्भागोऽत्राजडो भागो जाड्यमत्र हि चेत्यता ॥८॥(३।९१।३७)

जडाजडदृशोर्मध्ये दोलारूपं स्वकल्पनम् ।
यश्चितो म्लानरूपिण्यास्तदेतन्मन उच्यते ॥ ९ ॥ (३।९६।४०)

जडाजडं मनो विद्धि संकल्पात्म बृहद्वपुः ।
अजडं ब्रह्मरूपत्वाज्जडं दृश्यात्मतावशात् ॥१०॥ (३।९१।३१

नाहं वेदावभासात्मा कुर्वाणोऽस्मीति निश्चयः ।
तस्मादेकान्तकलनस्तद्रूपं मनसो विदुः ॥ ११ ॥ (३।९६।५)

भावः सदसतोर्मध्ये नृणां चलति यश्चलः ।
कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः ॥ १२ ॥ (३।९६।४)

मनो हि भावनामात्रं भावना स्पन्दधर्मिणी ।
क्रिया तद्भावितारूपं फलं सर्वोऽनुधावति ॥१३॥ (३।९६।१)

नहि दृश्यादृते किञ्चिन्मनसो रूपमस्ति हि ॥१४॥ (३।४।४८)

स्वमेवान्यतया दृष्ट्वा चितिर्दृश्यतया वपुः ।
निर्भागाप्येकभागाभं भ्रमतीव भ्रमातुरा ॥१५॥ (३।९१।४०)

शाश्वतेनैकरूपेण निश्चयेन विना स्थितिः ।
येन सा चित्तमित्युक्ता तस्माज्जातमिदं जगत् ॥१६॥ (३।९६।३९)

दृश्यानुभवसत्यात्म न सद्भावे विलासि तत् ।
कटकत्वं यथा हेम्नि तथा ब्रह्मणि संस्थितम्॥१७॥(३।९१।३२)

न बाह्ये नापि हृदये सद्रूपं विद्यते मनः ।
सर्वत्रैव स्थितं चैतद्विद्धि राम यथा नभः ॥ १८ ॥ (३।४।३९)

आतिवाहिकदेहात्मा मन इत्यभिधीयते ।
आधिभौतिकबुद्धिं तु स आधत्ते चिरस्थितेः॥ १९ ॥(३।४।४६)

[२] मनोब्रह्मणोरभेदः :—

चेत्येन रहिता यैषा चित्तद्ब्रह्म सनातनम् ।

चेत्येन सहिता यैषा चित्सेयं कलनोच्यते ॥१॥ (५।१३।५३)
किञ्चिदामृष्टरूपं यद्ब्रह्म तच्च स्थिरं मनः ।
कल्पना सत्सदैवैतत्सदिवोपस्थिता हृदि ॥ २ ॥ (५।१३।५४)
यथा कटककेयूरैर्भेदो हेम्नो विलक्षणः ।
तथात्मनश्चितो रूपं भावयन्त्याःस्वमांशिकम् ॥३॥ (४।४२।१८)
यथा दीपेन दीपानां जातानामात्मनां तथा ।
देशकालकलामात्रभेदः स्वाभाविकश्चितेः ॥ ४ ॥ (४।४२।१९)
वातस्य वातस्पन्दस्य यथा भेदो न विद्यते ।
शून्यत्वखत्वोपमयोश्चिन्मात्राहंत्वयोस्तथा ॥ ५ ॥ (६।९६।१९)

[३] मनसो रूपाणि नामानि च :—

यथा गच्छति शैलूषो रूपाण्यलं तथैव हि ।
मनो नामान्यनेकानि धत्ते कर्मान्तरं व्रजत् ॥ १ ॥ (३।९६।४३)
चित्राधिकारवशतो विचित्रा विकृताभिधाः ।
यथा याति नरः कर्मवशाद्याति तथा मनः ॥२॥ (३।९६।४४)
यथैव पुरुषः स्नानदानादानादिकाः क्रियाः ।
कुर्वंस्तत्कर्तृवैचित्र्यमेति तद्वदिदं मनः ॥ ३ ॥ (३।९६।५५)
विचित्रकार्यवशतो नामभेदेन कर्तृता ।
मनः सम्प्रोच्यते जीववासनाकर्मनामभिः ॥ ४ ॥ (३।९६।५६)

(अ) मनः :—

गतेव सकलङ्कत्वं कदाचित्कल्पनात्मकम् ।

उन्मेषरूपिणी नाना तदैव हि मनः स्थिता ॥५॥ (३।९६।१७)

(आ) बुद्धिः :—

भावनामनुसन्धानं यदा निश्चित्य संस्थिता ।
तदैषा प्रोच्यते बुद्धिरियत्ताग्रहणात्तमा ॥ ६ ॥ (३।९६।१८)

इदमित्थमिति स्पष्टबोधाद्बुद्धिरिहोच्यते । (६।१८८।५

(इ) अहङ्कारः :—

अस्मीति प्रत्ययादन्तरहंकारश्च कथ्यते ॥ ७ ॥ (६।१८८।६)
यदा मिथ्याभिमानेन सत्तां कल्पयति स्वयम् ।
अहंकाराभिमानेन प्रोच्यते भवबन्धनी ॥ ८ ॥ (३।९६।१९)

(ई) चित्तम् :—

इदं त्यक्त्वेदमायाति बालवत्पेलवा यदा ।
विचारं सम्परित्यज्य तदा सा चित्तमुच्यते ॥ ९ ॥ (३।९६।२०)

(उ) कर्म :—

यदा स्पन्दैकधर्मत्वात्कर्तुर्या शून्यशंसिनी ।
आधावति स्पन्दफलं तदा कर्मेत्युदाहृता ॥ १० ॥ (३।९६।२१)

(ऊ) कल्पना :—

काकतालीययोगेन त्यक्तवैकघननिश्चयम् ।
यदेहितं कल्पयति भावं तेनेह कल्पना ॥ ११ ॥ (३।९६।२२)

(ए) स्मृतिः :—

पूर्वदृष्टमदृष्टं वा प्राग्दृष्टमिति निश्चयैः ।
यदैवेहां विधत्तेऽन्तस्तदा स्मृतिरुदाहृता ॥ १२ ॥ (३।९६।२३)

(ऐ) वासना :—

यदा पदार्थशक्तीनां संभुक्तानामिवाम्बरे ।
वसत्यस्तमितान्येहा वासनेति तदोच्यते ॥ १३ ॥ (३।९६।२४)
दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥१४॥ (५।९१।२९)

(ओ) अविद्या :—

अस्त्यात्मतत्त्वं विमलं द्वितीया दृष्टिरङ्किता ।
जाता ह्यविद्यमानैव तदाविद्येति कथ्यते ॥१५॥ (३।९६।२५)
बोधादविद्यमानत्वादविद्येत्युच्यते बुधैः । (६।१८८।८)
अविद्यैवमनन्तेयं नानाप्रसवशालिनी ॥ १६ ॥ (६।१६०।१३)

(औ) मलम् :—

स्फुरत्यात्मविनाशाय विस्मारयति तत्पदम् ।
मिथ्या विकल्पजालेन तन्मलं परिकल्प्यते ॥१७॥ (३।९६।२६)

(अं) माया :—

सदसत्तां नयत्याशु सत्तां वा सत्वमञ्जसा ।

सत्तासत्ताविकल्पोऽयं तेन मायेति कथ्यते ॥१८॥ (३।९६।२९)

(अः) प्रकृतिः :—

सर्वस्य दृश्यजालस्य परमात्मन्यलक्षिते ।
प्रकृतत्वेन भावानां लोके प्रकृतिरुच्यते ॥ १९ ॥ (३।९६।२८)

(क) ब्रह्मेत्यादिः :—

स आतिवाहिको देहस्तदालोकप्रवर्तितः ।
कैश्चिद्ब्रह्मेति कथितः स्मृतः कैश्चिद्विराडिति॥२०॥(६।१८८।१७)
कश्चित्सनातनाभिख्यः कश्चिन्नारायणाभिधः ।
कश्चिदीश इति ख्यातः कश्चिदुक्तः प्रजापतिः॥२१॥(६।१८८।१८)

(ख) जीवः :—

जीवनाच्चेतनाज्जीवो जीव इत्येव कथ्यते । (६।१८८।४)
चेतनं राम संसारो जीव एषः पशुः स्मृतः ॥ २२ ॥ (३।७।७)

(ग) आतिवाहिकदेहः :—

एतत्कलनमाद्यन्तमनाकारमनामयम् ।
आतिवाहिकदेहोक्त्या समुदाह्रियते बुधैः ॥२३॥ (६।१८८।९)

(घ) इन्द्रियम् :—

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा विमृश्य च ।

इन्द्रमानन्दयत्येषा तेनेन्द्रियमिति स्मृतम् ॥२४॥ (३।६६।२७)

(ङ) पुर्यष्टकम् :—

प्रौढसंकल्पजालात्स पुर्यष्टकमिति स्मृतम् । (६।१८८।७)

(च) देहपदार्थौ :—

देहभावनया देहो घटभावनया घटः ॥ २५ ॥ (६।५०।१७)

(छ) दर्शनान्तरैः सह मतभेदः :—

चितेश्चेत्यानुपातिन्या गतायाः सकलङ्कताम् ।
प्रस्फुरद्रूपधर्मिण्या एताः पर्यायवृत्तयः ॥२६॥ (३।९६।३१)
अहंकारमनोबुद्धिदृष्टयः सृष्टिकल्पनाः ।
एकरूपतया प्रोक्ता या मया रघुनन्दन ॥ २७ ॥ (३।९६।४८)
नैयायिकैरितरथा तादृशैः परिकल्पिताः ।
अन्यथा कल्पिताः सांख्यैश्चार्वाकैरपि चान्यथा ॥२८॥(३।९६।४९)
जैमिनीयैश्चार्हतैश्च बौद्धैर्वैशेषिकैस्तथा ।
अन्यैरपि विचित्रैस्तैः पाञ्चरात्रादिभिस्तथा ॥२९॥(३।९६।५०)

[४] जीवस्याहङ्कारताऽऽदानम् :—

तदेव घनसंवित्त्या यात्यहन्तामनुक्रमात् ।
वह्न्यणुः स्वेन्धनाधिक्यात्स्वां प्रकाशतामिव ॥१॥ (३।६४।१२)

जीवोऽहंकृतिमादत्ते संकल्पकलयेद्धया ।
स्वयैतया घनतया नीलिमानमिवाम्बरम् ॥ २ ॥ (३।६४।१४)
अहंभावो हि दिक्कालव्यवच्छेदी कृताकृतिः ।
स्वयं संकल्पवशतो वातस्पन्द इव स्फुरन् ॥ ३ ॥ (३।६४।१५)

[५] जीवस्य देहभावादानम् :—

जीवाकाशस्त्विमं देहं यथा वन्दिति तच्छृणु ।
जीवाकाशः स्वयमेवासौ तस्मिंस्तु परमेश्वरे ॥१॥ (३।१३।१८)
अणुतेजःकणोऽस्मीति स्वयं चेतति चित्तया ।
यत्तदेवोच्छूनमिव भावयत्यात्मनाम्बरे ॥ २ ॥ (३।१३।१९)
असदेव सदाकारं सङ्कल्पेन्दुर्यथा न सन् ।
तमेव भावयन् दृष्टृदृश्यरूपतया स्थितः ॥ ३ ॥ (३।१३।२०)
एकएव द्वितामेति स्वप्ने स्वमृतिबोधवत् ।
किञ्चित्स्थौल्यमिवादत्ते ततस्तारकतां विदन् ॥४॥ (३।१३।२१)
यथाभावितमत्रार्थभाविताद्विश्वरूपतः ।
स एव स्वात्मा सततोऽप्ययं सोऽहमिति स्वयम् ॥५॥(३।१३।२२)
चित्तात्मत्ययमाधत्ते स्वप्ने स्वामिव पान्थताम् ।
तारकाकारमाकारं भाविदेहाभिधं तथा ॥ ६ ॥ (३।१३।२३)
भावयत्येति तद्भावं चित्तं चेत्यार्थतामिव ।
परित्यज्यैव तद्बाह्यं ततस्तारककोदरे ॥ ७ ॥ (३।१३।२४)
स्वप्नसङ्कल्पयोः संविद्धेश्येतज्जीवकोऽणुके ।
स्वरूपतारकान्तस्थो जीवोऽयं चेतति स्वयम् ॥८॥ (३।१३।२६)

तदेतद्बुद्धिचित्तादिज्ञानसत्तादिरूपकम् ।
जीवाकाशः स्वतस्तत्र तारकाकाशकोशगम् ॥९॥ (३।१३।२७)
प्रेक्षेऽहमिति भावेन द्रष्टुं प्रसरतीव खे ।
ततो रन्ध्रद्वयेनैव भाविबाह्याभिधं पुनः ॥ १० ॥ (३।१३।२८)
येन पश्यति तन्नेत्रयुगं नाम्ना भविष्यति ।
येन स्पृशति सा वै त्वग्यच्छृणोति श्रुतिस्तु सा॥११॥(३।१३।२९)
येन जिघ्रति तद्घ्राणं स स्वमात्मनि पश्यति ।
तत्तस्य स्वदनं पश्चाद्रसना चोल्लसिष्यति ॥ १२ ॥ (३।१३।३०)
स्पन्दते यत्स तद्वायुश्चेष्टा कर्मेन्द्रियव्रजम् ।
रूपालोकमनस्कारजातमित्यपि भावयत् ॥१३॥ (३।१३।३१)
आतिवाहिकदेहात्मा तिष्ठत्यम्बरमम्बरे ॥ १४ ॥ (३।१३।३२)
मनोबुद्धिरहङ्कारस्तथा तन्मात्रपञ्चकम् ।
इति पुर्यष्टकं प्रोक्तं देहोऽसावातिवाहिकः ॥ १५ ॥ (६।५१।५०)
अहं किमिति शब्दार्थवेदनाभोगसंविदम् ।
संविदं तच्चशब्दार्थं जीवः पश्यति सार्थकम् ॥१६॥ (३।६७।४६)
तादृक्त्ववेदनात्सोऽथ रसशब्दार्थवेदनात् ।
भाविजिह्वार्थनाम्नैकदेशेऽनुभवति क्षणात्॥१७॥ (३।६७।४७)
तादृक्त्ववेदनात्तेजः शब्दार्थोन्मुखतां गतः ।
भविष्यन्नेत्रनाम्नैकदेशे भवति भासनम् ॥ १८ ॥ (३।६७।४८)
तादृक्त्ववेदनात्सोऽथ घ्राणं तद्दृष्टिवेदनात् ।
स्थितो यस्मिन्भवतीति तावद्दृश्याऽऽदिता स्थिता॥१९॥(३।६७।४९)
एवंप्रायः स जीवात्मा काकतालीयवच्छनैः ।

विशिष्टसन्निवेशत्वं भावितं पश्यति स्वतः ॥ २० ॥ (३।६७।५०)
स तस्य सन्निवेशस्य त्वसतोऽपि सतः सतः ।
शब्दभावैकदेशत्वं श्रवणार्थेन विन्दति ॥२१॥ (३।६७।५१)
स्पर्शभावैकदेशत्वं त्वक्शब्दार्थेन विन्दति ।
रसभावैकदेशत्वं रसनात्वेन विन्दति ॥ २२ ॥ (३।६७।५२)
रूपभावैकदेशत्वं नेत्रार्थाकृति पश्यति ।
गन्धभावैकदेशत्वं नासिकात्वेन पश्यति ॥ २३ ॥ (३।६७।५३)
एवं भावमयैः सत्ताप्रकटीकरणात्तमम् ।
भविष्यदिन्द्रियाख्यं स रन्ध्रं पश्यति देहके ॥२४॥(३।६७।५४)
इत्येवमादि जीवस्य राघवाद्यतनस्य च ।
उदेति प्रतिभासात्मा देह एवातिवाहिकः ॥२५॥ (३।६७।५५)
आतिवाहिकदेहात्मा चित्तदेहाम्बराकृतिः ।
स्वकल्पनान्त आकारमण्डं संस्थं प्रपश्यति ॥२६॥ (३।१३।३४)

[६] स्वसङ्कल्पकृतं वेष्टनम् :—

इच्छाद्याः शक्तयश्चेतो गावो वृषमिवोन्मदम् ।
अनुधावन्ति दोषाय सरितः सागरं यथा ॥ १ ॥ (४।४२।३०)
इति शक्तिमयंचेतो घनाहंकारतां गतम् ।
कोशकारक्रिमिरिव स्वेच्छया याति बन्धनम् ॥२॥ (४।४२।३१)
स्वसङ्कल्पानुसन्धानात्पाशैरिव नयन्वपुः ।
कष्टमस्मिन्स्वयम्बन्धमेत्यात्मा परितप्यते ॥३॥ (४।४२।३२)

स्वसङ्कल्पिततन्मात्रज्वालाभ्यन्तरवर्ति च ।
परां विवशतामेति शृंखलाबद्धसिंहवत् ॥ ४ ॥ (४।४१।३४)
स्ववासनादशावेशादाशाविवशतां गताः ।
दशास्वतिविचित्रासु स्वयं निगडिताशयाः ॥ ५ ॥ (४।४३।३)

(७) संसृतिबीजविचारः—

अन्तर्लीनघनारम्भशुभाशुभमहाङ्कुरम् ।
संसृतिव्रततेर्बीजं शरीरं विद्धि राघव ॥ १ ॥ (५।६१।८)
भावाभावदशाकोशं दुःखरत्नसमुद्गकम् ।
बीजमस्य शरीरस्य चित्तमाशावशानुगम् ॥ २ ॥ (५।६१।१०)
यदिदं किञ्चिदाभोगि जागतं दृश्यतां गतम् ।
रूपं तच्चेतसः स्फारं घटादित्वं मृदो यथा ॥ ३ ॥ (५।६१।१३)
द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः ।
एकं प्राणपरिस्पन्दो द्वितीयं दृढभावना ॥ ४ ॥ (५।६१।१४)
द्वे बीजे राम चित्तस्य प्राणस्पन्दनवासने ।
एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः ॥५॥ (५।६१।४८)
आमोदपुष्पवत्तैलतिलवच्चान्यवस्थिते ।
वासनावशतः प्राणस्पन्दस्तेन च वासना ॥ ६ ॥ (५।१६।५३)
चित्तोपशान्तिफलदं परमं साम्यकारणम् ।
सुभगं संविदः स्वास्थ्यं प्राणसंरोधनं विदुः ॥७॥ (५।६१।२७)
दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥८॥ (५।६१।२६)

भावितस्तीव्रसंवेगादात्मना यत्तदेव सः ।
भवत्याशु महाबाहो विगतेतरसंस्मृतिः ॥ ९ ॥ (५।९१।३०)

तादृग्रूपः स पुरुषो वासनाविवशीकृतः ।
यत्पश्यति तदेतत्तत्सद्वस्त्विति विमुह्यति ॥१०॥ (५।९१।३१)

वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत् ।
भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मदवशादिव ॥११॥ (५।९१।३२)

दृढाभ्यासपदार्थैकवासनादतिचञ्चलम् ।
चित्तं संजायते जन्मजरामरणकारणम् ॥ १२ ॥ (५।९१।३५)

यदा न वास्यते किञ्चिद्धेयोपादेयरूपि यत् ।
स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ॥ १३ ॥ (५।९१।३६)

वासनाप्राणपवनस्पन्दयोरनयोर्द्वयोः । (५।९१।६३)
संवेद्यं बीजमित्युक्तं स्फुरतस्तौ यतस्ततः ।
हृदि संवेद्यमाप्यैव प्राणस्पन्दोऽथ वासना ॥१४॥ (५।९१।६४)

संवेद्यसंपरित्यागात्प्राणस्पन्दनवासने । (५।९१।६५)
समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः ॥१५॥ (५।९१।६६)

पुरुषत्वं यथा स्थाणोः संवेद्यं संविदस्तथा । (५।९१।७१)
शुद्धैव संवित्त्रिजगत्संवेद्यं नान्यदस्त्यलम् ॥१६॥ (५।९१।७१)

यदा सङ्कल्प्य सङ्कल्प्य सम्वित्सम्विदते वपुः ।
तदास्य जन्मजालस्य सैव गच्छति बीजताम् ॥१७॥ (५।९१।८९)

अथास्याः सम्विदो राम सन्मात्रं बीजमुच्यते ।
सम्विन्मात्रादुदेत्येषा प्राकाश्यमिव तेजसः ॥१८॥ (५।९१।९८)

विशेषं सम्परित्यज्य सन्मात्रं यदलेपकम् ।

एकरूपं महारूपं सत्तायास्तत्पदं विदुः ॥१९॥ (५।६१।१०२)
सत्तासामान्यमात्रस्य या कोटिः कोविदेश्वर ।
सैवास्य बीजतां याता तत एव प्रवर्तते ॥२०॥ (५।६१।१०६)
सत्तासामान्यपर्यन्ते यत्तत्कलनयोज्झितम् ।
पदमाद्यमनाद्यन्तं तस्य बीजं न विद्यते ॥२१॥ (५।६१।११०)
तत्र किञ्चिच्च किञ्चिच्च तत्तदस्तीव नास्ति च ।
तत्तद्दृश्यमदृश्यं च तत्तदस्मि न चास्मि च ॥२२॥ (३।६१।१२०)

[८] जीवानामसंख्येयत्वम् :—

एवं जीवाश्रितो भावा भवभावनयोहिताः ।
ब्रह्मणः कल्पिताकाराल्लक्षशोऽप्यथ कोटिशः ॥१॥ (४।४३।१)
असङ्ख्याताः पुरा जाता जायन्ते चापि वाद्य भोः ।
उत्पतिष्यन्ति चैवाम्बुकणौघा इव निर्झरात् ॥२॥ (४।४३।२)
स्ववासनादशावेशादाशाविवशतां गताः ।
दशास्वतिविचित्रासु स्वयं निमज्जिताशयाः ॥३॥ (४।४३।३)
अनारतं प्रतिदिशं देशे देशे जले स्थले ।
जायन्ते वा म्रियन्ते वा बुद्बुदा इव वारिणि ॥४॥ (४।४३।४)

[९] सप्तविधो जीवमोहः :—

बीजजाग्रत्तथा जाग्रन्महाजाग्रत्तथैव च । (३।११७।११)
जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तकम् ॥१॥(३।११७।१२)

(अ) बीजजाग्रत् :—

प्रथमे चेतनं यत्स्यादनाख्यं निर्मलं चितः । (३।११७।१३)
भविष्यच्चित्तजीवादिनामशब्दार्थभाजनम् ।
बीजरूपं स्थितं जाग्रद्बीजजाग्रत्तदुच्यते ॥ २ ॥ (३।११७।१४)

(आ) जाग्रत् :—

नवप्रसूतस्य परादयं चाहममिदं मम । (३।११७।१५)
इति यः प्रत्ययः स्वस्थस्तज्जाग्रत्प्रागभावनात् ॥३॥(३।११७।१६)

(इ) महाजाग्रत् :—

अयं सोहमिदं तन्म इति जन्मान्तरोदितः । (३।११७।१६)
पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुरन् ॥४॥(३।११७।१७)

(ई) जाग्रत्स्वप्नः :—

अरूढमथ वा रूढं सर्वथा तन्मयात्मकम् । (३।११७।१७)
यज्जाग्रतो मनोराज्यं जाग्रत्स्वप्नः स उच्यते ॥५॥(३।११७।१८)
द्विचन्द्रशुक्तिकारूप्यमृगतृष्णादिभेदतः । (३।११७।१८)
अभ्यासात्प्राप्य जाग्रत्त्वं स्वप्नोऽनेकविधो भवेत्॥६॥(३।११७।१९)

(उ) स्वप्नः :—

अल्पकालं मया दृष्टमेवं नो सत्यमित्यपि । (३।११७।१९)
निद्राकालानुभूतेऽर्थे निद्रान्ते प्रत्ययो हि यः ।

स स्वप्नः कथितस्तस्य महाजाग्रत्स्थितेर्हृदि ॥७॥(३।११७।२०)

(ऊ) स्वप्नजाग्रत् :—

चिरसंदर्शनाभावादप्रफुल्लबृहद्वपुः ।
स्वप्नो जाग्रत्तया रूढो महाजाग्रत्पदं गतः । (४।११७।२१)
अक्षते वा क्षते देहे स्वप्नजाग्रन्मतं हि तत् ॥८॥ (३।११७।२२)

(ए) सुषुप्तिः :—

षडवस्थापरित्यागे जडा जीवस्य या स्थितिः । (३।११७।२२)
भविष्यद्दुःखबोधाढ्या सौषुप्ती सोच्यते गतिः ॥९॥(३।११७।२३)
एते तस्यामवस्थायां तृणलोष्टशिलादयः । (३।११७।२३)
पदार्थाः संस्थिताः सर्वे परमाणुप्रमाणिनः ॥१०॥(३।११७।२४)

[१०] सप्तविधा जीवाः :—

ते स्वप्नजागराः केचित्केचित्संकल्पजागराः ।
केचित्केवलजाग्रत्स्थाश्चिराज्जाग्रत्स्थिताः परे ॥१॥(६।५०।२)
घनजाग्रत्स्थिताश्चान्ये जाग्रत्स्वप्नास्तथेतरे ।
क्षीणजागरकाः केचिज्जीवाः सप्तविधाः स्मृताः ॥२॥ (६।५०।३)

(अ) स्वप्नजागराः :—

कस्मिंश्चित्प्राक्तने कल्पे कस्मिंश्चिज्जगति क्वचित् ।
केचित्सुप्ताः स्थिता देहैर्जीवा जीवितधर्मिणः ॥३॥ (६।५०।५)

ये स्वप्नमभिपश्यन्ति तेषां स्वप्नमिदं जगत् ।
विद्धि ते हि खलूच्यन्ते जीवकाः स्वप्नजागराः ॥४॥(६।५०।६)
क्वचिदेव प्रसुप्तानां यः स्वप्नः स्वयमुत्थितः ।
विषयः सोऽयमस्माकं तेषां स्वप्ननरा वयम् ॥५॥ (६।५०।७)
तेषां चिरतया स्वप्नः स जाग्रत्त्वमुपागतः ।
स्वप्नजागरकास्ते तु जीवास्ते तद्गताः स्थिताः ॥६॥ (६।५०।८)

(आ) सङ्कल्पजागराः :—

कस्मिंश्चित्प्राक्तने कल्पे कस्मिंश्चिज्जगति क्वचित् ।
अनिद्रालव एवान्तः संकल्पैकपरा स्थिताः ॥७॥ (६।५०।१४)
ध्यानाद्विलुंठिता वाथ मनोराज्यवशानुगाः ।
संकल्पदार्ढ्यमापन्ना गलिताग्र्यानुभूतयः ॥ ८ ॥ (६।५०।१५)
संकल्प एव जाग्रत्त्वं येषां चिरतयांशतः ।
तत्रास्तमितचेष्टानां ते हि संकल्पजागराः ॥ ९ ॥ (६।५०।१६)
संकल्पोपशमे भूयस्तमन्यं वा श्रयन्ति ते ।
देहे तेषां वयमिमे संकल्पपुरुषाः स्थिताः ॥१०॥ (६।५०।१७)

(इ) केवलजागराः :—

प्राथम्येनावतीर्णास्ते ब्रह्मणो बृंहितात्मनः ।
प्रोक्ताः केवलजाग्रत्थाः प्रागुत्पत्त्यविकासिनः ॥११॥ (६।५०।१९)

(ई) चिरजागराः :—

भूयो जन्मान्तरगतास्त एव चिरजागराः ।

कथ्यन्ते प्रौढिमायाताः कार्यकारणचारिणः ॥१२॥(६।५०।२०)

(उ) घनजागराः :—

त एव दुष्कृतावेशाज्जडस्थावरतां गताः ।
घनजाग्रत्तया प्रोक्ता जाग्रत्सु घनतां गताः ॥१३॥ (६।५०।२१)

(ऊ) जाग्रत्स्वप्नाः :—

ये तु शास्त्रार्थसत्सङ्गबोधिता बोधमागताः ।
पश्यन्ति स्वप्नवज्जाग्रज्जाग्रत्स्वप्ना भवन्ति ते॥१४॥(६।५०।२२)

(ए) क्षीणजागराः :—

ये तु संप्राप्तसम्बोधा विश्रान्ता परमे पदे ।
क्षीणजाग्रत्प्रभृतयस्ते तुर्यां भूमिकां गताः ॥१५॥ (६।५०।२३)

[११] जीवजातयः :—

(अ)इदंप्रथमता :—

इदंप्रथमतोत्पन्नो योऽस्मिन्नेव हि जन्मनि ।
इदंप्रथमतानाम्नी शुभाभ्याससमुद्भवा । (३।९४।२)
शुभालोकाश्रया सा च शुभकार्यानुबन्धिनी ॥१॥ (३।९४।३)

(अ) गुणपीवरी :—

सा चेद्विचित्रसंसारवासनाव्यवहारिणी । (३।९४।३)

भवैः कतिपयैर्मोक्षमित्युक्ता गुणपीवरी ॥ २ ॥ (३।६४।४)

(इ) ससत्वा :—

तादृक्फलप्रदानैककार्याकार्यानुमानदा । (३।६४।४)
तेन राम ससत्वेति प्रोच्यते सा कृतात्मभिः ॥३॥ (३।६४।५)

(ई) अधमसत्वा :—

अथ चेच्चित्रसंसारवासनाव्यवहारिणी । (३।६४।५)
अत्यन्तकलुषा जन्मसहस्रैर्ज्ञानभागिनी ॥ ४ ॥ (३।६४।५)
तादृक्फलप्रदानैकधर्माधर्मानुमानदा । (३।६४।६)
असावधमसत्वेति तेन साधुभिरुच्यते ॥ ५ ॥ (३।६४।७)

(उ) अत्यन्ततामसी :—

सैव संख्यातिगानन्तजन्मवृन्दादनन्तरम् । (३।६४।७)
संदिग्धमोक्षा यदि तत्प्रोच्यतेऽत्यन्ततामसी ॥६॥ (३।६४।८)

(ऊ) राजसी :—

अनद्यतनजन्मा तु जातिस्तादृशकारिणी । (३।६ ।८)
योत्पत्तिर्मध्यमा पुंसो राम द्वित्रिभवान्तरा । (३।६४।९)
तादृक्कार्या तु सा लोके राजसी राजसत्तम ॥७॥ (३।६४।९)

(ए) राजससात्विकी :—

अविप्रकृष्टजन्मापि सोच्यते कृतबुद्धिभिः ।

सा हि तन्मृतिमात्रेण मोक्षयोग्या मुमुक्षुभिः । (३।६४।१०)
तादृक्कार्यानुमानेन प्रोक्ता राजससात्त्विकी ॥८॥ (३।६४।११)

(ऐ) राजसराजसी :-

सैव चेद्दितरैस्त्वपैर्जन्मभिर्मोक्षभागिनी । (३।६४।११)
तत्तादृशी हि सा तज्ज्ञैः प्रोक्ता राजसराजसी ॥९॥ (३।६४।१२)

(ओ) राजसतामसी :-

सैव जन्मशतैर्मोक्षभागिनी चेच्चिरैषिणी । (३।६४।१२)
त्वदुक्ता तादृगारम्भा सद्भी राजसतामसी ॥१०॥(३।६४।१३)

(औ) राजसात्यन्ततामसी :-

सैव संदिग्धमोक्षा चेत्सहस्रैरपि जन्मनाम् । (३।६४।१३)
तदुक्ता तादृशारम्भा राजसात्यन्ततामसा ॥११॥ (३।६४।१४)

(अं) तामसी :-

भुक्तजन्मसहस्रा तु योत्पत्तिर्ब्रह्मणो नृणाम् । (३।६४।१४)
चिरमोक्षा हि कथिता तामसी सा महर्षभिः ॥१२॥(३।६४।१५)

(अः) तामससत्वा :-

तज्जन्मनैव मोक्षस्य भागिनी चेत्तदुच्यते । (३।६४।१५)
तज्ज्ञैस्तामससत्वेति तादृशारम्भशालिनी ॥१३॥ ((३।६४।१६)

(क) तमोराजसी :—

भवैः कतिपयैर्मोक्षभागिनी चेत्तदुच्यते । (३।९४।१६)
तमोराजसरूपेति तादृशैर्गुणबृंहितैः ॥ १४ ॥ (३।९४।१७)

(ख) अत्यन्ततामसी :—

पूर्वजन्मसहस्राढ्या पुरोजन्मशतैरपि । (३।९४।१७)
मोक्षायोग्या ततः प्रोक्ता तज्ज्ञैस्तामसतामसी॥१५॥(३।९४।१८)
पूर्वं तु जन्मलक्षाढ्या जन्मलक्षैः पुरोपि चेत् । (३।९४।१८)
संदिग्धमोक्षा तदसौ प्रोच्यतेऽत्यन्ततामसी ॥१६॥(३।९४।१९)

[१२] सर्वजीवानां ब्रह्मण उद्भव :—

सर्वा एताः समायान्ति ब्रह्मणो भूतजातयः । (३।९४।१९)
किञ्चित्प्रचलिता भोगात्पयोराशेरिवोर्मयः॥ १ ॥ (३।९४।२०)
स्वतेजःस्पन्दिताभोगाद्दीपादिव मरीचयः॥ २ ॥ (३।९४।२१)
स्वमरीचिवलोद्भूता ज्वलिताग्नेः कणा इव । (३।९४।२२)
मन्दारमञ्जरीरूपाश्चन्द्रबिम्बादिवांशवः ॥ ३ ॥ (३।९४।२३)
यथा विटपिनश्चित्रास्तद्रूपा विटपश्रियः । (३।९४।२४)
कटकाङ्गदकेयूरयुक्तयः कनकादिव ॥ ४ ॥ (३।९४।२५)
निर्झरादमलोद्योतात्पयसामिव बिन्दवः । (३।९४।२६)
आकाशस्य घटस्थालीरन्ध्राकाशादयो यथा ॥५॥(३।९४।२७)
सीकरावर्तलहरीबिन्दवः पयसो यथा । (३।९४।२८)
मृगतृष्णातरङ्गिण्यो यथा भास्करतेजसः ॥६॥ (३।९४।२९)
शीतरश्मेरिव ज्योत्स्ना स्वालोक इव तेजसः (३।९४।३०)

सर्वा एवोत्थिता राम ब्रह्मणो जीवराशयः ॥७॥ (३।६४।२५)

[१३] उत्पत्तिलययोः सर्वत्रैकरूपता :—

यथा सम्पद्यते ब्रह्मा कीटः सम्पद्यते तथा । (३।६७।६९)
आब्रह्मकीटसंवित्तेः सम्यक्संवेदनात्त्वयः ॥१॥ (३।६७।६८)

[१४] सर्वपदार्थानां समनस्कत्वम् :—

एतच्चित्तशरीरत्वं विद्धि सर्वगतोदयम् ।
यथा संवेदनेच्छत्वाद्यथा संवेदनोदयम् ॥ १ ॥(३।४०।२०)
वसति त्रसरेणवन्तर्ध्रियते गगनोदरे ।
लीयतेऽङ्कुरकोशेषु रसीभवति पल्लवे ॥ २ ॥ (३।४०।२१)
उल्लसत्यम्बुवीचित्वे प्रनृत्यति शिलोदरे ।
प्रवर्षत्यम्बुदो भूत्वा शिलीभूयावतिष्ठते ॥ ३ ॥ (३।४०।२२)
यथेच्छमम्बरे याति जठरेऽपि च भूभृताम् ।
अनन्तराकाशवपुर्धत्तेऽथ परमाणुताम् ॥ ४ ॥ (३।४०।२३)
यथा बीजेषु पुष्पादि मृदो राशौ घटो यथा ।
तथान्तः संस्थिता साधो स्थावरेषु स्ववासना ॥५॥ (६/१।१०।१९)
चिच्छक्तिर्वासनाबीजरूपिणी स्वापधर्मिणी ।
स्थिता रसतया नित्यं स्थावरादिषु वस्तुषु ॥६॥(६/१।१०।२३)
बीजेषूल्लासरूपेण जाड्येन जडरूपिषु ।
द्रव्येषु द्रव्यभावेन काठिन्येनेतरेषु च ॥ ७ ॥ (६/१।१०।२४)
प्राणिवीर्यरसान्तस्था संविज्जङ्गममाततम् ।
तनोति लतिकान्तस्थो रसः पुष्पफलं यथा ॥८॥ (६/१।२८।१८)

५—मनोमहत्त्वम् ।

[१] मनसः सर्वशक्तित्वम् :—

मनो हि जगतां कर्तृ मनो हि पुरुषः स्मृतः । (३।६१।४)
स्वरूपं सर्वकृत्त्वं च शक्तत्वं मनसो मुने ॥ १ ॥ (३।६१।१६)
मनो यदनुसन्धत्ते तदेवाप्नोति तत्क्षणात् । (३।६२।१८)
यथैतद्भावयेत्स्वान्तं तथैव भवति क्षणात् ॥ २ ॥ (३।६१।५२)
प्रतिभासमुपायाति यद्यदस्य हि चेतसः ।
तत्तत्प्रकटतामेति स्थैर्यं सफलतामपि ॥ ३ ॥ (३।६१।१७)

[२] चित्तस्य संसृतिसामर्थ्यम् :—

विचित्रबुद्बुदोल्लासे स्वात्मनो व्यतिरेकिणि ।
यथा सुरायाः सामर्थ्यं तथा चित्तस्य संसृतौ ॥१॥ (३।६६।६)
जीवः संकल्पमात्रात्मा यत्संकल्पोऽवतिष्ठते ।
हृदि भूत्वा स एवाशु बहिः प्रसरति स्फुटम् ॥२॥ (६/२।२२।३७)
तत्संकल्पात्मकं चेतो यथेदमखिलं जगत् ।
संकल्पयति संकल्पैस्तथैव भवति क्षणात् ॥३॥ (६/१।११४।१७)
विश्वबीजमहंत्वं त्वं विद्धि तस्माद्धि जायते ।
साद्र्यब्ध्युर्वीनदीशाद्रिजगज्जठरपादपः ॥ ४ ॥ (६/२।७।११)
मनोविजृम्भणमिदं संसार इति संमतम् । (४।४७।४८)

चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ ॥५॥ (६।४४।१६)
चित्तमेव जगत्कर्तृ संकल्पयति यद्यथा ।
असत्सत्सदसच्चैव तत्तथा तस्य तिष्ठति ॥ ६ ॥ (६।१३९।५)
अङ्कुरस्य यथा पत्रलतापुष्पफलश्रियः ।
मनसोऽस्य तथा जाग्रत्स्वप्नविभ्रमभूमयः ॥७॥ (३।११०।४६)
कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।
मनस्तदायत्तमतो देशकालक्रमं विदुः ॥ ८ ॥ (३।१०३।१४)
मनोदृश्यमयं दोषं तनोतीमं क्षयात्मकम् ।
असदेव सदाकारं स्वप्नः स्वप्नान्तरं यथा ॥९॥ (३।४।७८)

[३] स्वयं स्वैरं च चित्तस्य जगत्कल्पनम् :—

तत्स्वयं स्वैरमेवाशु संकल्पयति देहकम् ।
तेनेयमिन्द्रजालश्रीर्विततेन वितन्यते ॥ १ ॥ (३।४।७९)

[४] सर्वेषामेव चित्तानामेवंरूपशक्तिमत्त्वम् :—

प्रत्येकमेव यच्चित्तं तदेवंरूपशक्तिकम् ।
पृथक्प्रत्येकमुदितः प्रतिचित्तं जगद्भ्रमः ॥ १ ॥(३।४०।२९)

[५] जीवस्य सर्वसम्पादनत्वशक्तिः :—

सर्वं सम्पादयत्याशु स्वयं जीवः स्वमीहितम् । (३।४५।१२)
प्रत्येकमस्ति चिच्छक्तिर्जीवशक्तिस्वरूपिणी ॥१॥ (३।४५।१३)
जीवस्योदेति या शक्तिर्यस्य यस्य यथा यथा ।

भाति तत्फलदा नित्यं तस्य तस्य तथा तथा ॥२॥(३।४५।१४)
यस्य यस्य यथोदेति स्वचित्प्रयतनं चिरम् ।
फलं ददाति कालेन तस्य तस्य तथा तथा ॥३॥ (३।४५।१८)
तपो वा देवता वापि भूत्वा स्वैव चिदन्यथा ।
फलं ददात्यथ स्वैरं नभःफलनिपातवत् ॥ ४ ॥ (३।४५।१९)
स्वसंविद्यतनादन्यन्न किञ्चिच्च कदाचन ।
फलं ददाति तेनाशु यथेच्छसि तथा कुरु ॥५॥ (३।४५।२०)
स्वया वासनया लोको यद्यत्कर्म करोति यः ।
स तथैव तदाप्नोति नेतरस्येह कर्तृता ॥ ६ ॥ (४।१३।११)
न तदस्ति जगत्कोशे शुभकर्मानुपातिना ।
यत्पौरुषेण शुद्धेन न समासाद्यते जनैः ॥ ७ ॥ (३।९२।८)

[६] मनःसंवेदनानुरूपं पदार्थानां वपुः :—

यच्चित्तं तन्मयो जन्तुर्भवतीत्यनुभूतयः ।
सदेहेषु विदेहेषु न भवत्यन्यथा क्वचित् ॥ १ ॥(३।५६।२८)
यथा भावनमेतेषां पदार्थानां हि सत्यता । (३।५६।३०)
असत्यः सत्यतामेति पदार्थो भावनात्तथा ॥२॥ (३।५६।३१)
येन येन यथा यद्यद्यदा संवेद्यतेऽनघ ।
तेन तेन तथा तत्तत्तदा समनुभूयते ॥ ३ ॥ (३।६०।१६)
अमृतत्वं विषं याति सदैवामृतवेदनात् ।
शत्रुर्मित्रत्वमायाति मित्रसम्वित्तिवेदनात् ॥ ४ ॥ (३।६०।१७)
निमेषे यदि कल्पौघसंविदं परिवल्गति ।

निमेष एव तत्कल्पो भवत्यत्र न संशयः ॥ ५ ॥ (३।६०।२०)
कल्पे यदि निमेषत्वं वेत्ति कल्पोऽप्यसौ ततः ।
निमेषीभवति क्षिप्रं तादृग्रूपात्मिका हि चित् ॥६॥ (३।६०।२१)
दुःखितस्य निशा कल्पः सुखितस्यैव च क्षणः ।
क्षणः स्वप्ने भवेत्कल्पः कल्पश्च भवति क्षणः ॥७॥ (३।६०।२२)
ध्यानसंक्षीणचित्तस्य न दिनानि न रात्रयः । (३।६०।२६)
न पदार्था न च जगत्सत्यमात्मनि योगिनः ॥८॥ (३।६०।२७)
मधुरं कटुतामेति कटुभावेन चिन्तितम् । (३।६०।२७)
कटु चायाति माधुर्यं मधुरत्वेन चिन्तितम् ॥ ९ ॥ (३।६०।२८)
मित्रबुद्ध्या द्विषन्मित्रं रिपुबुद्ध्या रिपुः सुहृत् । (३।६०।२८)
भवतीति महाबाहो यथासम्वेदनं जगत् ॥ १० ॥ (३।६०।२९)
वेदनात्पीतमानीलं शुक्लं वाप्यनुभूयते ।
आपद्वदुत्सवः खेदं करोति परिमोहितः ॥ ११ ॥ (३।६०।३२)
शून्यमाकीर्णतामेति वेदनात्स्वप्नदृष्टिवत् । (३।६०।३१)
असद्यक्षो विमूढानां प्राणानप्यपकर्षति ॥ १२ ॥ (३।६०।३३)
वेदनात्स्वप्नवनिता जाग्रतीव रतिप्रदा ।
यद्यथा भासमायातं तत्तथा स्थिरतां गतम् ॥१३॥ (३।६०।३४)
यं यं निश्चयमादत्ते संविदन्तरखण्डितम् ।
तत्तथैवानुभवति प्रत्यक्षमिति सर्वगम् ॥ १४ ॥ (६।१००।३)
यं यं निश्चयमादत्ते संवित्स्वदृढनिश्चया ।
तथा तथा भवत्येषा फलयुक्तस्वभावतः ॥ १५ ॥ (६।१४८।५)
यथायमनुसंधत्ते स्वभावं सम्विदन्वयया ।

तं तथैवानुभवति भवेच्चेद्दृढनिश्चयः ॥ १६ ॥ (३।२१०।७)
मनो मोहमुपश्रादत्ते म्रियते जायते मनः ।
तत्त्वचिन्ताप्रसादेन बध्यते मुच्यते पुनः ॥ १७ ॥ (४।४।६)
ये सर्गा नरकाभोगा या जन्ममरणैषणा ।
स्वमनोमननेनेदं स निष्पन्दोऽपि दुःखदः ॥१८॥ (४।१३।१३)

[७] भावनानुरूपं फलम् :—

दृढभावनया चेतो यद्यथा भावयत्यलम् । (४।२१।५६)
तत्तत्फलं तदाकारं तावत्कालं प्रपश्यति ॥ १ ॥ (४।२१।५७)
न तदस्ति न यत्सत्यं न तदस्ति न यन्मृषा । (४।२१।५७)
यद्यथा येन निर्णीतं तत्तथा तेन लक्ष्यते ॥ २ ॥ (४।२१।५८)
यादृशं भावमादत्ते दृढाभ्यासवशान्मनः ।
तथा स्पन्दाख्यकर्माख्यमथाशाखा विमुञ्चति ॥३॥(४।२१।२०)
तथा क्रियां तत्फलतां निष्पादयति चादरात् ।
ततस्तमेव चास्वादमनुभूयाशु बध्यते ॥ ४ ॥ (४।२१।२१)
यं यं भावमुपादत्ते तं तं वस्त्विति विन्दति ।
तत्तच्छ्रेयोऽन्यन्नास्तीति निश्चयोऽस्य च जायते॥५॥(४।२१।२२)
धर्मार्थकाममोक्षार्थं प्रयतन्ते सदैव हि ।
मनांसि दृढभिन्नानि प्रतिपत्त्या स्वयैव च ॥ ६ ॥ (४।२१।२३)
न निम्बेक्षू कटुस्वादू शीतोष्णौ नेन्दुपावकौ ।
यद्यथा परमाभ्यस्तमुपलब्धं तथैव तत् ॥ ७ ॥ (४।२१।३३)
दृढाभ्यासो य एवास्य जीवस्योदेत्यविघ्नतः ।

सोऽप्यन्तमरसेनापि तमेवाशवनुधावति ॥ ८ ॥ (६।६३।२८)
मनो निर्मलसत्वात्म यद्भावयति यादृशम् ।
तत्तथाशु भवत्येव यथावर्तो भवेत्पयः ॥ ९ ॥ (४।१७।४)
जीवो यद्वासनाबद्धस्तदेवान्तः प्रपश्यति । (४।१७।२६)
भावनैव स्वमात्मानं देहोऽयमिति पश्यति ॥१०॥ (६।६३।३३)
यथावासनया जन्तोर्विषमप्यमृतायते ।
असत्यः सत्यतामेति पदार्थो भावनात्तथा ॥११॥ (३।५६।३१)
यद्यथा भावयत्याशु तत्तथा परिपश्यति । (६।५१।३)
इन्द्रियाणीन्द्रियार्थाख्यं विद्धि सम्वेदनं स्वकम् ॥१२॥(६।५१।४)

[८] अभ्यासप्रशंसा :—

पौनःपुन्येन करणमभ्यास इति कथ्यते ।
पुरुषार्थः स एवेह तेनास्ति न विना गतिः ॥१॥ (६।६७।४३)
योऽभ्यासः प्रकचत्यन्तः शुद्धचिन्नभसो रसात् ।
भवेत्तन्मयमेवान्तराबालमिव लक्ष्यते ॥ २ ॥ (६।६७।२०)
आतिवाहिकदेहोऽयं शुद्धचिद्व्योम केवलम् ।
आधिभौतिकतामेति भावनाभ्यासयोगतः ॥ ३ ॥ (६।६७।३०)
आधिभौतिकदेहोऽसौ धारणाभ्यासभावनात् ।
विहङ्गवत्खमभ्येति पश्याभ्यासविजृम्भितम् ॥४॥ (६।६७।३१)
दुःसाध्याः सिद्धिमायान्ति रिपवो यान्ति मित्रताम् ।
विषाण्यमृततां यान्ति संतताभ्यासयोगतः ॥५॥ (६।६७।३३)
येनाभ्यासः परित्यक्त इष्टे वस्तुनि सोऽधमः ।

कदाचिन्न तदाप्नोति वन्ध्या स्वतनयं यथा ॥६॥ (६।६७।३४)
सर्वस्य जन्तुजातस्य सर्ववस्त्ववभासने ।
सर्वदैवैक एवोच्चैर्जयत्यभ्यासभास्करः ॥ ७ ॥ (६।६७।४१)
दृढाभ्यासाभिधानेन यत्ननाम्ना स्वकर्मणा ।
निजवेदनजेनेव सिद्धिर्भवति नान्यथा ॥ ८ ॥ (६।६७।४४)

[९] मनोनिश्चयप्राबल्यम् :—

न मनोनिश्चयकृतं कश्चिद्रोधयितुं क्षमः ॥ १ ॥ (३।८८।१८)
यो बद्धपदतां यातो जन्तोर्मनसि निश्चयः ।
स तेनैव विना ब्रह्मज्ञान्येन विनिवार्यते ॥ २ ॥ (३।८८।१९)
बहुकालं यदभ्यस्तं मनसा दृढनिश्चयम् ।
शापेनापि न तस्यास्ति क्षयो नष्टेऽपि देहके ॥३॥ (३।८८।२०)
वीरं मनो भेदयितुं मनागपि न शक्यते ।
का नाम ता महाराज कोदृश्यः कस्य शक्तयः ॥४॥ (३।८९।३८)
याभिर्मनांसि भिद्यन्ते दृष्टनिश्चयवन्त्यपि ।
वृद्धिमायातु वा देहो यातु वा विशरारुताम् ॥५॥ (३।८९।३९)
भावितार्थाभिपतितं मनस्तिष्ठति पूर्ववत् ।
इष्टेऽर्थे चिरमाविष्टं दधानं तत्स्थितं मनः ॥ ६ ॥ (३।८९।४०)
भावाभावाः शरीरस्था नृप शक्ता न बाधितुम् ॥७॥ (३।८९।४१)
या यथा चित्प्रकचिता प्रतिपत्तृविदं विना ।
न सा ततः प्रचलति वेदनाभ्यासतः स्वयम् ॥८॥ (३।५४।१९)

[१०] चित्तानुरूपा गतिः :—

या यथैव प्रवृत्ता चित्सा तथैव प्रतिष्ठिता ॥१॥ (३।४०।११)
यथा संवित्तथा चित्तं सा तथावस्थितिं गता ।
परमेण प्रयत्नेन नीयतेऽन्यदशां पुनः ॥ २ ॥ (३।४०।१३)
सर्पैकप्रत्ययो रज्ज्वामसर्पप्रत्यये बलात् ।
निवर्ततेऽन्यथा त्वेष तिष्ठत्येव यथास्थितः ॥३॥ (३।४०।१४)
अन्यत्ववेदनादन्य परस्मादातिवाहिकः ।
ब्रह्मत्ववेदनाद्ब्रह्म सा संवित्तिर्हि नान्यजा ॥४॥ (३।६७।५८)
यावद्वेतालसंकल्पो बालस्य किल विद्यते ।
निर्वेतालधियस्तावदुदयस्तस्य कः कथम् ॥५॥ (३।५३।३१)
अविवेकज्वरोष्णत्वं विद्यते यावदात्मनि ।
तावद्विवेकशीतांशुशैत्यं कुत उदेत्यलम् ॥६॥ (३।५३।३२)

[११] चित्तायत्ते सुखदुःखे :—

चित्तायत्तमिदं सर्वं जगत्स्थिरचरात्मकम् ।
चित्ताधीनवतो राम बन्धमोक्षावपि स्फुटम् ॥१॥ (३।६८।३)
मनः प्रमादाद्वर्धन्ते दुःखानि गिरिकूटवत् ।
तद्वशादेव नश्यन्ति सूर्यस्याग्रे हिमं यथा ॥२॥ (३।६६।४३)
सर्वेषु सुखदुःखेषु सर्वासु कलनासु च ।
मनः कर्तृ मनो भोक्तृ मानसं विद्धि मानवम्॥३॥ (३।११५।२४)
मनः कर्मफलं भुङ्क्ते शुभं वाऽशुभमेव वा । (३।११५।२६)

अतश्चित्तं नरं विद्धि भोक्तारं सुखदुःखयोः ॥४॥ (३।११५।३४)
मनो मोहमुपादत्ते म्रियते जायते मनः ।
तत्स्वचिन्ताप्रसादेन बध्यते मुच्यते पुनः ॥ ५ ॥ (४।४।६)
सर्वेषामेव देहानां सुखदुःखार्थभाजनम् ।
शरीरं मन एवेह नतु मांसमयं मुने ॥ ६ ॥ (४।१३।८)
यस्त्वकृत्रिम आनन्दस्तदर्थं प्रयतैर्नरैः ।
मनस्तन्मयतां नेयं येनासौ समवाप्यते ॥ ७ ॥ (४।२१।३४)

[१२] जीवेच्छाकल्पितं निजं विश्वम् :—

इदं चित्तेच्छयोदेति लीयते तदनिच्छया । (४।४५।३३)
दीर्घस्वप्नं तथैवेदं विद्धि चित्तोपपादितम् ॥१॥ (४।४५।२४)
या येन वासना यत्र सतेवारोपिता यथा ।
सा तेन फलसूस्तत्र तदेव प्राप्यते तथा ॥२॥ (३।९६।१०)
स्वेनैव चित्तरूपेण कर्मणा फलधर्मिणा ।
सङ्कल्पैकशरीरेण नानाविस्तरशालिना ॥ ३ ॥ (३।९६।८)
इदं ततमनेकात्म मायामयमकारणम् ।
विश्वं विगतविन्यासं वासनाकल्पनाकुलम् ॥४॥ (३।९६।९)

[१३] मनसो देहस्य कर्तृत्वम् :—

मनसेदं शरीरं हि वासनार्थं प्रकल्पितम् ।
कृमिकोशप्रकारेण स्वात्मकोश इव स्वयम् ॥१॥ (४।४५।७)
करोति देहं सङ्कल्पात्कुम्भकारो घटं यथा ॥२॥ (४।११।१९)

योऽयं मांसास्थिसङ्घातो दृश्यते पाञ्चभौतिकः ।
मनोविकल्पनं विद्धि न देहः परमार्थतः ॥ ३ ॥ (४।१३।६)
चित्तं हि प्रतिभासात्म यच्च तत्प्रतिभासनम् ।
तदिदं भाति देहादिस्वान्तं नान्यास्ति देहदृक् ॥४॥ (३।६१।२०)
स्वप्नसङ्कल्पजालेन यथान्यैव जगत्स्थितिः ।
तथैवेयं हि सङ्कल्पकलना काचिदेव हि ॥ ५ ॥ (६१।२८।३०)
प्राक्प्रवाहचिराभ्यस्तो वासनातिशयेन यः ।
तथैव दृश्यते देहस्तथाऽऽकृत्युदयेन सः ॥ ६ ॥ (६१।२८।३४)
मनसा भाव्यमानो हि देहतां याति देहकः ।
देहभावनयाऽयुक्तो देहधर्मैर्न बाध्यते ॥ ७ ॥ (३।८६।३)
यन्मयं हि मनो राम देहस्तदनु तद्वशः ।
तत्तामायाति गन्धान्तः पवनो गन्धतामिव ॥८॥ (४।२१।१६)

[१४] रोगाणां मानसी चिकित्सा :—

(अ) आधिव्याधिस्वरूपम् :—

आधयो व्याधयश्चैव द्वयं दुःखस्य कारणम् ।
तन्निवृत्तिः सुखं विद्यात्तत्क्षयो मोक्ष उच्यते ॥१॥ (६१।८१।१२)
देहदुःखं विदुर्व्याधिमाध्याख्यं वासनामयम् ।
मौर्ख्यमूले हि ते विद्यात्तत्त्वज्ञाने परिक्षयः ॥ २ ॥ (६१।८१।१४)
इदं प्राप्तमिदं नेति जाड्याद्वा घनमोहदाः ।
आधयः सम्प्रवर्तन्ते वर्षासु मिहिका इव ॥ ३ ॥ (६१।८१।१६)

भृशं स्फुरन्तीष्विच्छासु मौर्ख्ये चेतस्यनिर्जिते ।
दुरन्नाभ्यवहारेण दुर्देशाक्रमणेन च ॥ ४ ॥ (६।८१।१७)
दुष्कालव्यवहारेण दुष्क्रियास्फुरणेन च ।
दुर्जनासङ्गदोषेन दुर्भावोद्भावनेन च ॥ ५ ॥ (६।८१।१८)
क्षीणत्वाद्वा प्रपूर्णत्वान्नाडीनां रन्ध्रसन्ततौ ।
प्राणे विधुरतां याते काये तु विकलीकृते ॥ ६ ॥ (६.८१।१९)
दौस्स्थित्यकारणं दोषाद्व्याधिर्देहे प्रवर्तते ॥ ७ ॥ (६८१।२०)

(आ) व्याधेः कारणमाधिः :—

चित्ते विधुरिते देहः संक्षोभमनुयात्यलम् । (६।८१।३०)
संक्षोभात्साम्यमुत्सृज्य वहन्ति प्राणवायवः ॥८॥ (६।८१।३२)
असमं वहति प्राणे नाड्यो यान्ति विसंस्थितिम् । (६।८१।३३)
काश्चिन्नाड्यः प्रपूर्णत्वं यान्ति काश्चिच्च रिक्तताम्॥९॥(६।८१।३४)
कुजीर्णत्वमजीर्णत्वमतिजीर्णत्वमेव वा ।
दोषायैव प्रयात्यन्नं प्राणसञ्चारदुष्क्रमात् ॥१०॥ (६।८१।३५)
तथान्नानि नयत्यन्तः प्राणवातः स्वमाश्रयम् । (६।८१।३६)
यान्यन्नानि निरोधेन तिष्ठन्त्यन्तः शरीरके ॥११॥ (६।८१।३७)
तान्येव व्याधितां यान्ति परिणामस्वभावतः । (६।८१।३७)
एवमाधेर्भवेद्व्याधिस्तस्याभावाच्च नश्यति ॥ १२ ॥ (६।८१।३८)

(इ) आधिक्षयेण व्याधयोऽपि क्षीयन्ते:—

आधिक्षयेणाधिभवाः क्षीयन्ते व्याधयोऽप्यलम् । (६।८१।२४)

शुद्धया पुण्यया साधो क्रियया साधुसेवया ॥१३॥ (६/८१।४०)
मनः प्रयाति नैर्मल्यं निकषेणेव काञ्चनम् । (६/८१।४०)
आनन्दो वर्धते देहे शुद्धे चेतसि राघव ॥१४॥ (६/८१।४१)
सत्वशुद्धया वहन्त्येते क्रमेण प्राणवायवः ।
जरयन्ति तथान्नानि व्याधिस्तेन विनश्यति ॥१५॥ (६/८१।४२)
यन्मयं हि मनो राम देहस्तदनु तद्वशः ।
तत्तामायाति गन्धान्तः पवनो गंधतामिव ॥१६॥ (४।२१।१६)

(ई) मंत्रचिकित्सा :—

यथा विरेकं कुर्वन्ति हरीतक्यः स्वभावतः ।
भावनावशतः कार्यं तथा यरलवादयः ॥१७॥ (६/८१।३६)

(उ) साराधिक्षयः :—

द्विविधो व्याधिरस्तीह सामान्यः सार एव च ।
व्यवहारस्तु सामान्यः सारो जन्ममयः स्मृतः॥१८॥ (६/८१।२३)
प्राप्तेनाभिमतेनैव नश्यन्ति व्यावहारिकाः । (६/८१।२४)
आत्मज्ञानं विना सारो नाधिर्नश्यति राघव ॥१६॥ (६/८१।२५)
आधिव्याधिविलासानां राम साराधिसंक्षयः ।
सर्वेषां मूलहा प्रावृणनदीव तटवीरुधाम् ॥२०॥ (६/८१।२६)

(ऊ) कथमनामयं जीवितं स्यात् :—

मनसा भाव्यमानो हि देहतां याति देहकः ।

देहभावनयाऽयुक्तो देहधर्मैर्न बाध्यते ॥ २१ ॥ (३।८६।३)

न मनोनिश्चयकृतं कश्चिद्रोधयितुं क्षमः ॥२२॥ (३।८८।१८)

यन्मनोनिश्चयकृतं तद्द्रव्यौषधिदण्डनैः । (३।६१।४)

हन्तुं न शक्यते जन्तोः प्रतिबिम्बमणेरिव ॥२३॥ (३।६१।५)

पौरुषं स्वमवष्टभ्य धैर्यमालम्ब्य शाश्वतम् ।

यदि तिष्ठत्यगम्योऽसौ दुःखानां तदनिन्दतः ॥२४॥ (३।६२।१४)

पौरुषेण मनः कृत्वा नीरागं विगतज्वरम् ।

माण्डव्येन जिताः क्लेशाः शूलप्रान्तेऽपि तिष्ठता॥२५॥(३।६२।२१)

अन्येऽपि सावधाना ये धीराः सुरमहर्षयः ।

चित्तात्स्वमनुसन्धानं न त्यजन्ति मनागपि ॥२६॥ (३।६२।२४)

आधयो व्याधयश्चैव शापाः पापदृशस्तथा ।

न खण्डयन्ति तच्चित्तं पद्माघाताः शिलामिव ॥२७॥ (३।६२।२५)

भावाभावमयीं चिन्तामीहितानीहितान्विताम् ।

विमृश्यात्मनि तिष्ठामि चिरं जीवाम्यनामयः॥२८॥ (६१।२६।१०)

इदमद्य मया लब्धमिदं प्राप्स्यामि सुन्दरम् ।

इति चिन्ता न मे तेन चिरं जीवाम्यनामयः ॥२६॥ (६१।२६।१२)

प्रशान्तचापलं वीतशोकं स्वस्थं समाहितम् ।

मनो मम मुने शान्तं तेन जीवाम्यनामयः ॥३०॥ (६१।२६।१६)

किमद्य मम सम्पन्नं प्रातर्वा भविता पुनः ।

इति चिन्ताज्वरो नास्ति तेन जीवाम्यनामयः॥३१॥ (६१।२६।१८)

जरामरणदुःखेषु राज्यलाभसुखेषु च ।

न बिभेमि न हृष्यामि तेन जीवाम्यनामयः ॥३२॥ (६।२६।१९)
अयं बन्धुः परश्चायं ममायमयमन्यतः ।
इति ब्रह्मन्न जानामि तेन जीवाम्यनामयः ॥३३॥ (६।२६।२०)
आहरन्विहरन्तिष्ठन्नुत्तिष्ठन्नुच्छ्वसन्स्वपन् ।
देहोऽहमिति नो वेद्मि तेनास्मि चिरजीवितः ॥३४॥ (६।२६।२२)
अपरिचलया शक्त्या सुदृशा स्निग्धमुग्धया ।
ऋजु पश्यामि सर्वत्र तेन जीवाम्यनामयः ॥३५॥ (६।२६।२५)
यत्करोमि यदश्नामि तत्त्यक्त्वा तद्गतोऽपि मे ।
मनो नैष्कर्म्यमादत्ते तेन जीवाम्यनामयः ॥३६॥ (६।२६।२७)
करोमीशोऽपि नाक्रान्तिं परितापे न खेदवान् ।
दरिद्रोऽपि न वाञ्छामि तेन जीवाम्यनामयः ॥३७॥ (६।२६।२९)
जीर्णं भिन्नं श्लथं क्षीणं क्षुब्धं क्षुण्णं क्षयं गतम् ।
पश्यामि नववत्सर्वं तेन जीवाम्यनामयः ॥३८॥ (६।२६।३३)
सुखितोऽस्मि सुखापन्ने दुःखितो दुःखिते जने ।
सर्वस्य प्रियमित्रं च तेन जीवाम्यनामयः ॥३९॥ (६।२६।३४)
आपद्यचलधीरोऽस्मि जगन्मित्रं च सम्पदि ।
भावाभावेषु नैवास्मि तेन जीवाम्यनामयः ॥४०॥ (६।२६।३५)

[१५] चित्ते संस्कृते सति जीवनमानन्दमयं भवति :—

मनः सर्वमिदं राम तस्मिन्नन्तश्चिकित्सिते ।
चिकित्सितो वै सकलो जगज्जालमयो भवेत् ॥१॥ (४।४।५)

अन्तःशीतलतायां तु लब्धायां शीतलं जगत् । (५।५६।३३)
अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् ॥२॥ (५।५६।३४)
न तत्त्रिभुवनैश्वर्यान्न कोशाद्रत्नधारिणः ।
फलमासाद्यते चित्ताद्यन्महत्त्वोपबृंहितात् ॥३॥ (५।२१।१२)
पूर्णे मनसि सम्पूर्णं जगत्सर्वं सुधाद्रवैः ।
उपानद्गूढपादस्य ननु चर्मास्तृतैव भूः ॥४॥ (५।२१।१४)

[१६] शुद्धे चित्ते आत्मा प्रतिबिम्बति :—

सर्वत्र स्थितमाकाशमादर्शे प्रतिबिम्बति ।
यथा तथात्मा सर्वत्र स्थितश्चेतसि दृश्यते ॥ १ ॥ (५।७१।३९)
आकाशोपलकुडयादौ सर्वत्रात्मदृशा स्थिता ।
प्रतिबिम्बमिवादर्शे चित्त एवात्र दृश्यते ॥ २ ॥ (५।७१।३६)
चित्तं वृत्तिविहीनं ते यदा यातमचित्तताम् ।
तदा मोक्षमयीमन्तः सत्तामाप्नोषि तां तताम् ॥ ३ ॥(५।२१।२६)

[१७] मूढमनो यावत्संसारतिमिरम् :—

जडधर्मि मनो यावद्गर्तकच्छपवत्स्थितम् ।
भोगमार्गवदामूढं विस्मृतात्मविचारणम् ॥ १ ॥ (५।५।२७)
तावत्संसारतिमिरं सेन्दुनापि सवह्निना ।
अर्कद्वादशकेनापि मनागपि न भिद्यते ॥ २ ॥ (५।५।२८)

[१८] चित्तं जगन्नाभिः :—

अस्य संसाररूपस्य मायाचक्रस्य राघव ।
चित्तं विद्धि महानाभिं भ्रमतो भ्रमदायिनः ॥१॥ (५।५०।६)
तस्मिद्द्रुतमवष्टब्धे धिया पुरुषयत्नतः ।
गृहीतनाभिवहनान्मायाचक्रं निरुध्यते ॥ २ ॥ (५।५०।७)

६—सिद्धयः ।

१—मनोयोगजाः सिद्धयः :—

मनो निर्मलसत्त्वात्म यद्भावयति यादृशम् ।
तत्तथाशु भवत्येव यथावर्तो भवेत्पयः ॥ १ ॥ (४।१७।४)

(अ) परेषां चित्तस्य ज्ञानम् :—

मलिनं हि मनोऽवीर्यं न मिथः श्लेषमर्हति ।
अयोऽयसि च संतप्ते शुद्धे तप्तं तु लीयते ॥ १ ॥ (४।१७।२६)
चित्ततत्त्वानि शुद्धानि सम्मिलन्ति परस्परम् ।
एकरूपाणि तोयानि यान्त्यैक्यं नाविलानि हि॥२॥(४।१७।३०)
शुद्धिर्हि चित्तस्य विवासनत्व-
मभूतसंवेदनमेकरूपम् ।
तस्याशु शुद्धया भवति प्रबुद्ध-
स्तन्मात्रयुक्त्या परसंगमेति ॥ ३ ॥(४।१७।३१)

(आ) लोकान्तरगमनशक्तिः :—

अप्रबुद्धधियः सिद्धलोकान्पुण्यवशोदितान् ।
न समर्थाः स्वदेहेन प्राप्तुं छाया इवातपान् ॥ ४ ॥ (३।५३।२६)
अतो ज्ञानविवेकेन पुण्येनाथ वरेण च ।
पुण्यदेहेन गच्छन्ति परं लोकमनेन तु ॥ ५ ॥ (३।५३।३४)

तस्माद्ये वेद्यवेत्तारो ये वा धर्मं परं श्रिताः ।
आतिवाहिकलोकांस्ते प्राप्नुवन्तीह नेतरे ॥ ६ ॥ (३।५४।१)
आतिवाहिकतां यातं बुद्धं चित्तान्तरैर्मनः ।
सर्गजन्मान्तरगतैः सिद्धैर्मिलति नेतरत् ॥ ७ ॥ (३।२२।१०)
आतिवाहिकताज्ञानं स्थितिमेष्यति शाश्वतीम् ।
यदा तदा ससंकल्पाँल्लोकान्द्रक्ष्यसि पावनान् ॥ ८ ॥ (३।२२।१२)

(इ) अधिभौतिकभावनायाः प्रतिबन्धकत्वम् :—

आधिभौतिकदेहोऽहमिति यस्य मतिभ्रमः ।
तस्यासावणुरन्ध्रेण गन्तुं शक्नोति नानघ ॥ ९ ॥ (३।४०।८)
अहं पृथ्व्यादिदेहः खे गतिर्नास्ति ममोत्तमा ।
इति निश्चयवान्योऽन्तः कथं स्यात्सोऽन्यनिश्चयः॥१०॥(३।५३।३३)
यत्र स्वसंकल्पपुरं स्वदेहेन न लभ्यते ।
तत्रान्यसंकल्पपुरं देहोऽन्यो लभते कथम् ॥११॥ (३।२१।४३)

(ई) आतिवाहिकतानुभवः :—

तस्यैवाभ्यसतोऽप्येति साधिभौतिकतामतिः ।
यदा शाम्यति सैवास्य तदा पूर्वा प्रवर्तते ॥ १२ ॥ (३।५७।३०)
तदा गुरुत्वं काठिन्यमिति यश्च मुधा ग्रहः ।
शाम्येत्स्वप्ननरस्येव बोद्धुर्बोधान्निरामयात् ॥ १३ ॥ (३।५७।३१))
लघुतूलसमापत्तिस्ततः समुपजायते ।
स्वप्ने स्वप्नपरिज्ञानादिव देहस्य योगिनः ॥ १४ ॥ (३।५७।३२)

स्वप्ने स्वप्नपरिज्ञानाद्यथा देहो लघुर्भवेत् ।
तथा बोधादयं देहः स्थूलवत्प्लुतिमान्भवेत् ॥१५॥ (३।५७।३३)
रूढातिवाहिकदृशः प्रशाम्यत्याधिभौतिकः ।
बुधस्य दृश्यमानोऽपि शरन्मेघ इवाम्बरे ॥ १६ ॥ (३।५८।१४)
रूढातिवाहिकीभावः सर्वो भवति देहकः ।
निर्जलाम्भोदसदृशो निर्गन्धकुसुमोपमः ॥ १७ ॥ (३।५८।१५)
सद्वासनस्य रूढायामातिवाहिकसंविदि ।
देहो विस्मृतिमायाति गर्भसंस्थेव यौवने ॥ १८ ॥ (३।५८।१६)
वासनातानवं नूनं यदा ते स्थितिमेष्यति ।
तदातिवाहिको भावः पुनरेष्यति देहके ॥ १९ ॥ (३।२१।५६)
यथा सत्यपरिज्ञानाद्रज्ज्वां सर्पो न दृश्यते ।
तथातिवाहिकज्ञानाद्दृश्यते नाधिभौतिकः ॥२०॥ (३।२१।६०)
स्वप्नसंकल्पदेहान्ते देहोऽयं चेत्यते यथा ।
तथा जाग्रद्भावनान्ते उदेत्येवातिवाहिकः ॥ २१ ॥ (३।२२।३)
शुद्धसत्वानुपतितं चेतः प्रतनुवासनम् ।
आतिवाहिकतामेति हिमं तापादिवाम्बुताम् ॥ २२ ॥ (३।२२।९)
अवबोधघनाभ्यासाद्देहस्यास्यैव जायते ।
संसारवासनाकार्श्ये नूनं चित्तशरीरता ॥ २३ ॥ (३।२२।१७)

(उ) अणुत्वप्राप्तौ ज्ञानयुक्तिः :—

असत्यमेव संकल्पभ्रमेणेदं शरीरकम् ।
जीवः पश्यति मूढात्मा बालो यक्षमिवोद्धतम् ॥२४॥ (६।८२।१७)

यदा तु ज्ञानदीपेन सम्यगालोक आगतः ।
संकल्पमोहो जीवस्य क्षीयते शरदभ्रवत् ॥ २५ ॥ (६।८२।१८)
शान्तिमायाति देहोऽयं सर्वसंकल्पसंक्षयात् ।
तदा राघव निःशेषं दीपस्तैलक्षये यथा ॥ २६ ॥ (६।८२।१९)
निद्राव्यपगमे जन्तुर्यथा स्वप्नं न पश्यति ।
जीवो हि भाविते सत्ये तथा देहं न पश्यति ॥२७॥ (६।८२।२०)
अतत्त्वे तत्त्वभावेन जीवो देहावृतः स्थितः ।
निर्देहो भवति श्रीमान् सुखी तत्त्वैकभावनात् ॥२८॥ (६।८२।२१)
अन्ये च विदितात्मानो भावयन्ति यथैव यत् ।
तत्तथैवाशु पश्यन्ति दृढभावनया तथा ॥ २९ ॥ (६।८२।२४)
एवं यथा यदेवेह भाव्यते दृढभावनात् ।
भूयते हि तदेवाशु तदित्यालोकितं मुहुः ॥ ३० ॥ (६।८२।२६)
सत्यभावनदृष्टोऽयं देहो देहो भवत्यलम् ।
दृष्टस्त्वसत्यभावेन व्योमतां याति देहकः ॥३१॥ (६।८२।२७)

२—कुण्डलिनीयोगसाध्याः सिद्धयः :—

[१] कुण्डलिनी :—

परिमण्डलिताकारा मर्मस्थानं समाश्रिता ।
आन्त्रवेष्टनिका नाम नाडी नाडीशताश्रिता ॥१॥ (६।८०।३६)
वीणाग्रावर्तसदृशी सलिलावर्तसन्निभा ।
लिप्याद्योंकारसंस्थाना कुण्डलावर्तसंस्थिता ॥२॥ (६।८०।३७)

देवासुरमनुष्येषु मृगनक्रखगादिषु ।
कीटादिष्वब्जजान्तेषु सर्वेषु प्राणिषूदिता ॥ ३ ॥ (६।८०।३८)
शीतार्तसुप्तभोगीन्द्रभोगवद्धद्धमण्डला ।
सिता कल्पाग्निविगलदिन्दुवद्धद्धकुण्डली ॥ ४ ॥ (६।८०।३९)
उरोर्भ्रूमध्यरन्ध्राणि स्पृशन्ती वृत्तिचञ्चला ।
अनारतं च सस्पन्दा पवमानेव तिष्ठति ॥ ५ ॥ (६।८०।४०)
तस्यास्त्वभ्यन्तरे तस्मिन्कदलीकोशकोमले ।
या परा शक्तिः स्फुरति वीणावेगलसद्गतिः ॥६॥ (६।८०।४१)
सा चोक्ता कुण्डलीनाम्ना कुण्डलाकारवाहिनी ।
प्राणिनां परमा शक्तिः सर्वशक्तिजवप्रदा ॥ ७ ॥ (६।८०।४२)
अनिशं निःश्वसद्रूपा रुषितेव भुजंगमी ।
संस्थितोर्ध्वीकृतमुखी स्पन्दनाहेतुतां गता ॥ ८ ॥ (६।८०।४३)
यदा प्राणानिलो याति हृदि कुण्डलिनीपदम् ।
तदा संविदुदेत्यन्तर्भूततन्मात्रबीजभूः ॥ ९ ॥ (६।८०।४४)
यथा कुण्डलिनी देहे स्फुरत्यब्ज इवालिनी ।
तथा संविदुदेत्यन्तर्मृदुस्पर्शवशोदया ॥ १० ॥ (६।८०।४५)
स्पर्शनं मृदुनान्योन्यालिङ्गिका तत्र यन्त्रयोः ।
यथा संविदुदेत्युच्चैस्तथा कुण्डलिनी जवात् ॥११॥ (६।८०।४६)
तस्यां समस्ताः सम्बद्धा नाड्यो हृदयकोशगाः ।
उत्पद्यन्ते विलीयन्ते महार्णव इवापगाः ॥ १२ ॥ (६।८०।४७)
नित्यं पातोत्सुकतया प्रवेशोन्मुखया तया ।
सा सर्वसंविदां बीजं प्रोक्ता सामान्युदाहृता ॥१३॥ (६।८०।४८)

एतत्पञ्चकबीजं तु कुण्डलिन्यां तदन्तरे ।
प्राणमारुतरूपेण तस्यां स्फुरति सर्वदा ॥ १४ ॥ (६।८१।१)
सान्तः कुण्डलिनीस्पन्दस्पर्शसंवित्कलामला ।
कलोक्ता कलनेनाशु कथिता चेतनेन चित् ॥१५॥ (६।८१।२)
जीवनाज्जीवतां याता मननाच्च मनः स्थिता ।
संकल्पाच्चैव संकल्पा बोधाद्बुद्धिरिति स्मृता ॥१६॥ (६।८१।३)
अहंकारात्मतां याता सैषा पुर्यष्टकाभिधा ।
स्थिता कुण्डलिनी देहे जीवशक्तिरनुत्तमा ॥१७॥ (६।८१।४)
आपानतामुपागत्य सततं प्रवहत्यधः ।
समाना नाभिमध्यस्था उदानाख्योपरि स्थिता ॥१८॥ (६।८१।५)
अधस्त्वपानरूपैव मध्ये सौम्यैव सर्वदा ।
पुष्टाप्युदानरूपैव पुंसः स्वस्थैव तिष्ठति ॥१९॥ (६।८१।६)
सर्वयत्नमधो याति यदि यत्नान्न धार्यते ।
तत्पुमान्मृतिमायाति तया निर्गतया बलात् ॥२०॥ (६।८१।७)
समस्तैवोर्ध्वमायाति यदि युक्त्या न धार्यते ।
तत्पुमान्मृतिमायाति तया निर्गतया बलात् ॥२१॥ (६।८१।८)
सर्वथात्मनि तिष्ठेच्चेत्त्यक्त्वोर्ध्वाधो गमागमौ ।
तज्जन्तोर्हीयते व्याधिरन्तर्मारुतरोधतः ॥२२॥ (६।८१।९)
पुर्यष्टकपराख्यस्य जीवस्य प्राणनामिकाम् ।
विद्धि कुण्डलिनीमन्तरामोदस्येव मञ्जरीम् ॥२३॥ (६।८१।४४)
काष्ठक्रकचयोः श्लेषाद्यथा छेदः प्रवर्तते ।
द्वयोः संघर्षणादग्निः स्वभावाज्जायते तथा ॥२४॥(६।८१।६२)

मांसं कुयन्त्रजठरे स्थितं श्लिष्टमुखं मिथः ।
ऊर्ध्वाधःसंमिलत्स्थूलद्वयम्भःस्थैरिव वैतसम् ॥२५॥ (६।८१।६३)
तस्य कुण्डलिनी लक्ष्मीर्निलीनान्तर्निजास्पदे ।
पद्मरागसमुद्गस्य कोशे मुक्तावली यथा ॥ २६ ॥ (६।८१।६४)
आवर्तफलमालेव नित्यं सलसलायते ।
दण्डाहतेव भुजगी समुन्नतिविवर्तिनी ॥ २७ ॥ (६।८१।६५)
द्यावापृथिव्योर्मध्यस्था क्रियेव स्पन्दधर्मिणी ।
संविन्मधुविबोधार्कौ हृत्पद्मपुटषट्पदी ॥ २८ ॥ (६।८१।६६)
तत्सर्वं शक्तिपद्मादि बाह्येनाभ्यन्तरैस्तथा ।
हृदि व्याधूयते वातैः पत्रवृन्दमिवाभितः ॥२९॥ (६।८१।६७)
यद्वद्व्योम स्फुरत्यङ्ग स्वभावात्तत्र वायवः ।
बलवन्मृदु यत्किञ्चिद्भृशं कवलयन्ति तत् ॥३०॥ (६।८१।६८)
वातैराहन्यमानं तत्पद्मादि तरलायते ।
हृद्यन्यान्येति कार्येण पल्लवादि यथा तरोः ॥३१॥ (६।८१।६९)
देहेष्वाजरणं सर्वरसानां पवनोऽन्वहम् ।
जनयत्यग्निमन्योन्यसंघर्षाद्वनवेणुवत् ॥ ३२ ॥ (६।८१।७०)
स्वभावशीतवातात्मा देहस्तेनौष्ण्यमेत्यथ ।
उदितेन स सर्वाङ्गे भुवनं भानुना यथा ॥३३॥ (६।८१।७१)
सर्वतो विचरेद्रश्मिस्तत्तेजस्तारकाकृति ।
हृत्पद्महेमभ्रमरो योगिनां चिन्त्यतां गतम् ॥३४॥ (६।८१।७२)
तत्प्रकाशमयं ज्ञानं चिन्तितं सत्प्रयच्छति ।
येन योजनलक्षस्थं वस्तु नित्यं हि दृश्यते ॥३५॥ (६।८१।७३)

[२] योगिनां देहोऽणुतां स्थूलतां च कथं गच्छति :—

(अ) अणुत्वप्राप्तये देहस्य विलापनम् :—

हृद्यब्जचक्रकोशोर्ध्वं प्रस्फुरत्यानलः कणः ।
हेमभ्रमरवत्सांध्यविद्युल्लव इवाम्बुदे ॥ १ ॥ (६।८२।२)
स प्रवर्धनसम्बित्त्या वात्ययेवाशु वर्धते ।
संविद्रूपतया नूनमर्कवद्याति चोदयम् ॥ २ ॥ (६।८२।३)
संध्याभ्रमथमार्काभो वृद्धिमभ्यागतः क्षणात् ।
गालयत्यखिलं साङ्गं देहं हेम यथाऽनलः ॥ ३ ॥ (६।८२।४)
जलस्पर्शासहो युक्त्या गलयेत्सपदादपि ।
बाह्य एवानलस्पर्शात्स्वान्ते वस्तुविशेषतः ॥ ४ ॥ (६।८२।५)
स शरीरद्वयं पश्चाद्विधूय कापि लीयते ।
विक्षोभितेन प्राणेन नीहारो वात्यया यथा ॥ ५ ॥ (६।८२।६)
आधारनाडीनिर्हीना व्योमस्थैवावशिष्यते ।
शक्तिः कुण्डलिनी वह्नेर्धूमलेखेव निर्गता ॥ ६ ॥ (६।८२।७)
क्रोडीकृतमनोबुद्धिमयजीवाद्यहंकृतिः ।
अन्तःस्फुरच्चमत्कारा धूमलेखेव नागरी ॥ ७ ॥ (६।८२।८)
बिसे शैले तृणे भित्तावुपले दिवि भूतले ।
सा यथा योज्यते यत्र तेन निर्यात्यलं तथा ॥८॥ (६।८२।९)

(आ) स्थूलीभावेनैच्छिकनानाशरीरकल्पनाः :—

संवित्तिः सैव यात्यङ्ग रसाद्यन्तं यथाक्रमम् ।

रसेनापूर्णतामेति तन्त्रीभार इवाम्बुना ॥ ९ ॥ (६।८२।१०)
रसापूर्णा यमाकारं भावयत्याशु तत्तथा ।
धत्ते चित्रकृतो बुद्धौ रेखा राम यथा कृतिम् ॥१०॥ (६।८२।११)
दृढभावशादन्तरस्थीन्याप्नोति सा ततः ।
मातृगर्भनिषण्णेषु सुसूक्ष्मेवाङ्कुरस्थितिः ॥११॥ (६।८२।१२)
यथाभितमाकारं प्रमाणं वेत्ति राघव ।
जीवशक्तिरवाप्नोति सुमेर्वादि तृणादि च ॥१२॥ (६।८२।१३)

(इ) प्राणादिपवनायासजन्याः सिद्धयः :—

अन्तस्था ह्यखिलास्त्यक्त्वा साध्यार्थेतरवासनाः ।
गुदादिद्वारसंकोचान्स्थानकादिक्रियाक्रमैः ॥१३॥ (६।८०।३१)
भोजनासनशुध्द्या च साधुशास्त्रार्थभावनात् ।
स्वाचारात्सुजनासंगात्सर्वत्यागात्सुखासनात् ॥१४॥ (६।८०।३२)
प्राणायामघनाभ्यासाद्राम कालेन केनचित् ।
कोपलोभादिसंत्यागाद्भोगत्यागाच्च सुव्रत ॥१५॥ (६।८०।३३)
त्यागादाननिरोधेषु भृशं यान्ति विधेयताम् ।
प्राणाः प्रभुत्वात्तज्ज्ञस्य पुंसो भृत्या इवाखिलाः ॥१६॥ (६।८०।३४)
राज्यादिमोक्षपर्यन्ताः समस्ता एव सम्पदः ।
देहानिलविधेयत्वात्साध्याः सर्वस्य राघव ॥१७॥ (६।८०।३३)

(ई) कुण्डलिनीयोगजन्याः सिद्धयः :—

तां यदा पूरकाभ्यासादापूर्य स्थीयते समम् ।

तदैति मैरवं स्थैर्यं कायस्य पीनता तथा ॥१८॥ (६।८१।४५)
यदा पूरकपूर्णान्तरायतप्राणमारुतम् ।
नीयते संविदेवोर्ध्वं सोढुं घर्मक्रमश्रमम् ॥१९॥ (६।८१।४६)
सर्पीव त्वरितैवोर्ध्वं याति दण्डोपमां गता ।
नाडीः सर्वाः समादाय देहबद्धा लतोपमाः ॥२०॥ (६।८१।४७)
तदा समस्तमेवेदमुत्प्लावयति देहकम् ।
नीरन्ध्रं पवनापूर्णां भस्त्रेवाम्बुततान्तरम् ॥ २१ ॥ (६।८१।४८)
इत्यभ्यासविलासेन योगेन व्योमगामिना ।
योगिनः प्राप्नुवन्त्युच्चैर्दीना इन्द्रदशामिव ॥२२॥ (६।८१।४९)
ब्रह्मनाडीप्रवाहेण शक्तिः कुण्डलिनी यदा ।
बहिरूर्ध्वं कपाटस्य द्वादशाङ्गुलमूर्धनि ॥ २३ ॥ (६।८१।५०)
रेचकेन प्रयोगेण नाड्यन्तरनिरोधिना ।
मुहूर्तं स्थितिमाप्नोति तदा व्योमगदर्शनम् ॥२४॥ (६।८१।५१)
न केचन महाबाहो भूचरेण नभस्वतः ।
अदिव्येनाश्रिता ज्ञानैर्दृश्यन्ते पुरुषेन्द्रियैः ॥२५॥ (६।८१।५३)
विज्ञानाद्दूरसंस्थेन बुद्धिनेत्रेण राघव ।
दृश्यन्ते व्योमगाः सिद्धाः स्वप्नवत्स्वार्थदा अपि ॥२६॥ (६।८१।५४)
स्वप्नावलोकनं यद्वत्तद्वत्सिद्धावलोकनम् ।
केवलोऽथ विशेषोऽयं सिद्धप्राप्तौ स्थिरार्थता ॥२७॥ (६।८१।५५)
मुखाद्बहिर्द्वादशान्ते रेचकाभ्यासयुक्तितः ।
प्राणे चिरं स्थितिं नीते प्रविशत्यपरां पुरीम् ॥ २८ ॥ (६।८१।५६)
रेचकाभ्यासयोगेन जीवः कुण्डलिनीगृहात् ।

उद्धृत्य योज्यते यावदामोदः पवनादिव ॥२९॥ (६।८२।२९)
त्यजते विरतस्पन्दो देहोऽयं काष्ठलोष्टवत् ।
देहेऽपि जीवेऽपि मतावासेचक इवादरः ॥ ३० ॥ (६।८२।३०)
स्थावरे जङ्गमे वापि यथाभिमतयेच्छया ।
भोक्तुं तत्संपदं सम्यग्जीवोऽन्तर्विनिवेश्यते ॥ ३१ ॥ (६।८२।३१)
इति सिद्धिश्रियं भुक्त्वा स्थितं चेत्तद्वपुः पुनः ।
प्रविश्यते स्वमन्यद्वा यद्यत्तात विरोचते ॥ ३२ ॥ (६।८२।३२)
देहादयस्तथा बिम्बान्व्याप्तवत्याखिलानथ ।
संविदा जगदापूर्य संपूर्णां स्थीयतेऽथवा ॥ ३३ ॥ (६।८२।३३)



७—आत्मा

[१] जाग्रत्स्वप्नसुषुप्तयः :—

जाग्रत्स्वप्नसुषुप्ताख्यं त्रयं रूपं हि चेतसः ॥ १ ॥ (६।१२४।३६)
घोरं शान्तं च मूढं च आत्मचित्तमिहास्थितम् ।
घोरं जाग्रन्मयं चित्तं शान्तं स्वप्नमयं स्थितम् ॥२॥ (६।१२४।३७)
मूढं सुषुप्तभावस्थं त्रिभिर्हीनं मृतं भवेत् ।
यच्च चित्तं मृतं तत्र सत्त्वमेकं स्थितं समम् ॥३॥ (६।१२४।३८)

(१) जाग्रत् :—

जीवधातुः शरीरेऽन्तर्विद्यते येन जीव्यते ।
तेजो वीर्यं जीवधातुरित्याद्यभिधमङ्ग यत् ॥ १ ॥ (४।१९।१५)
व्यवहारी यदा कायो मनसा कर्मणा गिरा ।
भवेत्तदा मरुन्नुन्नो जीवधातुः प्रसर्पति ॥ २ ॥ (४।१९।१६)
तस्मिन्प्रसर्पत्यङ्गेषु सर्वा संविदुदेति हि ।
दृष्टत्वात्प्रैति चित्ताख्यमन्तर्लीनजगद्भ्रमम् ॥३॥ (४।१९।१७)
ईक्षणादिषु रन्ध्रेषु प्रसरन्ती बहिर्मयम् ।
नानाकारविकाराढ्यं रूपमात्मनि पश्यति ॥ ४ ॥ (४।१९।१८)
स्थिरत्वात्तत्तथैवाथ जाग्रदित्यवगम्यते ॥ ५ ॥ (४।१९।१९)

(२) सुषुप्तिः :—

मनसा कर्मणा वाचा यदा क्षुभ्यति नो वपुः ।
शान्तात्मा तिष्ठति स्वस्थो जीवधातुस्तदा त्वसौ ॥६॥ (४।१९।२०)
समतामागतैर्वातैः क्षोभ्यते न हृदम्बरे ।
निर्वातसदने दीपो यथाऽऽलोकैककारकः ॥ ७ ॥ (४।१९।२१)
ततः सरति नाङ्गेषु संवित्क्षुभ्यति तेन नो ।
न चेक्षणादीन्यायाति रन्ध्राण्यायाति नो बहिः ॥८॥ (४।१९।२२)
जीवोऽन्तरेव स्फुरति तैलसंविद्यथा तिले ।
शीतसंविद्धिम इव स्नेहसंविद्यथा घृते ॥ ९ ॥ (४।१९।२३)
जीवाकारा कला काचिच्चितिः स्वच्छतयात्मनि ।
दशामायाति सौषुप्तिं सौम्यवातां विचेतनाम् ॥१०॥ (४।१९।२४)

(३) स्वप्नः :—

सुषुप्ते सौम्यतां यातैः प्राणैः सञ्चाल्यते यदा ।
स जीवधातुः सा संवित्ततश्चित्ततयोदिता ॥११॥ (४।१९।२६)
स्वान्तःसंस्थजगज्जालं भावाभावैः क्रमभ्रमैः ।
पश्यति स्वान्तरेवाशु स्फारं बीज इव द्रुमम् ॥१२॥ (४।१९।२७)
जीवधातुर्यदा वातैः किञ्चित्संक्षुभ्यते भृशम् ।
ततोऽस्म्यहं सुप्त इति पश्यत्यात्मनि खे गतिम् ॥१३॥ (४।१९।२८)
यदाम्भसा प्लाव्यतेऽसौ तदा वार्यादिसम्भ्रमम् ।
अन्तरेवानुभवति स्वामोदं कुसुमं यथा ॥ १४ ॥ (४।१९।२९)

यदा पित्तादिनाक्रान्तस्तदा ग्रीष्मादिसम्भ्रमम् ।
अन्तरेवानुभवति स्फारं बहिरिवाखिलम् ॥१५॥ (४।१९।३०)
रक्तापूर्णो रक्तवर्णान्देशान्कालान्बहिर्यथा ।
पश्यत्यनुभवात्मत्वात्तत्रैव च निमज्जति ॥ १६ ॥ (४।१९।३१)
सेवते वासनां यां तां सोऽन्तः पश्यति निद्रितः ।
पवनक्षोभितो रन्ध्रैर्बहिरक्ष्यादिभिर्यथा ॥ १७ ॥ (४।१९।३२)
अनाक्रान्तेन्द्रियच्छिद्रो यतः क्षुब्धोऽन्तरेव सः ।
संविदानुभवत्याशु स स्वप्न इति कथ्यते ॥ १८ ॥ (४।१९।३३)

[२] तुर्यावस्था :—

अहंभावानहंभावौ त्यक्त्वा सदसती तथा ।
यदसक्तं समं स्वच्छं स्थितं तत्तुर्यमुच्यते ॥१९॥ (६।१२४।२३)
या स्वच्छा समता शान्ता जीवन्मुक्तव्यवस्थितिः ।
साक्ष्यवस्था व्यवहृतौ सा तुर्यकलनोच्यते ॥२०॥(६।१२४।२४)
नैतज्जाग्रन्न च स्वप्नं सङ्कल्पानामसम्भवात् ।
सुषुप्तभावो नाप्येतदभावाज्जडता स्थितेः ॥२१॥(६।१२४।२५)
शान्तं सम्यक्प्रबुद्धानां यथा स्थितमिदञ्जगत् ।
विलीनं तुर्यमेवाहुरबुद्धानां स्थिरं स्थितम् ॥२२॥(६।१२४।२६)
अहङ्कारकलात्यागे समतायाः समुद्भवे ।
विशरारौ कृते चित्ते तुर्यावस्थोपतिष्ठते ॥२३॥ (६।१२४।२७)
निर्विकल्पा हि चित्तुर्यं तदेवास्तीह नेतरत् ॥२४॥(६।१२४।३६)

(३) अहंभावचतुष्टयम् ।

(१) देहोऽहमिति :—

आपादमस्तकमहं मातापितृविनिर्मितः ।
इत्येको निश्चयो राम बन्धायासद्विलोकनात् ॥१॥ (५।१७।१४)
देहोऽहमिति तां विद्धि दुःखायैव न शान्तये । (५।७३।११)
वर्ज्य एव दुरात्मासौ शत्रुरेव परः स्मृतः ॥२॥ (४।३३।५४)
अनेनाभिहतो जन्तुर्न भूयः परिरोहति ।
रिपुणानेन बलिना विविधाधिप्रदायिना ॥ ३ ॥ (४।३३।५५)

(२) चित्तोऽहमिति :—

स्वसङ्कल्पमयाकारं यावत्संसारभावि यत् ।
चित्तं तद्विद्धि जीवस्य रूपं रामातिवाहिकम् ॥४॥ (६।१२४।१६)

(३) सकलातीतोऽहमिति :—

अतीतः सर्वभावेभ्यो बालाग्रादप्यहं तनुः ।
इति तृतीयो मोक्षायतृनिश्चयो जायते सताम् ॥५॥(५।१७।१५)
परोऽणु सकलातीतरूपोऽहं चेत्यहंकृतिः । ।(५।७३।१०)
सर्वस्माद्व्यतिरिक्तोऽहं वालाग्रशतकल्पितः ॥६॥ (४।३३।५१)

(अ) कथं सर्वातीतोऽहम् :—

देहस्तावज्जडो मूढो नाहमित्येव निश्चयः । (६।७८।१७)

आबालमेतत्संसिद्धं मतौ चैवानुभूयते ॥ ७ ॥ (६।७८।१८)
कर्मेन्द्रियगणश्चास्मादभिन्नावयवात्मकः । (६।७८।१८)
अवयवावयविनोर्न भेदो जड एव च ॥ ८ ॥ (६।७८।१९)
प्रेर्यते मनसा यस्माद्यष्ट्येव भुवि लोष्टकः ॥९॥ (६।७८।२०)
मनश्चैवं जडं मन्ये सङ्कल्पात्मकशक्ति यत् । (६।७८।२०)
क्षेपणैरिव पाषाणाः प्रेर्यते बुद्धिनिश्चयैः ॥१०॥ (६।७८।२१)
बुद्धिर्निश्चयरूपैवं जडा सत्तैव निश्चयः । (६।७८।२१)
खातेनेव सरिन्नूनं साहङ्कारेण वाह्यते ॥११॥ (६।७८।२२)
अहङ्कारोऽपि निःसारो जड एव शवात्मकः (६।७८।२२)
जीवेन जन्यते यत्नो बालेनेव भ्रमात्मकः ॥१२॥ (६।७८।२३)
जीवश्च चेतनाकाशो वातात्मा हृदये स्थितः । (६।७८।२३)
सुकुमारोऽन्तरन्येन केनापि परिजीवति ॥१३॥ (६।७८।२४)
जीवो जीवति जीर्णेन चिद्रूपेणात्मरूपिणा ।
चेत्यभ्रमवता जीवश्चिद्रूपेणैव जीवति ॥ १४ ॥ (६।७८।२५)
सद्वासद्वा यदाभाति चित्समाधौ सति स्वतः । (६।७८।२७)
स्वरूपमलमुत्सृज्य तदेव भवति क्षणात् ॥१५॥ (६।७८।२८)
एवं चिद्रूपमप्येतच्चेत्योन्मुखतया स्वयम् । (६।७८।२८)
जडं शून्यमसत्कल्पं चैतन्येन प्रबोध्यते ॥१६॥ (६।७८।२९)
एते हि चिद्विलासान्ता मनोबुद्धीन्द्रियादयः । (६।७८।३१)
असन्तः सर्व एवाहो द्वितीयेन्दुपदस्थिताः ॥१७॥(६।७८।३२)
महाचिदेकैवास्तीह महासत्तेति योच्यते । (६।७८।३२)
निष्कलङ्का समा शुद्धा निरहङ्काररूपिणी ॥१८॥ (६।७८।३३)

शुद्धसंवेदनाकारा शिवं सन्मात्रमच्युतम् । (६।७८।३३)
सकृद्विभाता विमला नित्योदयवती सदा॥१९॥ (६।७८।३४)

(आ) शरीरात्मनोः सम्बन्धाभावः :—

नात्मा शरीरसम्बन्धी शरीरमपि नात्मनि ।
मिथो विलक्षणावेतौ प्रकाशतमसी यथा ॥२०॥ (६।६।६)
देहेनास्य न सम्बन्धो मनागेवामलात्मनः ।
हेम्नः पङ्कलवेनेव तद्गतस्यापि मानवाः ॥२१॥ (५।५।२५)
पृथगात्मा पृथग्देहो जलपद्मलवोपमौ । (५।५।२६)
मनागपि न संश्लेषः सर्वगस्यापि देहिनः ॥२२॥ (६।६।१३)
तद्गतस्याप्यतद्वृत्तेरम्बरस्येव वायुतः ।
जरामरणमापच्च सुखदुःखे भवाभवौ ॥ २३ ॥ (६।६।१५)
मनागपि न सन्तीह तस्मात्त्वं निर्वृतो भव ॥२४॥ (६।६।१६)

(इ) आत्मनः सर्वत्रवर्तमानत्वेऽपि पुर्यष्टक एव स्फुरणम् :—

संस्थितः स हि सर्वत्र त्रिषु कालेषु भास्करः ।
सूक्ष्मत्वात्सुमहत्वाच्च केवलं न विभाव्यते ॥२५॥ (५।७३।२०)
सति पुर्यष्टके तस्मिञ्जीवः स्फुरति नोपले । (५।७३।२४)
सर्वमात्ममयं विश्वं नास्त्यनात्ममयं क्वचित् ॥२६॥ (५।७२।४५)

(४) अहं सर्वमिदं विश्वमिति :—

अहं जगद्वा सकलं शून्यं व्योमसमं सदा ।

एवमेष चतुर्थोऽन्यो निश्चयो मोक्षसिद्धये ॥२७॥ (५।१७।१७)
अहं खमहमादित्यो दिशोऽहमहमप्यधः ।
अहं दैत्या अहं देवा लोकाश्चाहमहं महः ॥२८॥ (५।७३।३)
अहं तमोऽहमभ्राणि भूः समुद्रादिकं त्वहम् ।
रजो वायुरथाग्निश्च जगत्सर्वमिदं त्वहम् ॥ २९ ॥(५।७३।४)
अहं चिदम्बरे भानावहं चिद्भूतपञ्जरे ।
सुरासुरेषु चिदहं स्थावरेषु चरेषु च ॥ ३० ॥ (५।२७।१२)
कुसुमेष्वहमामोदः पुष्पपत्रेष्वहं छविः ।
छविष्वहं रूपकला रूपेष्वनुभवोऽप्यहम् ॥३१॥ (५।३४।५२)
अपारपर्यन्तनभो दिक्कालादिक्रियान्वितम् ।
अहमेवेति सर्वत्र यः पश्यति स पश्यति ॥३२॥ (४।२२।२५)
सर्वशक्तिरनन्तात्मा सर्वभावान्तरस्थितः ।
अद्वितीयश्चिदित्यन्तर्यः पश्यति स पश्यति ॥ ३३ ॥ (४।२२।२८)
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
चित्तं तु नाहमेवेति यः पश्यति स पश्यति ॥३४॥(४।२२।३१)
यन्नाम किञ्चित्त्रैलोक्यं स एवावयवो मम ।
तरङ्गोऽब्धाविवेत्यन्तर्यः पश्यति स पश्यति ॥३५॥ (४।२२।३३)

८—मृतिः

[१] मरणं न भयावहम् :—

(अ) उपचयो महान् :—

मृतिरत्यन्तनाशश्चेत्तद्भवामयसंक्षयः । (६/२।१०१।२६)
मृतश्चेन्न भवेद्भूयः सोऽत्राप्युपचयो महान् ॥१॥ (६/२।१०१।२३)
भावाभावग्रहोत्सर्गज्वरः प्रशममागतः । (६/२।१०१।२३)
मरणं जीवितं तस्मान्न दुःखं न सुखं यतः ॥२॥ (६/२।१०१।२४)

(आ) उत्सवो वा :—

मृतस्य देहलाभश्चेन्नव एव तदुत्सवः ।
मृतिर्नाशो हि देहस्य सा मृतिः परमं सुखम् ॥३॥(६/२।१०१।२५)
देहाद्देहान्तरप्राप्तौ नव एव महोत्सवः ।
मरणात्मनि किं मूढा हर्षस्थाने विषीदथः ॥४॥ (६/२।१०१।२२)

[२] मृतिस्वरूपम् :—

मरणं सर्वनाशात्म न कदाचन विद्यते ॥ ५ ॥ (६/२।१८।१)
मृतो नष्ट इति प्रोक्तो मन्ये तच्च मृषा ह्यसत् । (५।७१।६४)
स देशकालान्तरितो भूत्वा भूत्वानुभूयते ॥६॥ (५।७१।६५)
स्वसङ्कल्पान्तरस्थैर्यं मृतिरित्यभिधीयते । (६/२।१८।१)

वासनावस्थितो जीवो यात्युत्सृज्य शरीरकम् ॥७॥(५।७१।६७)
अन्यस्मिन्वितते देशे कालेऽन्यस्मिंश्च राघव । (५।७१।६८)
इतश्चेतश्च नीयन्ते जीवा वासनया स्वया ॥८॥ (५।७०।६९)
स्वप्नद्रष्टा यथा स्वप्नसंसारे मृतिमाप्तवान् ।
अन्यं जाग्रन्मयं स्वप्नं द्रष्टुं भूयः स जायते ॥९॥ (६/२।१०५।२४)
इह जाग्रन्मृतो जन्तुः प्रबुद्धोऽन्यत्र कथ्यते । (६/२।१०५।२९)
मृत्वान्यत्र प्रबुद्धस्य जाग्रत्स्वप्नो भवत्यलम् ॥१०॥(६/२।१०५।३०)
अनुभूय क्षणं जीवो मिथ्यामरणमूर्च्छनम् ।
विस्मृत्य प्राक्तनं भावमन्यं पश्यति सुव्रत ॥११॥ (३।२०।३१)
प्रतिभान्ति जगन्त्याशु मृतिमोहादनन्तरम् ।
जीवस्योन्मीलनाद्दृग्गो रूपाणीवाखिलान्यलम् १२॥(३।२१।१)
निमेषेणैव जीवस्य मृतिमोहादनन्तरम् । (३।२०।४४)
त्रिजगद्दृश्यसर्गश्रीः प्रतिभासमुपगच्छति ॥१३॥ (३।१०।४५)
दिक्कालकलनाकाशधर्मकर्ममयानि च ।
परिस्फुरन्त्यनन्तानि कल्पान्तस्थैर्यवन्ति च ॥१४॥ (३।२१।२)
देशकालक्रियाद्रव्यमनोबुद्धीन्द्रियादि च ।
झटित्येव मृतेरन्ते वपुः पश्यति यौवने ॥१५॥ (३।२०।४८)

[२] जन्तोर्मरणावस्था :—

यदा व्यथावशान्नाड्यः स्वसंकोचविकासनैः ।
गृह्णन्ति मारुतो देहे तदोज्झति निजां स्थितिम् ॥१॥ (३।५४।५९)

प्रविष्टा न विनिर्यान्ति गताः संप्रविशन्ति नो ।
यदा वाता विनाडीस्थास्तदा स्पन्दात्स्मृतिर्भवेत् ॥२॥ (३।५४।६०)
न विशत्येव वातो न निर्याति पवनो यदा ।
शरीरनाडीवैधुर्यान्मृत इत्युच्यते तदा ॥ ३ ॥ (३।५४।६१)
नाडीप्रवाहे विधुरे यदा वातविसंस्थितिम् ।
जन्तुः प्राप्नोति हि तदा शाम्यतीवास्य चेतना ॥४॥(३।५५।२)
केवलं वातसंरोधाद्यदा स्पन्दः प्रशाम्यति ।
मृत इत्युच्यते देहस्तदासौ जडनामकः ॥ ५ ॥ (३।५५।४)
तस्मिन्देहे शवीभूते वाते चानिलतां गते ।
चेतनं वासनायुक्तं स्वात्मतत्त्वेऽवतिष्ठति ॥ ६ ॥ (३।५५।५)
जीव इत्युच्यते तस्य नामाणोर्वासनावतः । (३।५५।६)
मृते पुंसिः नभोवातैर्मिलन्ति प्राणवायवः ॥ ७ ॥ (३।१८।६)
सप्राणवातैः पवनैः स्फुरत्संकल्पगर्भितैः ।
सर्वा एव दिशः पूर्णाः पश्यामीमाः समन्ततः ॥ ८ ॥ (३।१८।८)
खवातेऽन्तर्मृतप्राणाः प्राणानामन्तरे मनः ।
मनसोऽन्तर्जगद्विद्धि तिले तैलमिव स्थितम् ॥ ९ ॥ (३।१८।१०)
ततोऽसौ प्रेतशब्देन प्रोच्यते व्यवहारिभिः ।
चेतनं वासनामिश्रमामोदानिलवत्स्थितम् ॥ १० ॥(३।५५।७)
इदं दृश्यं परित्यज्य यदास्ते दर्शनान्तरे ।
स स्वप्न इव संकल्प इव नानाकृतिस्तदा ॥ ११ ॥ (३।५५।८)
तस्मिन्नेव प्रदेशेऽन्तः पूर्ववत्स्मृतिमान्भवेत् ।
तदैव मृतिमूर्च्छान्ते पश्यत्यन्यशरीरकम् ॥ १२ ॥ (३।५५।९)

यावन्तो ये मृताः केचिज्जीवा मोक्षविवर्जिताः ।
स्थितास्ते तत्र तावन्तः संसाराः पृथगक्षयाः ॥ १३ ॥(३।६३।३२)

[४] मृतिकाले मूर्खस्यैव दुःखभाजनत्वम्ः—

अभ्यस्य धारणानिष्ठो देहं त्यक्त्वा यथासुखम् ।
प्रयाति धारणाभ्यासी युक्तियुक्तस्तथैव च ॥१॥ (३।५४।३६)
मूर्खः स्वमृतिकालेऽसौ दुःखमेत्यवशाशयः । (३।५४।३७)
दीनतां परमामेति परिलूनमिवाम्बुजम् ॥ २ ॥(३।५४।३८)
अशास्त्रसंस्कृतमतिरसज्जनपरायणः ।
मृत्वानुभवत्यन्तर्दाहमग्नाविव च्युतः ॥ ३ ॥(३।५४।३९)
यदा घर्घरकण्ठत्वं वैरूप्यं दृष्टिर्वजनम् ।
गच्छत्येषोऽविवेकात्मा तदा भवति दीनधीः ॥ ४ ॥(३।५४।४४)
परमान्ध्यमनालोको दिवाप्युदिततारकः ।
साभ्रदिग्मण्डलाभोगो घनमेचकिताम्बरः ॥५॥ (३।५४।४१)
मर्मव्यथाविच्छुरितः भ्रभ्रमद्दृष्टिमण्डलः ।
आकाशीभूतवसुधो वसुधाभूतखान्तरः ॥ ६ ॥ (३।५४।४२)
परिवृत्तककुप्चक्र उह्यमान इवार्णवे ।
नीयमान इवाकाशे घननिद्रोन्मुखाशयः ॥ ७ ॥ (३।५४।४३)
अन्धकूप इवापन्नः शिलान्तरिव योजितः ।
स्वयं जड़ीभवद्वर्णो विनिकृत्त इवाशये ॥ ८ ॥ (३।५४।४४)
पततीव नभोमार्गात्तृणावर्ते इवार्पितः ।

रथे द्रुत इवारूढो हिमवद्गलनोन्मुखः ॥९॥ (३।५४।४५)
व्याकुर्वन्निव संसारं बान्धवानस्पृशन्निव ।
भ्रमितक्षेपणेनेव वातयन्त्र इवास्थितः ॥१०॥ (३।५४।४६)
भ्रमितो वा भ्रम इव कृष्टो रसनयेव वा ।
भ्रमन्निव जलावर्ते शस्त्रयन्त्र इवार्पितः ॥११॥ (३।५४।४७)
प्रोह्यमानस्तृणमिव वहत्पर्जन्यमारुते ।
आरुह्य वारिपूरेण निपतन्निव चार्णवे ॥ १२ ॥ (३।५४।४८)
अनन्तगगने श्वभ्रे चक्रावर्ते पतन्निव ।
अब्धिरुर्वीविपर्यासदशामनुभवन्स्थितः ॥१३॥ (३।५४।४९)
पतन्निवानवरतं प्रोत्पतन्निव चाभितः ।
सूत्काराकर्णनोद्भ्रान्तपूर्णसर्वेन्द्रियव्रणः ॥१४॥ (३।५४।५०)
क्रमाच्छ्यामलतां यान्ति तस्य सर्वाक्षसंविदः । (३।५४।५१)
पूर्वापरं न जानाति स्मृतिस्तानवमागता ॥१५॥ (३।५४।५२)
मनःकल्पनसामर्थ्यं त्यजत्यस्य विमोहतः ।
अविवेकेन तेनासौ महामोहे निमज्जति ॥ १६ ॥ (३।५४।५३)

[५] मरणान्तरानुभवः :—

मरणादिमयी मूर्च्छा प्रत्येकेनानुभूयते ।
यैषा तां विद्धि सुमते महाप्रलययामिनीम् ॥ १ ॥ (३।४०।३१)
तदन्ते तनुते सर्गं सर्व एव पृथक्पृथक् ।
सहजस्वप्नसंकल्पान्संभ्रमाचलनृत्यवत् ॥ २ ॥ (३।४०।३२)

महाप्रलयरात्र्यन्ते चिरादात्ममनो वपुः ।
यथेदं तनुते तद्वत्प्रत्येकं मृत्यनन्तरम् ॥ ३ ॥ (३।४०।३३)
अन्ये त्वमिव ये जीवास्तेषां मरणजन्मसु ।
स्मृतिः कारणतामेति मोक्षाभाववशादिह ॥४॥ (३।४०।३७)
जीवो हि मृतिमूर्च्छान्ते यदन्तः प्रोन्मिषन्निव ।
अनुन्मिषित एवास्ते तत्प्रधानमुदाहृतम् ॥ ५ ॥ (३।४०।३८)
तद्व्योमप्रकृतिः प्रोक्ता तदव्यक्तं जडाजडम् ।
संस्मृतेरस्मृतेश्चैव क्रम एष भवोदये ॥ ६ ॥ (३।४०।३९)
बोधोन्मुखत्वे हि महत्तत्प्रबुद्धं यदा भवेत् ।
तदा तन्मात्रदिक्कालक्रिया भूताद्युदेति खात् ॥७॥ (३।४०।४०)
तदेवोच्छूनमाबुद्धं भवतीन्द्रियपञ्चकम् ।
तदेव बुध्यते देहः स एषोऽस्यातिवाहिकः ॥८॥ (३।४०।४१)
चिरकालप्रत्ययतः कल्पनापरिपीवरः ।
आधिभौतिकताबोधमाधत्ते चैष बालवत् ॥९॥ (३।४०।४२)
ततो दिक्कालकलनास्तदाधारतया स्थिताः ।
उद्यन्त्यनुदिता एव वायोः स्पन्दक्रिया इव ॥१०॥(३।४०।४३)
वृद्धिमित्थमयं यातो मुधैव भुवनभ्रमः ।
स्वप्नाङ्गनासङ्गसमस्त्वनुभूतोऽप्यसन्मयः ॥११॥ (३।४०।४४)
यत्रैव म्रियते जन्तुः पश्यत्याशु तदैव सः ।
तत्रैव भुवनाभोगमिममित्थमिव स्थितम् ॥ १२ ॥ (३।४०।४५)
सुरपत्तनशैलार्कतारानिकरसुन्दरम् ।
जरामरणवैक्लव्यव्याधिसंकटकोटरम् ॥ १३ ॥ (३।४०।४७)

स्वभावाभावसंरम्भस्थूलसूक्ष्मचराचरम् ।
साब्ध्यद्रद्युर्वीनदीशाहोरात्रिकल्पक्षणाक्षयम् ॥१४॥ (३।४०।४८)
प्रत्येकमेवमुदितः संसारवनखण्डकः ॥ (३।४०।५१)
अहं जातोऽमुना पित्रा किलात्रेत्यात्तनिश्चयम् ।
इयं माता धनमिदं ममेत्युदितवासनम् ॥ १५ ॥ (३।४०।४९)
सुकृतं दुष्कृतं चेदं ममेति कृतकल्पनम् ।
बालोऽभूवमहं त्वद्य युवेति विलसद्धृदि ॥ १६ ॥ (३।४०।५०)

[६] स्वस्वकर्मानुरूपेण प्रेतानामनुभवः :—

स्ववासनानुसारेण प्रेता एतां व्यवस्थितिम् ।
मूर्च्छान्तेऽनुभवन्त्यन्तः क्रमेणैवाक्रमेण च ॥१॥ (३।५५।२६)
आदौ मृता वयमिति बुध्यन्ते तदनुक्रमात् ।
बन्धुपिण्डादिदानेव मोत्पन्ना इव वेदिनः ॥२॥ (३।५५।२७)
ततो यमभटा एते कालपाशान्विता इति ।
नीयमानः प्रयाम्येभिः क्रमाद्यमपुरं त्विति ॥३॥ (३।५५।२८)
उद्यानानि विमानानि शोभनानि पुनःपुनः ।
स्वकर्मभिरुपात्तानि दिव्यानीत्येव पुण्यवान् ॥४॥ (३।५५।२९)
हिमानीकण्टकश्वभ्रशस्त्रपत्रवनानि च ।
स्वकर्मदुष्कृतोत्थानि सम्प्राप्तानीति पापवान् ॥५॥ (३।५५।३०)
इयं मे सोम्यसम्पाता सरणिः शीतशाद्वला ।
स्निग्धच्छाया सवापीका पुरः संस्थेति मध्यमः ॥६॥ (३।५५।३१)

अयं प्राप्तो यमपुरमहमेष स भूतपः ।
अयं कर्मविचारोऽत्र कृत इत्यनुभूतिमान् ॥ ७ ॥ (३।५५।३२)
इतोऽयमहमादिष्टः स्वकर्मफलभोजने ।
गच्छाम्याशु शुभं स्वर्गमितो नरकमेव च ॥८॥ (३।५५।३५)
यः स्वर्गोऽयं मया भुक्तो भुक्तोयं नरकोऽथवा ।
इमास्ता योनयो भुक्ता जायेऽहं संसृतौ पुनः ॥९॥ (३।५५।३७)
भवन्ति षड्विधाः प्रेतास्तेषां भेदमिमं शृणु ।
सामान्यपापिनो मध्यपापिनः स्थूलपापिनः ॥१०॥ (३।५५।११)
सामान्यधर्मा मध्यमधर्मा चोत्तमधर्मवान् ॥११॥ (३।५५।१२)
कश्चिन्महापातकवान्वत्सरं स्मृतिमूर्च्छनम् ।
विमूढोऽनुभवत्यन्तः पाषाणहृदयोपमः ॥ १२ ॥ (३।५५।१३)
ततः कालेन सम्बुद्धो वासनाजठरोदितम् ।
अनुभूय चिरं कालं नारकं दुःखमक्षयम् ॥१३॥ (३।५५।१४)
भुक्त्वा योनिशतान्युच्चैर्दुःखाद्दुःखान्तरं गतः ।
कदाचिच्छममायाति संसारस्वप्नसंभ्रमे ॥ १४ ॥ (३।५५।१५)
अथवा मृतिमोहान्ते जडदुःखशताकुलाम् ।
क्षणाद्वृक्षादितामेव हृत्स्थामनुभवन्ति ते ॥१५॥(३।५५।१५)
स्ववासनानुरूपाणि दुःखानि नरके पुनः ।
अनुभूयाथ योनीषु जायन्ते भूतले चिरात् ॥१६॥ (३।५५।१७)
अथ मध्यमपापो यो मृतिमोहादनन्तरम् ।
सशिलाजठरं जाड्यं कञ्चित्कालं प्रपश्यति ॥१७॥ (३।५५।१८)
ततः प्रबुद्धः कालेन केनचिद्वा तदैव वा ।

तिर्यगादिक्रमैर्भुक्त्वा योनीः संसारमेष्यति ॥१८॥ (३।५५।१९)
मृत एवानुभवति कश्चित्सामान्यपातकी ।
स्ववासनानुसारेण देहं सम्पन्नमक्षतम् ॥१९॥ (३।५५।२०)
स स्वप्न इव संकल्प इव चेतति तादृशम् ।
तस्मिन्नेव क्षणे तस्य स्मृतिरित्थमुदेति च ॥२०॥ (३।५५।२१)
ये तूत्तममहापुण्या मृतिमोहादनन्तरम् ।
स्वर्गविद्याधरपुरं स्मृत्या स्वनुभवन्ति ते ॥२१॥ (३।५५।२२)
ततोऽन्यकर्मसदृशं भुक्त्वाऽन्यत्र फलं निजम् ।
जायन्ते मानुषे लोके सश्रीके सज्जनास्पदे ॥२२॥ (३।५५।२३)
ये च मध्यमधर्माणो मृतिमोहादनन्तरम् ।
ते व्योमवायुवलिताः प्रयान्त्योषधिपल्लवम् ॥२३॥ (३।५५।२४)
तत्र चारूफलं भुक्त्वा प्रविश्य हृदयं नृणाम् ।
रेतसामधितिष्ठन्ति गर्भे जातिक्रमोचिते ॥२४॥ (३।५५।२५)

[७] परलोकानुभवानन्तरम् :—

संसुप्तकरणास्त्वेवं बीजतां यात्यसौ नरे ।
तद्बीजं योनिगलितं गर्भो भवति मातरि ॥ १ ॥ (३।५५।३८)
स गर्भो जायते लोके पूर्वकर्मानुसारतः ।
भव्यो भवत्यभव्यो वा बालको ललिताकृतिः ॥२॥(३।५५।३९)
ततोऽनुभवतीन्द्वाभं यौवनं मदनोन्मुखम् ।
ततो जरां पद्ममुखे हिमाशनिमिव च्युताम् ॥ ३ ॥ (३।५५।४०)

ततोऽपि व्याधिमरणं पुनर्मरणमूर्च्छनाम् ।
पुनः स्वप्नवदायातं पिण्डैर्देहपरिग्रहम् ॥ ४ ॥ (३।५५।४१)
याम्यं याति पुनर्लोकं पुनरेव भ्रमक्रमम् ।
भूयो भूयोऽनुभवति नानायोन्यन्तरोदये ॥ ५ ॥ (३।५५।४२)
इत्याजवं जवीभावमाप्नोत्यतिभासुरम् ।
भूयो भूयोऽनुभवति व्योम्न्येव व्योमरूपवान् ॥६॥ (३।५५।४३)

[८] योगमार्गारूढस्य मरणानन्तरानुभवः :—

योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः । (६।१२६।४७)
भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम् ॥ १ ॥ (६।१२६।४८)
ततः सुरविमानेषु लोकपालपुरेषु च । (६।१२६।४८)
मेरूपवनकुञ्जेषु रमते रमणीसखः ॥ २ ॥ (६।१२६।४९)
ततः सुकृतसम्भारे दुष्कृते च पुरा कृते । (६।१२६।४९)
भोगजाले परिक्षीणे जायन्ते योगिनो भुवि ॥३॥(६।१२६।५०)
शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सताम् । (६।१२६।५०)
जनित्वा योगमेवैते सेवन्ते योगवासिताः ॥४॥ (६।१२६।५१)
तत्र प्राग्भावनाभ्यस्तयोगभूमिक्रमं बुधाः ।
स्मृत्वा परिपतन्त्युच्चैरुत्तरं भूमिकाक्रमम् ॥५॥ (६।१२६।५२)

[९] शरीराच्छरीरान्तरप्राप्तिनियमः :—

आशापाशशताबद्धा वासनाभावधारिणः ।
कायात्कायमुपायान्ति वृक्षाद्वृक्षमिवाण्डजाः ॥१॥(४।४३।२६)

काले काले चिता जीवस्त्वन्योऽन्यो भवति स्वयम् ।
भाविताकारवानन्तर्वासनाकलिकोदयात् ॥२॥ (६।५१।३९)

[१०] आऽऽत्मज्ञानात्संसरणम् :—

तावद्भ्रमन्ति संसारे वारिण्यावर्त्तराशयः ।
यावन्मूढा न पश्यन्ति स्वमात्मानमनिन्दितम्॥१॥ (४।४३।२८)
दृष्ट्वात्मानमसत्त्यक्त्वा सत्यमासाद्य संविदम् ।
कालेन पदमागत्य जायन्ते नेह ते पुनः ॥ २ ॥ (४।३३।२९)

[११] मरणान्तरे जीवन्मुक्तस्य गतिः :—

सैव देहक्षये राम पुनर्जननवर्जिता ।
विदेहमुक्तता प्रोक्ता तत्स्था नायान्ति दृश्यताम् ॥१॥ (५।४२।१३)
भ्रष्टबीजोपमा भूयो जन्माङ्कुरविवर्जिता ।
हृदि जीवद्विमुक्तानां शुद्धा भवति वासना ॥२॥ (५।४२।१४)
जीवन्मुक्तपदं त्यक्त्वा देहे कालवशीकृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ३ ॥ (३।९।१४)
विदेहमुक्तो नोदेति नास्तमेति न शाम्यति ।
न सन्नासन्न दूरस्थो न चाहं न च नेतरः ॥४॥ (३।९।१५)

[१२] आत्मा तु न जायते न म्रियते वा :—

न जायते न म्रियते चेतनः पुरुषः क्वचित् ।
स्वप्नसंभ्रमवद्भ्रान्तमेतत्पश्यति केवलम् ॥ १ ॥ (३।५५।६७)

पुरुषश्चेतनामात्रं स कदा क्वेव नश्यति ।
चेतनव्यतिरिक्तत्वे वदान्यत्किं पुमान्भवेत् ॥ २ ॥ (३।५४।६८)
कोऽद्य यावन्मृतं ब्रूहि चेतनं कस्य किं कथम् ।
म्रियन्ते देहलक्षाणि चेतनं स्थितमक्षयम् ॥ ३ ॥ (३।५४।६९)
वासनामात्रवैचित्र्यं यज्जीवोऽनुभवेत्स्वयम् ।
तस्यैव जीवमरणे नामनी परिकल्पिते ॥ ४ ॥ (३।५४।७१)
एवं न कश्चिन्म्रियते जायते न च कश्चन ।
वासनावर्तगर्तेषु जीवो लुठति केवलम् ॥ ५ ॥ (३।५४।७२)
यथा लतायाः पर्वाणि दीर्घायाः मध्यमध्यतः ।
तथा चेतनसत्ताया जन्मानि मरणानि च ॥६॥ (३।५४।६६)
शुद्धं हि चेतनं नित्यं नोदेति न च शाम्यति । (३।५५।३)
न जायते न म्रियते संविदाकाशमक्षयम् ॥७॥ (६।१०१।१६)

[१३] आयुषो न्यूनाधिकत्वकारणम् :—

देशकालक्रियाद्रव्यशुद्ध्यशुद्धी स्वकर्मणाम् ।
न्यूनत्वे चाधिकत्वे च नृणां कारणमायुषः ॥१॥ (३।५४।२९)
स्वकर्मधर्मे ह्रसति ह्रसत्यायुर्नृणामिह ।
वृद्धे वृद्धिमुपायाति सममेव भवेत्समे ॥ २ ॥ (३।५४।३०)
वृद्धमृत्युप्रदैर्वृद्धः कर्मभिर्मृतिमृच्छति ।
बालमृत्युप्रदैर्बालो युवा यौवनमृत्युदैः ॥३॥ (३।५४।३१)
यो यथाशास्त्रमारब्धं स्वधर्ममनुतिष्ठति ।

भाजनं भवति श्रीमान्स यथाशास्त्रमायुषः ॥४॥ (३।५४।३२)
मृत्यो न किञ्चिच्छक्यस्त्वमेको मारयितुं बलात् ।
मारणीयस्य कर्माणि तत्कर्तृणीति नेतरत् ॥ ५ ॥ (३।२।१०)

[१४] मृत्युस्तं न जिघांसति :—

दोषमुक्ताफलप्रोता वासनातन्तुसंततिः ।
हृदि न ग्रथिता यस्य मृत्युस्तं न जिघांसति ॥ १ ॥ (६।२३।५)
निःश्वासवृत्तक्रकचाः सर्वदेहलताघुणाः ।
आधयो यं न भिन्दन्ति मृत्युस्तं न जिघांसति ॥२॥ (६।२३।६)
शरीरतरुसर्पौघाश्चिन्तार्पितशिरःफणाः ।
आशा यं न दहन्त्यन्तर्मृत्युस्तं न जिघांसति ॥ ३ ॥ (६।२३।७)
रागद्वेषविषापूरः स्वमनोबिलमन्दिरः ।
लोभव्यालो न भुङ्क्ते यं मृत्युस्तं न जिघांसति ॥४॥(६।२३।८)
पीताशेषविवेकाम्बुः शरीराम्भोधिवाडवः ।
न निर्दहति यं कोपस्तं मृत्युर्न जिघांसति ॥ ५ ॥ (६।२३।९)
यन्त्रं तिलानां कठिनं राशिमुग्रमिवाकुलम् ।
यं पीडयति नानङ्गस्तं मृत्युर्न जिघांसति ॥ ६ ॥ (६।२३।१०)
एकस्मिन्निर्मले येन पदे परमपावने ।
संश्रिता चित्तविश्रान्तिस्तं मृत्युर्न जिघांसति ॥७॥ (६।२३।११)
वपुःखण्डाभिपतितं शाखामृगमिवोदितम् ।
न चञ्चलं मनो यस्य तं मृत्युर्नजिघांसति ॥८॥ (६।२३।१२)

६—ब्रह्मा

[१] जगत्कर्ता ब्रह्मा :—

सर्गादौ स्वप्नपुरुषन्यायेनादिप्रजापतिः ।
यथा स्फुटं प्रकचितस्तथाद्यापि स्थिता स्थितिः ॥१॥ (३।५५।४७)
सङ्कल्पयति यन्नाम प्रथमोऽसौ प्रजापतिः ।
तत्तदेवाशु भवति तस्येदं कल्पनं जगत् ॥ २ ॥ (६।१८६।६५)

[२] मन एव ब्रह्मेति कथ्यते :—

मन एव विरिञ्चित्वं तद्धि सङ्कल्पनात्मकम् !
स्ववपुः स्फारतां नीत्वा मनसेदं वितन्यते ॥१॥ (३।३।३४)
विरिञ्चो मनसोरूपं विरिञ्चस्य मनो वपुः । (३।३।३५)
मनस्तामिव यातेन ब्रह्मणा तन्यते जगत् ॥२॥ (३।३।३६)

[३] परस्मात्तत्वाद्ब्रह्मणः समुद्भवः :—

मनः सम्पद्यते तेन महतः परमात्मनः ।
सुस्थिरादस्थिराकारस्तरङ्ग इव वारिधेः ॥ १ ॥ (३।१।१५)
स्वयमक्षुब्धविमले यथा स्पन्दो महाम्भसि ।
संसारकारणं जीवस्तथायं परमात्मनि ॥ २ ॥ (३।१००।२५)

निस्पन्दवपुषस्तस्य स्पन्दस्तस्माच्चिदेव हि ।
प्रदेशाद्धनतामेति सौम्योऽब्धिश्चलनादिव ॥ ३ ॥ (४।४२।४)
अन्तरब्धेर्जलं यद्वत्स्पन्दास्पन्दवदीहते ।
सर्वशक्तिस्तथैकत्र गच्छति स्पन्दशक्तिताम् ॥४॥ (४(४२।५)
आत्मन्येवात्मना व्योम्नि यथा रसति मारुतः ।
तथेहात्मात्मशक्त्यैव स्वात्मन्येवैति लोलताम् ॥५॥ (४।४२।६)
स्वशिखास्पन्दशक्त्यैव दीपः सोम्यो यथोन्नतम् ।
एति तद्वदसावात्मा तत्स्वे वपुषि वल्गति ॥ ६ ॥ (५।४२।७)
जलान्तरेऽम्बुधिर्यद्वल्लसद्वारीव चञ्चलः ।
सर्वशक्तिर्वपुष्येव तथास्पन्दविलासवान् ॥ ७ ॥ (४।४२।८)
यथोल्लसति भाश्चक्रैः कचन्कनकसागरः ।
तथात्मनि परिस्पन्दैः स्फुरत्यच्छैश्चिदर्णवः ॥ ८ ॥ (४।४२।९)
लक्ष्यते मौक्तिकस्पन्दो यथा व्योम्नि दृशोऽदृशि ।
तथा भाति लसद्रूपा चिच्छक्तिश्चिन्महाम्बरे ॥९॥ (४।४२।१०)
किंचित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे ।
तन्मयी चित्स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ॥१०॥ (४।४२।११)
य एवानुभवात्मायं चित्स्पन्दोऽस्ति स एव हि ।
जोवकारणकर्माख्यो वीजमेतद्धि संसृतेः ॥ ११ ॥ (३।६७।६)
शिवात्प्राक्कारणात्पूर्वं चिच्चेत्यकलनोन्मुखी ।
उदेति सौम्याज्जलधेः पयःस्पन्दो मनागिव ॥१२॥(३।६७।१८)
स्फुरणाज्जीवचक्रत्वमेति चित्तोर्मितां दधत् ।
चिद्वारिब्रह्मजलधौ कुरुते सर्गबुद्बुदान् ॥१३॥ (६।६७।१६)

[४] स्वाभाविकोऽयं ब्रह्मणः स्पन्दः :—

तस्यैवोद्यदिवाशान्ति यत्सत्त्वं संविदात्मकम् ।
स्वभावात्स्पन्दनं तत्तु जीवशब्देन कथ्यते ॥१॥ (३।६४।६)
शान्तत्वापगमेच्छस्य मनाक्संवेदनात्मकम् ।
स्वाभाविकं यत्स्फुरणं चिद्व्योम्नः सोऽङ्ग जीवकः॥२॥ (३।६४।९)
यथा वातस्य चलनं कृशानोरुष्णता यथा ।
शीतता वा तुषारस्य तथा जीवत्वमात्मनः ॥ ३ ॥ (३।६४।१०)
चिद्रूपस्यात्मतत्त्वस्य स्वभाववशतः स्वयम् ।
मनाक्संवेदनमिव यत्तज्जीव इति स्मृतम् ॥ ४ ॥ (३।६४।११)

[५] स्वलीलयैव ब्रह्म स्वयं स्पन्दति :—

दिक्कालाद्यनवच्छिन्नमात्मतत्त्वं स्वशक्तितः । (४।४४।१४)
लीलयैव तदादत्ते दिक्कालकलितं वपुः ॥१॥ (४।४४।१५)
समुदेति स्वतस्तस्मात्कला कलनरूपिणी ।
जलादावर्तलेखेव स्फुरज्जलतयोदिता ॥ २ ॥ (६।९।३)
स्वयमेवात्मनात्मान्य इव चेत्यते ॥ ३ ॥ (३।६७।७९)
स्वयमेवात्मनैवात्मा शक्तिं संकल्पनामिकाम् ।
यदा करोति स्फुरता स्पन्दशक्तिमिवानिलः ॥४॥ (६।११४।१५)
तदा पृथगिवाभासं संकल्पकलनामयम् ।
मनो भवति विश्वात्मा भावयन्स्वाकृतिं स्वयम् ॥५॥(६।११४।१६)

[६] अयं स्पन्दोऽन्य इव चेत्यते :—

स्वयमन्यैवमस्मीति भावयित्वा स्वभावतः ।
अन्यतामिव संयाति स्वविकल्पात्मिकां स्वतः ॥१॥ (६।३३।२१)
स एव हि पुमान्कोपाद्यथेहान्य इव क्षणात् ।
भवत्येवं विकल्पाङ्का चित्स्वरूपान्यतां गता ॥ २ ॥ (६।३०।६६)
आदित्यव्यतिरेकेण यो भावयति राघव ।
रश्मिजालमिदं ह्येतत्तस्यान्यदिव भास्वतः ॥३॥ (६।११४।४)
कनकव्यतिरेकेण केयूरं येन भावितम् ।
केयूरमेव तत्तस्य न तस्य कनकं हि तत् ॥ ४ ॥ (६।११४।५)
सलिलव्यतिरेकेण तरङ्गो येन भावितः ।
तरङ्गबुद्धिरेवैका स्थिता तस्य न वारिधीः ॥५॥ (६।११४।७)
पावकव्यतिरेकेण ज्वालाली येन भाविता ।
तस्याग्निबुद्धिर्गलति ज्वालाधीरेव तिष्ठति ॥६॥ (६।११४।१०)
किञ्चित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे । (४।४।११)
आत्मनोऽव्यतिरिक्तैव व्यतिरिक्तेव तिष्ठति ॥७॥ (४।४२।१२)

[७] सङ्कल्पस्वरूपोऽयं स्पन्दः :—

अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः ।
संकल्पशक्तिरचितं यद्रूपं तन्मनो विदुः ॥१॥ (३।९६।३)
देशकालपरिस्पन्दशक्तिसन्दीपिताथ चित् ।
संकल्पमनुधावन्ती प्रयाति कलनापदम् ॥२॥ (४।४२।२०)

[८] चेत्यभावनास्वरूपोऽयं स्पन्दः :—

यैषा स्वभावातिगतं स्वयं संकल्प्य धावति ।
चिच्चैत्यं स्वयमाम्लाना सा म्लाना तन्मनः स्मृतम् ॥ १ ॥
(३।११४।१८)

चेत्येन सहिता यैषा चित्सेऽयं कलनोच्यते । (५।१३।५३)
चितश्चेतनोन्मुखत्वं यत्तत्सङ्कल्पाङ्कुरं विदुः ॥ २ ॥ (४।५४।२)

भावयन्ती चितिश्चेत्यं व्यतिरिक्तमिवात्मनः ।
संकल्पतामुपायाति बीजमङ्कुरतामिव ॥ ३ ॥ (४।५४।४)

[९] प्रतिभासमात्रत्वं ब्रह्मणः :—

प्रतिभासवशादेव मध्यस्थं चित्तजाड्ययोः ।
जीवेतराभिधं चित्तमन्तर्ब्रह्मणि दृश्यते ॥ १ ॥ (३।१००।१२)

पिच्छभ्रान्तिर्यथा व्योम्नि पयस्यावर्तधीर्यथा ।
प्रतिभासकलामात्रं मनो जीवस्तथात्मनि ॥२॥ (३।१००।१६)

(१०) जगत्कर्तुर्निर्हेतुकोद्भवः :—

शक्तिर्निर्हेतुकैवान्तः स्फुरति स्फटिकांशुवत् ॥१॥ (६।११।३७)

तस्मादकारणं भाति वा स्वचित्तैककारणम् ।
स्वकारणादनन्यात्मा स्वयंभूः स्वयमात्मवान् ॥ २ ॥ (३।३।५)

सम्विन्मात्रस्वभावत्वादेहोऽहमिति चेतति ।
काकतालीयवद्भ्रान्तमाकरं तेन पश्यति ॥ ३ ॥ (३।२।३८)

चित्स्वभावात्समायातं ब्रह्मत्वं सर्वकारणम् ।

संसृतौ कारणं पश्चात्कर्म निर्माय संस्थितम् ॥ ४ ॥ (३।६४।२५)
चित्तं स्वभावात्स्फुरति चित्तः फेन इवाम्भसः ।
कर्मभिर्बध्यते पश्चाड्डिण्डीरमिव रज्जुभिः ॥ ५ ॥ (३।६४।२६)
आद्यः प्रजापतिः पूर्वं स्वयं भूरिति विश्रुतः ।
प्राक्तनानां स्वकार्याणामभावादप्यकारणः ॥ ६ ॥ (३।१४।७)
असतः शशशृङ्गादेर्मृगतृष्णाम्भसो यथा ।
आलोकनादलभ्यस्य कीदृक्स्यात्किल कारणम् ॥७॥ (६।२२।८)
असत्यप्रतिभासानामेतदेवाशु कारणम् ।
यदनालोकनं नाम समालोकक्षणात्क्षयम् ॥८॥ (६।२२।१०)
स्मृतिर्न प्राक्तनी काचित्कारणं वा स्वयंम्भुवः॥९॥(३।१३।४३)

(११) न ब्रह्मणः कर्माणि :—

प्राक्तनानि न सन्त्यस्य कर्माण्यद्य करोति नो ॥१॥ (३।२।२४)
प्राणस्पन्दोऽस्य यत्कर्म लक्ष्यते चास्मदादिभिः ।
दृश्यतेऽस्माभिरेवं तन्न त्वस्यास्त्यत्र कर्मधीः ॥२॥ (३।२।२५)

(१२) संकल्पमात्रशररित्वं ब्रह्मणः :—

संकल्पमात्रमेवैतन्मनो ब्रह्मेति कथ्यते ।
संकल्पाकाशपुरुषो नास्य पृथ्व्यादि विद्यते ॥ १ ॥ (३।२।५४)
यथा चित्रकृदन्तःस्था निर्देहा भाति पुत्रिका ।
तथैवभासते ब्रह्मा चिदाकाशाच्छरञ्जनम् ॥ २ ॥ (३।२।५५)
आतिवाहिक एवासौ देहोस्त्यस्य स्वयंभुवः ।

नत्वाधिभौतिको राम देहोऽजस्योपपद्यते ॥ ३ ॥ (३।३।६)
सर्वेषामेव देहौ द्वौ भूतानां कारणात्मनाम् ।
अजस्य कारणाभावादेक एवातिवाहिकः ॥ ४ ॥ (३।३।८)
सर्वासां भूतजातीनामेकोऽजः कारणं परम् ।
अजस्य कारणं नास्ति तेनासावेकदेहवान् ॥ ५ ॥ (३।३।९)
नास्त्येव भौतिको देहः प्रथमस्य प्रजापतेः ।
आकाशात्मा च भात्येष आतिवाहिकदेहवान् ॥६॥ (३।३।१०)
चित्तमात्रशरीरोऽसौ न पृथ्व्यादिक्रमात्मकः ।
आद्यः प्रजापतिर्व्योमवपुः प्रतनुते प्रजाः ॥ ७ ॥ (३।३।११)

(१३) ब्रह्मा त्रिजगत्स्थितेः कारणम् :—

अस्मात्पूर्वात्प्रतिस्पन्दादनन्यैतत्स्वरूपिणी ।
इयं प्रविसृता सृष्टिः स्पन्दसृष्टिरिवानिलात् ॥ १ ॥ (३।३।१५)
प्रतिभानाकृतेरस्मात्प्रतिभामात्ररूपधृक् ।
विभात्येवमयं सर्गः सत्यानुभववान्स्थितः ॥ २ ॥ (३।३।१६)
मनस्तामिव यातेन ब्रह्मणा तन्यते जगत् ।
अनन्यादात्मनः शुद्धाद्द्रवत्वमिव वारिणः ॥ ३ ॥ (३।३।२९)
मनो नाम्नो मनुष्यस्य विरिञ्च्याकारधारिणः ।
मनोराज्यं जगदिति सत्यरूपमिव स्थितम् ॥ ४ ॥ (३।३।३३)
अहंमयो पद्मजभावना चित्संकल्पभेदाद्वितनोति विश्वम् ।
अन्तर्मुखैवानुभवत्यनन्तनिमेषकोट्यंशविधौ युगान्तम् ॥ ५ ॥
(३।६१।३८)

[१४] ब्रह्मजनितं विश्वं मनोमयम् :—

मनोमात्रं यदा ब्रह्मा न पृथ्व्यादिमयात्मकः ।
मनोमात्रमतो विश्वं यद्यज्जातं तदेव हि ॥ १ ॥ (३।३।२५)
स्वभावाद्व्यतिरिक्तं तु न चित्तस्यास्ति चेतनम् ।
स्पन्दादृते यथा वायोरन्तः किं नाम चेत्यते ॥२॥ (३।६६।१६)

[१५] सर्गस्यापूर्वत्वम् :—

अपूर्व एव स्वप्नोऽयं यद्वै सर्गोऽनुभूयते ॥१॥ (६।१९५।४१)
महाकल्पे विमुक्तत्वाद्ब्रह्मादीनामसंशयम् । (३।१३।४२)
स्मृतिर्न प्राक्तनी काचित्कारणं वा स्वयंभुवः ॥२॥ (३।१३।४३)



१०—शक्तिः

[१] ब्रह्मणः शक्तयः :—

समस्तशक्तिखचितं ब्रह्म सर्वेश्वरं सदा ।
यथैव शक्त्या स्फुरति प्राप्तां तामेव पश्यति ॥ १ ॥ (३।६७।२)

सर्वशक्तिमयो ह्यात्मा यद्यथा भावयत्यलम् ।
तत्तथा पश्यति तदा स्वसङ्कल्पविजृम्भितम् ॥२॥ (६।३३।४१)

सर्वशक्तिर्हि भगवान्यैव तस्मै हि रोचते ।
शक्तिं तामेव विततां प्रकाशयति सर्वगः ॥ ३ ॥ (३।१००।६)

सर्वशक्ति परं ब्रह्म नित्यमापूर्णमव्ययम् ।
न तदस्ति न तस्मिन्यद्विद्यते विततात्मनि ॥४॥ (३।१००।५)

ज्ञानशक्तिः क्रियाशक्तिः कर्तृताऽकर्तृताऽपि च ।
इत्यादिकानां शक्तीनामन्तो नास्ति शिवात्मनः ॥५॥(६।३७।१६)

चिच्छक्तिर्ब्रह्मणो राम शरीरेष्वभिदृश्यते ।
स्पन्दशक्तिश्च वातेषु जड़शक्तिस्तथोपले ॥ ६ ॥ (३।१००।७)

द्रवशक्तिस्तथाम्भःसु तेजःशक्तिस्तथाऽनले ।
शून्यशक्तिस्तथाकाशे भवशक्तिर्भवस्थितौ ॥ ७ ॥ (३।१००।८)

ब्रह्मणः सर्वशक्तिर्हि दृश्यते दशदिग्गता ।
नाशशक्तिर्विनाशेषु शोकशक्तिश्च शोकिषु ॥८॥ (३।१००।९)

आनन्दशक्तिर्मुदिते वीर्यशक्तिस्तथा भटे ।
सर्गेषु सर्गशक्तिश्च कल्पान्ते सर्वशक्तिता ॥९॥ (३।१००।१०)

[२] स्पन्दशक्तिः :—

स्पन्दशक्तिस्तदिच्छेदं दृश्याभासं तनोति सा ।
साकारस्य नरस्येच्छा यथा वै कल्पनापुरम् ॥१॥ (६।८४।६)
यन्नाम चेतनं यत्र तदवश्यं स्वभावतः ।
स्पन्दधर्मि भवत्येव वस्तुता हि स्वभावजा ॥२॥ (६।८३।१६)
सा राम प्रकृतिः प्रोक्ता शिवेच्छा पारमेश्वरी ।
जगन्मायेति विख्याता स्पन्दशक्तिरकृत्रिमा ॥३॥ (६।८५।१४)
प्रकृतित्वेन सर्गस्य स्वयं प्रकृतितां गता ।
दृश्याभासानुभूतानां कारणात्सोच्यते क्रिया ॥४॥ (६।८४।८)

[३] प्रकृतिः :—

यदैव खलु शुद्धाया मनागपि हि संविदः ।
जडेव शक्तिरुदिता तदा वैचित्र्यमागतम् ॥१॥ (३।६६।७०)
भावदार्ढ्यात्मकं मिथ्या ब्रह्मानन्दो विभाव्यते ।
आत्मैव कोशकारेण लालादार्ढ्यात्मकं यथा ॥२॥ (३।६७।७३)
ऊर्णनाभाद्यथा तन्तुर्जायते चेतनाज्जडः ।
नित्यात्प्रबुद्धात्पुरुषाद्ब्रह्मणः प्रकृतिस्तथा ॥३॥ (३।६६।७१)
सूक्ष्मा मध्या तथा स्थूला चेति सा कल्प्यते त्रिधा । (६।६।४)
तिष्ठत्येतास्ववस्थासु भेदतः कल्प्यते त्रिधा ॥४॥ (६।९।५)
सत्वं रजस्तम इति एषैव प्रकृतिः स्मृता । (६।६।५)
अविद्यां प्रकृतिं विद्धि गुणत्रितयधर्मिणीम् ॥५॥ (६।६।६)

एषैव संसृतिर्जन्तोरस्याः पारं परं पदम् । (६।१।६)
यावत्किञ्चिदिदं दृश्यमनयैव तदाश्रितम् ॥६॥ (६।१।८)

[४] शक्तिब्रह्मणोरनन्यत्वम् :—

यथैकं पवनस्पन्दमेकमौष्ण्यानलौ यथा ।
चिन्मात्रं स्पन्दशक्तिश्च तथैवैकात्म सर्वदा ॥१॥ (६।८४।३)
अनन्यां तस्य तां विद्धि स्पन्दशक्तिं मनोमयीम् ॥२॥ (६।८४।२)
व्यावृत्त्यैव तथैवास्ते शिव इत्युच्यते तदा ।
चितिशक्तेः क्रियादेव्याः प्रतिस्थानं यदात्मनि ॥३॥ (६।८४।२६)
यथा भूतस्थितेरेव तदेव शिव उच्यते ।
देव्याः क्रियायाश्चिच्छक्तेः स्वरूपिण्या महाकृतेः॥४॥(६।८४।२७)
चेतनत्वात्तथाभूतस्वभावविभवादृते ।
स्थातुं न युज्यते तस्य यथा हेम्ना निराकृति ॥५॥ (६।८२।६)
कथमास्तां वद प्राज्ञ मरिचं तिक्ततां विना । (६।८२।७)
विना तिष्ठति माधुर्यं कथयेक्षुरसः कथम् ॥६॥ (६।८२।९)
अचेतनं यच्चिन्मात्रं न तच्चिन्मात्रमुच्यते ॥७॥ (६।८२।१०)
चेतनं चेतनाधातोः किञ्चित्संस्पन्दनं विना ।
क्वचित्स्थातुं न शक्नोति वस्त्ववस्तुतया यथा ॥८॥ (६।८३।१४)
स परः प्रकृतेः प्रोक्तः पुरुषः पवनाकृतिः ।
शिवरूपधरः शान्तः शरदाकाशशान्तिमान् ॥९॥(६।८५।१५)
भ्रमति प्रकृतिस्तावत्संसारे भ्रमरूपिणी ।
स्पन्दमात्रात्मिका सेच्छा चिच्छक्तिः पारमेश्वरी ॥१०॥(६।८५।१६)

यावन्न पश्यति शिवं नित्यतृप्तमनामयम् । (६।८५।१७)
संविन्मात्रैकधर्मित्वात्काकतालीययोगतः ॥११॥ (६।८५।१८)
संविद्देवो शिवं स्पृष्ट्वा प्रकृतित्वं समुज्झति । (६।८५।१८)
प्रकृतिः पुरुषं स्पृष्ट्वा तन्मयीव भवत्यलम् ॥१२॥ (६।८५।१६)
तदन्तरेकतां गत्वा नदीरूपमिवार्णवे । (६।८५।१६)
चितिः शिवेच्छा सा देवं तमेवासाद्य शाम्यति ॥१३॥(६।८५।२१)
चितिनिर्वाणरूपं यत्प्रकृतिः परमं पदम् ।
प्राप्य तत्तामवाप्नोति सरिदब्धाविवाब्धिताम् ॥१४(६।८५।२६)

११—परं ब्रह्म

यस्मिन्सर्वं यतः सर्वं यत्सर्वं सर्वतश्च यत् ।
सर्वं सर्वतया सर्वं तत्सर्वं सर्वदा स्थितम् ॥१॥ (६/२।१८४।४६)
सर्वशक्ति परं ब्रह्म सर्ववस्तुमयं ततम् ।
सर्वदा सर्वथा सर्वं सर्वैः सर्वत्र सर्वगम् ॥२॥ (६/२।१४।८)

[१] ब्रह्मणोऽनाख्यत्वम् :—

अवाच्यमनभिव्यक्तमतीन्द्रियमनामकम् । (६/२।६२।२७)
स्वरूपं नोपदेशस्य विषयो विदुषो हि तत् ॥१॥ (६/२।३१।३७)
प्रत्यक्षादिप्रमाणानां यदगम्यमचिह्नितम् ।
स्वानुभूतिभवं ब्रह्म वादैस्तल्लभ्यते कथम् ॥२॥ (६/२।१९५।६९)

[२] नेति नेति :—

न चेतनो न च जडो न चैवासन्न सन्मयः ।
नाहं नान्यो न चैवैको नानेको नाप्यनेकवान् ॥१॥ (५।७२।४१)
नाभ्याशस्थो न दूरस्थो नैवास्ति नच नास्ति च ।
न प्राप्यो नाति चाप्राप्यो नवा सर्वो न सर्वगः ॥२॥(५।७२।४२)
न पदार्थो नापदार्थो न पञ्चात्मा न पञ्च च ॥३॥ (५।७२।४३)

[३] एकमनेकं वेति वक्तुमशक्यम् :—

सति द्वित्वे किलैकं स्यात्सत्येकत्वे द्विरूपता ।

फले द्वे अपि चिद्रूपे चिद्रूपत्वात्तदप्यसत् ॥१॥ (६।३३।४)
एकाभावादभावोऽत्र एकत्वद्वित्वयोर्द्वयोः ।
एकं विना न द्वितीयं न द्वितीयं विनैकता ॥२॥ (६।३३।५)
सनानातोऽप्यनानातो यथाऽगुडरसबर्हिणः ।
अद्वैतद्वैतसत्त्वात्मा तथा ब्रह्मजगद्भ्रमः ॥३॥ (६।४७।३१)

[४] तदस्ति नास्ति चेति वक्तुं न युज्यते :—

नच नास्तीति तद्वक्तुं युज्यते चिद्वपुर्यदा ।
नचैवास्तीति तद्वक्तुं युक्तं शान्तमलं तदा ॥१॥ (६।५३।६)
यथा सदसतोः सत्ता समतायामवस्थितिः ।
यतः सदसतो रूपं भावस्थं विद्धि तं परम् ॥२॥ (६।४७।३२)
न सन्नासन्न मध्यं च शून्याशून्यं न चैव हि । (६।४८।१२)
न तदस्ति न तन्नास्ति न वाग्गोचरमेव तत् ॥३॥ (६।३१।३६)
अशून्यापेक्षया शून्यशब्दार्थपरिकल्पना ।
अशून्यत्वात्सम्भवतः शून्यताशून्यते कुतः ॥४॥ (३।१०।१४)
सलिलान्तर्यथा वीचिर्मृदन्तर्घटको यथा ।
तथा यत्र जगत्सत्ता तत्कथं खात्मकं भवेत् ॥५॥ (३।१०।२०)
अनुत्कीर्णा यथा स्तम्भे संस्थिता शालभञ्जिका ।
तथा विश्वं स्थितं तत्र तेन शून्यं न तत्पदम् ॥६॥ (३।१०।७)
एवमित्थं महारम्भपूर्णमप्यजरं पदम् ।
अस्मद्दृष्ट्या स्थितं शान्तं शून्यमाकाशतोऽधिकम् ॥७॥ (३।१०।३६)

[५] विद्याऽविद्याऽतीतत्वं ब्रह्मणः :—

विद्याविद्यादृशोर्भेदभावनादेव भिन्नता ।
पयस्तरङ्गयोर्द्वित्वभावनादेव भिन्नता ॥ १ ॥ (६।१।१७)
पयस्तरङ्गयोरैक्यं यथैव परमार्थतः ।
नाविद्यात्वं न विद्यात्वमिह किञ्चन विद्यते ॥ २ ॥ (६।६।१८)
विद्याविद्यादृशौ त्यक्त्वा यदस्तीह तदस्ति हि ।
प्रतियोगिव्यवच्छेदवशादेतद्‌द्वयूद्वह ॥ ३ ॥ (६।६।१६)
विद्याविद्यादृशौ न स्तः शेषे बद्धपदो भव ।
नाविद्यास्ति न विद्यास्ति कृतं कल्पनयानया ॥४॥ (६।६।२०)
किञ्चिदस्ति न किञ्चिद्यच्चित्संविदिति तत्स्थितम् ।
तदेवाविदिताभासं सदविद्येत्युदाहृतम् ॥५॥ (६।६।२१)
विदितं सत्तदेवेदमविद्यात्तयसंज्ञितम् ।
विद्याभावादविद्याख्या मिथ्यैवोदेति कल्पना ॥६॥ (६।६।२२)
मिथः स्वान्ते तयोरन्तश्छायातपनयोरिव ।
अविद्यायां विलीनायां क्षीणे द्वे एव कल्पने ॥७॥ (६।६।२३)
एते राघव लीयेते अवाप्यं परिशिष्यते ।
अविद्यासंक्षयात्क्षीणो विद्यापक्षोऽपि राघव ॥८॥ (६।६।२४)

[६] तमःप्रकाशाभ्यां परं ब्रह्म :—

मुक्तं तमः प्रकाशाभ्यामित्येतदजरं पदम् । (३।१०।१८)
ब्रह्मण्ययं प्रकाशो हि न सम्भवति भूतजः ॥१॥ (३।१०।१५)

महाभूतप्रकाशानामभावस्तम उच्यते ।
महाभूताभावजं तु तेनात्र न तमः क्वचित् ॥२॥ (३।१०।१६)
स्वानुभूतिः प्रकाशोऽस्य केवलं व्योमरूपिणः ।
योऽन्तरस्ति स तेनैव न त्वन्येनानुभूयते ॥३॥ (३।१०।१७)

[७] आत्मेत्यपि तस्य संज्ञा कल्पिता :—

नात्मा ॥ १ ॥ (६।५२।३०)
यतो वाचो निवर्तन्ते यो मुक्तैरवगम्यते ।
तस्य चात्मादिकाः संज्ञाः कल्पिता न स्वभावजाः॥२॥(३।५।५)
नात्मायमयमप्यात्मा संज्ञाभेद इति स्वयम् ।
तेनैव सर्वगतया शक्त्या स्वात्मनि कल्पितः ॥३॥ (५।७३।१९)

[८] न जडं नापि चेतनम् :—

जडचेतनभावादि शब्दार्थश्रीर्न विद्यते ।
अनिर्देश्यपदे पत्रलतादीव महामरौ ॥१॥ (३।९१।३६)

[९] ब्रह्मणः स्वभावो वक्तुं न युज्यते :—

ब्रह्मणः कः स्वभावोऽसाविति वक्तुं न युज्यते ।
अनन्ते परमे तत्त्वे स्वत्वास्वत्वात्यसंभवात् ॥१॥ (६।१०।१४)
अभावसव्यपेक्षस्य भावस्य सम्भवादपि ।
पदं बध्नन्ति नानन्ते स्वभावाद्या दुरुक्तयः ॥ २ ॥ (६।१०।१५)

[१०] ब्रह्मणः कल्पितानि नामानि :—

ऋतमात्मा परंब्रह्म सत्यमित्यादिका बुधैः ।
कल्पिता व्यवहारार्थं तस्य संज्ञा महात्मनः ॥१॥ (३।१।१२)
यः पुमान्सांख्यदृष्टीनां ब्रह्म वेदान्तवादिनाम् ।
विज्ञानमात्रं विज्ञानविदामेकान्तनिर्मलम् ॥२॥ (३।५।६)
यः शून्यवादिनां शून्यो भासको योऽर्कतेजसाम् ।
वक्ता मन्ता ऋतं भोक्ता द्रष्टा कर्ता सदैव सः ॥३॥ (३।५।७)
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ।
शिवः शशिकलाङ्कानां कालः कालैकवादिनाम् ॥४॥(५।८७।१९)
आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृशात्मनाम् ।
मध्यं माध्यमिकानां च सर्वं सुसमचेतसाम् ॥५॥ (५।८७।२०)

[११] ब्रह्मणो रूपम् :—

यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥१॥ (१।१।१)
ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टादर्शनदृश्यभूः ।
कर्ता हेतुः क्रिया यस्मात्तस्मै ज्ञप्त्यात्मने नमः ॥२॥ (१।१।२)
स्फुरन्ति सीकरा यस्मादानन्दस्याम्बरेऽवनौ ।
सर्वेषां जीवनं तस्मै ब्रह्मानन्दात्मने नमः ॥३॥ (१।१।३)
आकाशपरमाणुसहस्रांशमात्रेऽपि या शुद्ध-
चिन्मात्रसत्ता विद्यते सा हि परमार्थसंवित् ॥४॥ (६।६१।६)

न दृश्यं नोपदेशार्हं नात्यासन्नं दूरगम् । (६।४८।१०)
केवलानुभवप्राप्यं चिद्रूपं शुद्धमात्मनः ॥ ५ ॥ (६।४८।११)
सर्वं सर्वात्मकं चैव सर्वार्थरहितं पदम् । (६।५२।३६)
सर्वभूतात्मकं शून्यं सदसच्च परं पदम् ॥ ६ ॥ (६।५२।२७)
तन्न वायुर्न चाकाशं न बुद्ध्यादि न शून्यकम् ।
न किञ्चिदपि सर्वात्म किमप्यन्यत्परं नभः ॥७॥ (६।५२।२८)
न कालो न मनो नात्मा न सन्नासन्न देशदिक् ।
न मध्यमेतयोर्नान्तं न बोधो नाप्यबोधितम् ॥८॥ (६।५२।३०)
यत्सम्वेद्यविनिर्मुक्तं संवेदनमनिर्मितम् ।
चेत्यमुक्तं चिदाभासं तद्विद्धि परमं पदम् ॥९॥ (६।५९।४)
सा परा परमा काष्ठा सा दृशां दृगनुत्तमा ।
सा महिम्नां च महिमा गुरूणां सा तथा गुरुः॥१०॥(६।५९।५)
स तन्तुर्भूतमुक्तानां परिप्रोतहृदम्बरः ।
स भूतमरिचौघानां परमा तीक्ष्णता तथा ॥११॥ (६।५९।९)
स पदार्थे पदार्थत्वं स तत्त्वं यदनुत्तमम् ।
स सतो वस्तुनः सत्त्वमसत्त्वं वा सतः स्वतः ॥१२॥(६।५९।१०)
सर्वत्र सर्वार्थमयं सर्वतः सर्ववर्जितम् । (६।१४।१४)
सर्वं सर्वात्मकं चैव सर्वार्थरहितं पदम् ॥ १३ ॥ (६।५२।३६)
किमप्येव तदत्यच्छं बुध्यते बोधपारगैः ।
शान्तसंसारविसरैः परां भूमिमुपागतैः ॥१४॥ (६।५२।३१)
सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य संस्थितम् ॥ १५ ॥ (६।१४।९)

सर्वेन्द्रियगुणैर्मुक्तं सर्वेन्द्रियगुणान्वितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१६॥(६।१४।१०)
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१७॥(६।१४।११)
अणीयसामणीयांसं स्थविष्ठं च स्थवीयसाम् ।
गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ॥ १८ ॥ (६।३५।१६)
ईदृशं तत्परं स्थूलं यस्याग्रे यदिदं जगत् ।
परमाणुवदाभाति क्वचिदेव न भाति च ॥१९॥ (६।६६।१७)
ईदृशं तत्परं सूक्ष्मं तस्याग्रे यदिदं नभः ।
अणोः पार्श्वे महामेरुरिव स्थूलात्म लक्ष्यते ॥२०॥(६।६६।१६)
स आत्मा तच्च विज्ञानं स शून्यं ब्रह्म तत्परम् ।
तच्छ्रेयः स शिवः शान्तः सा विद्या सा परा स्थितिः २१(६।५९।६)
योऽयमन्तश्चितेरात्मा सर्वानुभवरूपकः । (६।५९।७)
शरीरे संस्थितो नित्यं चिन्मात्रमिति विश्रुतः ॥२२॥ (३।७।२)
स जगत्तिलतैलात्मा स जगद्गृहदीपकः ।
स जगत्पादपरसः स जगत्पशुपालकः ॥ २३ ॥ (६।५९।८)
सन्नप्यसद्यो जगति यो देहस्थोऽपि दूरगः ।
चित्प्रकाशो ह्ययं यस्मादालोक इव भास्वतः ॥२४॥ (३।५।८)
यस्माद्विष्णवादयो देवाः सूर्यादिव मरीचयः ।
यस्माज्जगन्त्यनन्तानि बुद्बुदा जलधेरिव ॥२५॥ (३।५।९)
यं यान्ति दृश्यवृन्दानि पयांसीव महार्णवम् ।
य आत्मानं पदार्थं च प्रकाशयति दीपवत् ॥२६॥ (३।५।१०)

य आकाशे शरीरे च दृषत्स्वप्सु लतासु च ।
पांसुष्वद्रिषु वातेषु पातालेषु च संस्थितः ॥२७॥ (३।५।११)
व्योम येन कृतं शून्यं शैला येन घनीकृताः ।
आपो द्रुताः कृता येन दीपो यस्य वशो रविः ॥२८॥(३।५।१३)
प्रसरन्ति यतश्चित्राः संसारासारदृष्टयः ।
अक्षयामृतसम्पूर्णादम्भोदादिव वृष्टयः ॥ २९ ॥ (३।५।१४)
आविर्भावतिरोभावमयास्त्रिभुवनोर्मयः ।
स्फुरन्त्यतितते यस्मिन्मराविव मरीचयः ॥ ३० ॥ (३।५।१४)
नाशरूपो विनाशात्मा योऽन्तस्थः सर्वजन्तुषु ।
गुप्तो योऽप्यतिरिक्तोऽपि सर्वभावेषु संस्थितः ॥३१॥ (३।५।१६)
यश्चिन्मणिः प्रकचति प्रतिदेहसमुद्गके ।
यस्मिन्निन्दौ स्फुरन्त्येता जगज्जालमरीचयः ॥३२॥ (३।५।१८)
नियतिर्देशकालौ च चलनं स्पन्दनं क्रिया ।
इति येन गताः सत्तां सर्वसत्तातिगामिना ॥ ३३ ॥ (३।५।२२)
अत्यन्ताभाव एवास्ति संसारस्य यथास्थितेः ।
यस्मिन्बोधमहाम्बोधौ तद्रूपं परमात्मनः ॥ ३४ ॥ (३।७।२०)
द्रष्टृदृश्यक्रमो यत्र स्थितोऽप्यस्तमयं गतः ।
यद्नाकाशमाकाशं तद्रूपं परमात्मनः ॥ ३५ ॥ (३।७।२१)
अशून्यमिव यच्छून्यं यस्मिन्शून्यं जगत्स्थितम् ।
सर्गौघे सति यच्छून्यं तद्रूपं परमात्मनः ॥ ३६ ॥ (३।७।२२)
यन्महाचिन्मयमपि बृहत्पाषाणवत्स्थितम् ।
जडं वा जडमेवान्तस्तद्रूपं परमात्मनः ॥ ३७ ॥ (३।७।२३)

सबाह्याभ्यन्तरं येन सर्वं सम्प्राप्य सङ्गमम् ।
स्वरूपसत्तामाप्नोति तद्रूपं परमात्मनः ॥ ३८ ॥ (३।७।२४)
चिन्मात्रं चेत्यरहितमनन्तमजरं शिवम् ।
अनादिमध्यपर्यन्तं यदनादि निरामयम् ॥३९॥ (३।९।५०)
यस्मिञ्जगत्प्रस्फुरति दृष्टमौक्तिकहंसवत् ।
यश्चेदं यश्च नैवेदं देवः सदसदात्मकः ॥ ४० ॥ (३।९।५१)
अकर्णजिह्वानासात्वग्नेत्रः सर्वत्र सर्वदा ।
शृणोत्यास्वादयति यो जिघ्रेत्स्पृशति पश्यति ॥४१॥(३।९।५२)
यस्यान्यदस्ति न विभोः कारणं शशशृंगवत् ।
यस्येदं च जगत्कार्यं तरङ्गौघ इवाम्भसः ॥ ४२ ॥ (३।९।५५)
सस्पन्दे समुदेतीव निःस्पन्दान्तर्गतेन च ।
इयं यस्मिञ्जगल्लक्ष्मीरलात इव चक्रता ॥ ४३ ॥ (३।९।५८)
जगन्निर्माणविलयविलासो व्यापको महान् ।
स्पन्दास्पन्दात्मको यस्य स्वभावो निर्मलोऽव्ययः॥४४॥(३।९।५९)
स्पन्दास्पन्दमयी यस्य पवनस्येव सर्वगा ।
सत्तानाम्नैव भिन्नेव व्यवहारान्न वस्तुतः ॥ ४५ ॥ (३।९।६०)
यदस्पन्दं शिवं शान्तं यत्स्पन्दं त्रिजगत्स्थितिः ।
स्पन्दास्पन्दविलासात्मा य एको भरिताकृतिः॥४६॥(३।९।६२)
नाशयित्वा स्वमात्मानं मनसो वृत्तिसंक्षये ।
सद्रूपं यदनाख्येयं तद्रूपं तस्य वस्तुनः ॥ ४७ ॥ (३।१०।३९)
नास्ति दृश्यं जगद्द्रष्टा दृश्याभावाद्विलीनवत् ।
भातीति भासनं यत्स्यात्तद्रूपं तस्य वस्तुनः ॥४८॥ (३।१०।४०)

चितेर्जीवस्वभावाया यदचेत्योन्मुखं वपुः ।
चिन्मात्रं विमलं शान्तं तद्रूपं परमात्मनः ॥४९॥ (३।१०।४१)
अस्वप्नाया अनन्ताया अजडाया मनःस्थितेः ।
यद्रूपं चिरनिद्रायास्तत्तदानघ शिष्यते ॥ ५० ॥ (३।१०।४३)
वेदनस्य प्रकाशस्य दृश्यस्य तमसस्तथा ।
वेदनं यदनाद्यन्तं तद्रूपं परमात्मनः ॥ ५१ ॥ (३।१०।४७)
मनः स्वप्नेन्द्रियैर्मुक्तं यद्रूपं स्यान्महाचितेः ।
जङ्गमे स्थावरे वापि तत्सर्वान्तेऽवशिष्यते ॥५२॥ (३।१०।५२)
देशाद्देशान्तरं दूरं प्राप्ताया संविदो वपुः ।
निमेषेणैव तन्मध्ये चिदाकाशं तदुच्यते ॥ ५३ ॥ (३।१०६।४)
विनिवृत्ताखिलेच्छस्य पुंसः संशान्तचेतसः ।
यादृशः स्यात्समो भावः स चिदाकाश उच्यते ॥५४॥(३।१०६।६)
अनागतायां निद्रायां मनोविषयसङ्क्षये ।
पुंसः स्वस्थस्य यो भावः स चिदाकाश उच्यते ॥ (३।१०६।७)
रूपालोकमनस्कारविमुक्तस्यामृतस्य यः ।
भावः पुंसः शरद्व्योमविशदस्तच्चिदम्बरम् ॥५६॥ (३।१०६।९)
द्रष्टृदर्शनदृश्यानां त्रयाणामुदयो यतः ।
यत्र वास्तमयश्चित्त्वं तद्विद्धि विगतामयम् ॥५७॥ (३।१०६।११)
यत उद्यन्ति यस्मिंश्च चित्रा परिणमन्त्यलम् ।
पदार्थानुभवाः सर्वे चिदाकाशः स उच्यते॥५८॥(३।१०६।१२)
नेदं नेदं तदित्येवं सर्वं निर्णीय सर्वथा ।
यन्न किञ्चिस्सदा सर्वं तच्चिद्व्योमेति कथ्यते ॥ (३।१०६।१९)

संवेद्येनापरामृष्टं शान्तं सर्वात्मकं च यत् ।
तत्सच्चिदाभासमयमस्तीह कलनोज्झितम् ॥ ६० ॥ (३।९।२)
मूकोपमोऽपि योऽमूको मन्ता योऽप्युपलोपमः ।
यो भोक्ता नित्यतृप्तोऽपि कर्ता यश्चाप्यकिंचन ॥६१॥ (३।९।६४)
योऽनङ्गोऽपि समस्ताङ्गः सहस्रकरलोचनः ।
न किंचित्संस्थितेनापि येन व्याप्तमिदं जगत् ॥६२॥ (३।९।६५)
निरिन्द्रियबलस्यापि यस्याशेषेन्द्रियक्रियाः ।
यस्य निर्मननस्यैता मनोनिर्माणरीतयः ॥६३॥ (३।९।६६)
साक्षिणि स्फार आभासे ध्रुवे दीप इव क्रियाः ।
सति यस्मिन्प्रवर्तन्ते चित्तेहाः स्पन्दपूर्विकाः ॥६४॥(३।९।६८)
यस्माद्घटपटाकारपदार्थशतपङ्क्तयः ।
तरङ्गगणकल्लोलवीचयो वारिधेरिव ॥ ६५ ॥ (३।९।६९)
स एवान्यतयोदेति यत्पदार्थशतभ्रमैः ।
कटकाङ्गदकेयूरनूपुरैरिव काञ्चनम् ॥ ६६ ॥ (३।९।७०)
यतः कालस्य कलना यतो दृश्यस्य दृश्यता ।
मानसी कलना येन यस्य भासा विभासनम् ॥६७॥ (३।९।७३)
क्रियां रूपं रसं गन्धं शब्दं स्पर्शं च चेतनम् ।
यद्वेत्सि तदसौ देवो येन वेत्सि तदप्यसौ ॥६८॥ (३।९।७४)
परमाणोरपि परं तदणीयो ह्यणीयसः ।
शुद्धं सूक्ष्मं परं शान्तं तदाकाशोदरादपि ॥६९॥ (३।१०।३२)
दिक्कालाद्यनवच्छिन्नरूपत्वादतिविस्तृतम् ।
तदानाद्यन्तमाभासं भासनीयविवर्जितम् ॥ ७० ॥ (३।१०।३३)

यद्व्योम्नो हृदयं यद्वा शिलायाः पवनस्य च ।
तस्याचेत्यस्य चिद्व्योम्नस्तद्रूपं परमात्मनः ॥७१॥(३।१०।४४)
अचेत्यस्यामनस्कस्य जीवतो या स्वभावतः ।
स्यात्स्थितिः सा परा शान्ता सत्ता तस्याद्यवस्तुनः(३।१०।४५)
स्थावराणां हि यद्रूपं तच्चेद्बोधमयं भवेत् ।
मनोबुद्ध्यादिनिर्मुक्तं तत्परेणोपमीयते ॥७३॥ (३।१०।५३)
चित्प्रकाशस्य यन्मध्यं प्रकाशस्यापि खस्य वा ।
दर्शनस्य च यन्मध्यं तद्रूपं ब्रह्मणो विदुः ॥७४॥ (३।१०।४६)
पदार्थौघस्य शैलादेर्बहिरन्तश्च सर्वदा ।
सत्ता सामान्यरूपेण या चित्सोऽहमलेपकः ॥७५॥(६।११।६०)
जाग्रत्स्वप्नसुषुप्तेषु तुर्यातुर्यातिगे पदे ।
समं सदैव सर्वत्र चिदात्मानमुपास्महे ॥ ७६ ॥ (६।११।६८)
परमाकाशनगरनाट्यमण्डपभूमिषु ।
स्वशक्तिवृत्तं संसारं पश्यन्ती साक्षिवत्स्थिता ॥७७॥(६।३७।१२)
प्रत्यक्षादेरगम्यत्वात्किमप्येव तदुत्तमम् ।
सर्वं सर्वात्मकं सूक्ष्ममच्छानुभवमात्रकम्॥ ७८ ॥ (६।६८।२७)
न सन्नासन्न मध्यान्तं न सर्वं सर्वमेव च ।
मनोवचोभिरग्राह्यं शून्याच्छून्यं सुखात्सुखम् ॥७९॥(३।११९।२३)



१२—बृंहणम्

[१] ब्रह्मबृंहणं जगत् :–

ब्रह्मबृंहैव हि जगज्जगच्च ब्रह्मबृंहणम् । (६/२।२।५१)
ब्रह्मैव तद्‌नाद्यन्तमब्धिवत्सविजृम्भते ॥ १ ॥ (६/२।२।२७)

आत्मैव स्पन्दते विश्वं वस्तुजातैरिवोदितम् ।
तरङ्गकणकल्लोलैरनन्ताम्ब्वम्बुधाविव ॥ २ ॥ (५।७२।२३)

यदिदं किञ्चिदाभोगि जगज्जालं प्रदृश्यते ।
तत्सर्वममलं ब्रह्म भवत्येतद्व्यवस्थितम् ॥ ३ ॥ (६/१।११।१६)

चिदाकाशमिदं पुत्र स्वच्छं कचकचायते ।
अनाम तज्जगद्भाति जगदन्यन्न विद्यते ॥ ४ ॥ (६/२।२१३।१८)

इदमाद्यन्तरहितं सर्वं संसारनामकम् ।
चिच्चमत्कृतिनामात्म नभः कचकचायते ॥ ५ ॥ (६/२।६६।८)

यदिदं भासते तत्सत्परमेवात्मनि स्थितम् ।
परं परे परापूर्णं सममेव विजृम्भते ॥ ६ ॥ (६/१।६६।१८)

जायते नश्यति तथा यदिदं याति तिष्ठति ।
तदिदं ब्रह्मणि ब्रह्म ब्रह्मणा च विवर्तते ॥७॥ (३।१००।२८)

शून्यं शून्ये समुच्छूनं ब्रह्म ब्रह्मणि बृंहितम् ।
सत्यं विजृम्भते सत्ये पूर्णे पूर्णमिव स्थितम् ॥८॥ (६/२।३।११)

ब्रह्म ब्रह्मणि बृंहाभिर्ब्रह्मशक्त्येव बृंहति । (६/१।११।२०)
स्फुरति ब्रह्मणि ब्रह्म नाहमस्मीतरात्मकः ॥९॥ (६/१।११।२३)

अज्ञानमेव यद्भाति संविदाभासमेव तत् ।
यज्जगद्दृश्यते स्वप्ने संवित्कचनमेव तत् ॥१०॥ ३।११।१६)
यथा पुरमिवास्तेऽन्तर्विदेव स्वप्नसंविदः ।
तथा जगदिवाभाति स्वात्मैव परमात्मनि ॥११॥ (३।११।२०)
यदिदं भासते किञ्चित्तत्तस्यैव निरामयम् ।
कचनं काचकस्येव कान्तस्यातिमणेरिव ॥ १२ ॥ (३।२१।६८)
नेह प्रजायते किञ्चिन्नेह किञ्चिद्विनश्यति ।
जगद्गन्धर्वनगररूपेण ब्रह्म जृम्भते ॥ १३ ॥ (३।६७।६६)
अपारावारविस्तारसंवित्सलिलवल्गनैः ।
चिदेकार्णव एवायं स्वयमात्मा विजृम्भते ॥ १४ ॥ (३।६५।४)
ब्रह्मणा चिन्मयेनात्मा सर्गात्मैव विभाव्यते ।
न भाव्यते चानन्यत्वाद्बीजेनान्तरिव द्रुमः ॥१५॥ (३।६१।२६)
शुद्धचिन्मात्रममलं ब्रह्मास्तीह हि सर्वगम् ।
तद्यथा सर्वशक्तित्वाद्विन्दते याः स्वयं कलाः॥१६॥(३।१४।२१)
चिन्मात्रानुक्रमेणैव सम्प्रफुल्ललतामिव ।
ननु मूर्तामभूर्तां वा तामेवाशु प्रपश्यति ॥ १७ ॥ (३।१४।२२)
यथा स्वप्ने सुषुप्ते च निद्रैकैवात्तयानिशम् ।
सर्गेऽस्मिन्प्रलये चैव ब्रह्मैकं चितिरव्ययम् ॥१८॥ (६।२१३।२२)
तस्मात्स्वप्नवदाभासः संविदात्मनि संस्थितः ।
सर्गादिनानाकृतिना परमात्मा निराकृतिः ॥१९॥(६।१६५।४४)
दिक्कालाद्यनवच्छिन्नमदृष्टोभयकोटिकम् ।
एकं ब्रह्मैव हि जगत्स्थितं द्वित्वमुपागतम् ॥२०॥ (६।२।२३)

यः कणो या च कणिका या वीचिर्यस्तरङ्गकः ।
यः फेनो या च लहरी तद्यथा वारि वारिणि ॥२१॥(६।११।४०)
यो देहो या च कलना यद्दृश्यं यौ क्षयाक्षयौ ।
या भावरचना योऽर्थस्तथा तद्ब्रह्म ब्रह्मणि ॥२२॥ (६।११।४१)
पाताले भूतले स्वर्गे तृणे प्राण्यम्बरेऽपि च ।
दृश्यते तत्परं ब्रह्म चिद्रूपं नान्यदस्ति हि ॥ २३ ॥ (६।२।२८)

[२] त्रिजगच्चिदन्तरस्ति :—

फलपुष्पलतापत्रशाखाविटपमूलवान् ।
वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् ॥१॥(३।१००।११)
सूर्यकान्ते यथा वह्निर्यथा क्षीरे घृतं तथा । (६।९।२७)
तत्रेदं संस्थितं सर्वं देशकालक्रमोदये ।
यथा स्फुलिङ्गा अनलाद्यथा भासो दिवाकरात् ॥२॥(६।९।२८)
तस्मात्तथेमा निर्यान्ति स्फुरन्त्याः संविदश्चितः ।.३॥ (६।९।२९)
यथाम्भोधिस्तरङ्गाणां यथामलमणिस्त्विषाम् । (६।९।२९)
कोशो नित्यमनन्तानां तथा तत्संविदां त्विषाम् ॥४॥(६।९।३०)
वटश्च वटधानायामिव पुष्पफलादिमान् । (६।९।२६)
चिदन्तरस्ति त्रिजगन्मरिचे तीक्ष्णता यथा ॥ ५ ॥ (६।२।५२)
यथैतत्सरणं वायौ तथा सर्गः स्थितः परे ।
असत्कल्पेऽपि सत्कल्पः सत्येऽसत्य इवापि च ॥६॥(३।६१।२२)
अन्यरूपा यथाऽनन्या तेजस्यालोकतोदरे ।
तथा ब्रह्मणि विश्वश्रीः सत्यासत्यात्मिका चिति ७(३।६१।२३)

अनुत्कीर्णा यथा पङ्के पुत्रिका चाऽथ दारुणि ।
यथा वर्णा मषीकल्पे तथा सर्गाः स्थिताः परे ॥८॥(३।६१।२४)

[३] ब्रह्मैव जगद्भाति :—

सत्यं ब्रह्म जगच्चैकं स्थितमेकमनेकवत् ।
सर्वं वा सर्ववद्भाति शुद्धं चाशुद्धवत्ततम् ॥ १ ॥ (६।३५।६)
अशून्यं शून्यमिव च शून्यं वाऽशून्यवत्स्फुटम् ।
स्फारमस्फारमिव तदस्फारं स्फारसन्निभम् ॥ २ ॥ (६।३५।७)
अविकारं विकारीव समं शान्तमशान्तवत् ।
सदेवासदिवादृश्यं तदेवातदिवोदितम् ॥ ३ ॥ (६।३५।८)
अविभागं विभागीव निर्जाड्यं जडवद्गतम् ।
अचेत्यं चेत्यभावीव निरंशं सांशशोभनम् ॥ ४ ॥ (६।३५।९)
अनहं सोहमिव तदनाशमिव नाशवत् ।
अकलङ्कं कलङ्कीव निर्वेद्यं वेद्यवाहिवत् ॥ ५ ॥ (६।३५।१०)
आलोकि ध्वान्तघनवन्नववच्च पुरातनम् ।
परमाणोरपि तनु गर्भीकृतजद्गतम् ॥ ६ ॥ (६।३५।११)
सर्वात्मकमपि त्यक्तं दृष्टं कष्टेन भूयसा ।
अजालमपि जालाढ्यं चाशेषवदनेकधा ॥ ७ ॥ (६।३५।१२)
निर्मायमपि मायांशुमण्डलामलभास्करम् ।
ब्रह्म विद्धि विदां नाथमपामिव महोदधिम् ॥८॥ (६।३५।१३)

[४] चित्स्वभाव एव जगद्भासनम् :—

एष एव स्वभावोऽस्या यदेवं भाति भासुरा । (६।१६१।१०)
एतत्तु स्वप्नसङ्कल्पनगरेष्वनुभूयते ॥ १ ॥ (६।१६१।११)

[५] ब्रह्माणि सर्गकालोऽपि निमेषांशमात्रम् :—

तुल्यकालनिमेषांशलक्षभागप्रतीति यत् ।
निजं विदः प्रकचनं तत्सर्गौघपरम्परा ॥ १ ॥ (३।६१।१७)
क्षणकल्पजगत्संघा समुद्यन्ति गलन्ति च ।
निमेषात्कस्यचित्कल्पात्कस्यचिच्च क्रमं शृणु ॥२॥ (३।४०।३०)

[६] एकस्मिन्नेव ब्रह्माणि नानारूपसर्गताशक्तिः :—

चिति तत्त्वेऽस्ति नानाता तदभिव्यञ्जनात्मनि ।
विचित्रपिच्छिकापुञ्जो मयूराण्डरसे यथा ॥ १ ॥(६।४७।२६)
स्फटिकान्तः सन्निवेशः स्थाणुताऽवेदनाद्यथा ।
शुद्धेऽनानापि नानेव तथा ब्रह्मोदरे जगत् ॥ २ ॥ (३।६७।३५)
ब्रह्म सर्वं जगद्वस्तु पिण्डमेकमखण्डितम् ।
फलपत्रलतागुल्मपीठबीजमिव स्थितम् ॥ ३ ॥ (३।६७।३६)
एकमेव चिदाकाशं साकारत्वमनेककम् ।
स्वरूपमजहद्धत्ते यत्स्वप्न इव तज्जगत् ॥ ४ ॥ (६।१४४।२३)
यथोर्म्यादि जले वृक्षे यथा वा शालभञ्जिकाः ।
यथा घटादयो भूमौ तथा ब्रह्मणि सर्गता ॥ ५ ॥ (६।३४।२५)

तेजःपुञ्जैर्यथा तेजः पयःपूरैर्यथा पयः ।
परिस्फुरति सस्पन्दैस्तथा चित्सर्गविभ्रमैः ॥ ६ ॥ (४।३६।१६)

[७] न ब्रह्म स्वास्मिन्नानात्वसंस्पृष्टम् ।

चित्स्थैः सर्गैश्चिदाधारैर्न स्पृष्टा चित्परा तथा ।
स्वाधारैरम्बुदैः स्वस्थैर्न स्पृष्टं गगनं यथा ॥ १ ॥ (४।३६।५)
जगदाख्ये महास्वप्ने स्वप्नात्स्वप्नान्तरं व्रजत् ।
रूपं त्यजति नो शान्तं ब्रह्म शान्तत्वबृंहणाम् ॥२॥ (६।७२।३)
यथा पयसि वीचीनामुन्मज्जननिमज्जनैः ।
न जलान्यत्वमेवं हि भावाभावैः परैः पदे ॥३॥ (६।१९५।२७)

[८] सन्निधिमात्रेण कर्तृताऽऽत्मनः—

सर्वकर्ताऽप्यकर्तैव करोत्यात्मा न किञ्चन ।
तिष्ठत्येवमुदासीन आलोकं प्रति दीपवम् ॥ १ ॥ (४।५६।१७)
कुर्वन्न किञ्चित्कुरुते दिनाकार्यमिवांशुमान् ।
गच्छन्न गच्छति स्वस्थः स्वास्पदस्थो रविर्यथा॥२॥(४।५६।१८)
सङ्कल्पपुरुषस्वप्नजनद्वीन्दुत्वविभ्रमम् ।
यथा पश्यसि पश्य त्वं भावजातमिदं तथा ॥ ३ ॥ (४।५६।२४)
इयं सन्निधिमात्रेण नियतिः परिजृम्भते ।
दीपसन्निधिमात्रेण निरिच्छैव प्रकाशते ॥ ४ ॥ (४।५५।२७)

अभ्रसन्निधिमात्रेण कुटजानि यथा स्वयम् ।
आत्मसन्निधिमात्रेण त्रिजगन्ति तथा स्वयम् ॥५॥(४।५६।२८)
सर्वेच्छारहिते भानौ यथा व्योमनि तिष्ठति ।
जायते व्यवहारश्च सति देवे तथा क्रिया ॥६॥ (४।५६।२९)
निरिच्छे संस्थिते रत्ने यथालोकः प्रवर्तते ।
सत्तामात्रेण देवे तु तथैवायं जगद्गणः ॥ ७ ॥ (४।५६।३०)
अतः स्वात्मनि कर्तृत्वमकर्तृत्वं च संस्थितम् ।
निरिच्छत्वादकर्तासौ कर्ता सन्निधिमात्रतः ॥८॥ (४।५६।३१)
सर्वेन्द्रियाद्यतीतत्वात्कर्ता भोक्ता न सन्मयः ।
इन्द्रियान्तर्गतत्वात्तु कर्ता भोक्ता स एव हि ॥९॥(४।५६।३२)
सर्वदैवाविनाशात्म कुम्भानां गगनं यथा ।
यथा मणेरयःस्पन्दे अयस्कान्तस्य कर्तृता ॥ १० ॥ (६।९।३१)
अकर्तुरेव हि तथा कर्तृता तस्य कथ्यते ।
मणिसन्निधिमात्रेण यथाऽयः स्पन्दते जडम् ॥११॥ (६।९।३२)

१३—तादात्म्यम्

द्वैतं यथा नास्ति चिदात्मजीवयोस्तथैव भेदोऽस्ति न जीव चित्तयोः
यथैव भेदोऽस्ति न जीवचित्तयोस्तथैव भेदोऽस्ति न देहकर्मणोः ॥
॥ १ ॥ (३।६५।१२)

कर्मैव देहो ननु देह एव चित्तं तदेवाहमितीह जीवः ।
स जीव एवेश्वरचित्स आत्मा सर्वः शिवस्त्वेकपदोक्तमेतत् ॥
॥ २ ॥ (३।६५।१२)

[१] प्रकृतेरात्मनस्तादात्म्यम् :—

नात्मनः प्रकृतिर्भिन्ना घटान्मृन्मयता यथा ।
सन्मृन्मात्रं यथा चान्तरात्मैवं प्रकृतिः स्थिता ॥१॥(६।४९।२९)
आवर्तः सलिलस्येव यः स्पन्दस्त्वयमात्मनः ।
प्रोक्तः प्रकृतिशब्देन तेनैवेह स एव हि ॥ २ ॥ (६।४९।३०)
यथैकः स्पन्दपवनौ नाम्ना भिन्नौ न सत्तया ।
तथैकमात्मप्रकृती नाम्ना भिन्नौ न सत्तया ॥ ३ ॥ (६।४९।३१)
अबोधादेतयोर्भेदो बोधेनैव विलीयते ।
अबोधात्सन्मयो याति रज्ज्वां सर्पभ्रमो यथा ॥४॥(६।४९।३२)
यद्ब्रह्मात्मापि तुर्यश्च या विद्या प्रकृतिश्च या ।
तदभिन्नसदैकात्म यथा कुम्भशतेषु मृत् ॥ ५ ॥ (६।४९।२८)
ब्रह्माहं त्रिजगद्ब्रह्म त्वं ब्रह्म खलु दृश्यभूः ।
द्वितीया कलना नास्ति यथेच्छसि तथा कुरु ॥६॥ (६।४९।२३)

अविद्येयमयं जीव इत्यादिकलनाक्रमः ।
अप्रबुद्धप्रबोधाय कल्पितो वाग्विदां वरैः ॥ ७ ॥ (६।४९।१७)

[२] मनसो ब्रह्मणस्तादात्म्यम् :—

प्रतियोगिव्यवच्छेदसंख्यारूपादयश्च ये ।
मनःशब्दैः प्रकल्प्यन्ते ब्रह्मजान्ब्रह्म विद्धि तान् ॥१॥(३।१००।२३)
ब्राह्मी शक्तिरसौ तस्माद्ब्रह्मैव तदरिन्दम । (३।१००।१७)
अन्यनां तस्य तां विद्धि स्पन्दशक्तिं मनोमयीम् ॥२॥ (६।८४।२)

[३] जगतो ब्रह्मणस्तादात्म्यम् :—

यथा कटकशब्दार्थः पृथक्त्वार्हो न काञ्चनात् ।
न हेमकटकात्तद्वज्जगच्छब्दार्थता परे ॥ १ ॥ (३।१।१७)
अनन्यच्छान्तमाभासमात्रमाकाशनिर्मलम् ।
ब्रह्मैव जगदित्येतत्सर्वं सत्यावबोधतः ॥ २ ॥ (३।९।३०)
कटकत्वं पृथग्घेम्नस्तरङ्गत्वं पृथग्जलात् ।
यथा न संभवत्येवं न जगत्पृथगीश्वरात् ॥ ३ ॥ (३।६१।४)
यथोर्मयोऽनभिव्यक्ता भाविनः पयसि स्थिताः ।
न स्थिताश्चात्मनोऽन्यत्वाच्चित्तत्त्वे सृष्टयस्तथा ॥४॥ (४।३६।२)
स्पन्दत्वं पवनादन्यन्न कदाचन कुत्रचित् ।
स्पन्द एव सदा वायुर्जगत्तस्मान्न विद्यते ॥५॥ (३।९।३३)
काकतालीयवच्चित्त्वाज्जगतो भाति ब्रह्म खम् ।
स्वप्नसंकल्पपुरवत्तत्तस्माद्भिद्यते कथम् ॥६॥ (६।३४।२४)

यथा न भिन्नमनलादौष्ण्यं सौगन्ध्यमम्बुजात् ।
कार्ष्ण्यं कज्जलतः शौक्ल्यं हिमान्माधुर्यमिक्षुतः ॥७॥ (६।३।५)
आलोकश्च प्रकाशाङ्गादनुभूतिस्तथा चितेः ।
जलाद्वीचिर्यथाऽभिन्ना चित्स्वभावात्तथा जगत् ॥८॥ (६।३।६)
यदात्ममरिचस्यान्तश्चित्त्वात्तीक्ष्णत्ववेदनम् । (५।५७।१)
यदात्मलवणस्यान्तश्चित्त्वाल्लवणवेदनम् ॥ ९ ॥ (५।५७।२)
स्वतो यदन्तरात्मेक्षोश्चित्त्वान्माधुर्यवेदनम् । (५।५७।३)
स्वतो यदात्मदृषदश्चित्त्वात्काठिन्यवेदनम् ॥१०॥ (५।५७।४)
स्वतो यदात्मशैलस्य ज्ञतया जाड्यवेदनम् । (५।५७।५)
स्वतो यदात्मतोयस्य चिद्द्रवत्वादिवर्तनम् ॥११॥ (५।५७।६)
यदात्मगगनस्यान्तश्चित्त्वाच्छून्यत्ववेदनम् । (५।५७।८)
स्वतो यदात्मवृक्षस्य शाखादिस्तस्य वेदनम् ॥१२॥ (५।५७।७)
स्वतो यदात्मकुड्यस्य नैरन्तर्यं निरन्तरम् । (५।५७।१०)
स्वतो यदात्मसत्तायाश्चित्त्वात्सत्त्वैकवेदनम् ॥१३॥ (५।५७।११)
अन्तरात्मप्रकाशस्य स्वतो यदवभासनम् । (५।५७।१२)
परमात्मगुडस्यान्तर्यच्चित्स्वादूदयात्मकम् ॥१४॥ (५।५७।१४)
अन्तरस्ति यदात्मेन्दोश्चिद्रूपं चिद्रसायनम् ।
स्वत आस्वादितं तेन तदहंतादिनोदितम् ॥१५॥ (५।५७।१३)
अनया तु वचोभङ्ग्या मया ते रघुनन्दन ।
नाहंतादिजगत्तादिभेदोऽस्तीति निदर्शितम् ॥१६॥ (५।५७।१९)
चिद्रूपेण स्वसंवित्त्या स्वचिन्मात्रं विभाव्यते ।

स्वयमेव रूपहृदयं वातेन स्पन्दनं यथा ॥१७॥ (३।६१।११)
यथा क्षीरस्य माधुर्यं तीक्ष्णत्वं मरिचस्य च ।
द्रवत्वं पयसश्चैव स्पन्दनं पवनस्य च ॥ १८ ॥ (३।६१।२७)
स्थितोऽनन्यो यथाऽन्यः सन्नास्ति तत्र तथात्मनि ।
सर्गो निर्गलचिद्रूपः परमात्मात्मरूपभृत् ॥१९॥ (३।६१।२८)
कचनं ब्रह्मरत्नस्य जगदित्येव यत्स्थितम् ।
तद्कारणकं यस्मात्तेन न व्यतिरिच्यते ॥२०॥ (३।६१।२९)
चिदग्न्यौष्ण्यं जगल्लेखा जगच्चिच्छङ्खशुक्लता ।
जगच्चिच्छैलजठरं चिज्जलद्रवता जगत् ॥२१॥ (३।१४।७२)
जगच्चिदिक्षुमाधुर्यं चित्क्षीरस्निग्धता जगत् ।
जगच्चित्क्षौद्रमाधुर्यं जगच्चित्कनकाङ्गदम् ॥२२॥ (३।१४।७३)
जगच्चित्सर्षपस्नेहो वीचिश्चित्सरितो जगत् ।
जगच्चिद्धिमशीतत्वं चिज्ज्वालाज्वलनं जगत् ॥२३॥(३।१४।७४)
जगच्चित्पुष्पसौगन्ध्यं चिल्लताग्रफलं जगत् ।
चित्सत्तैव जगत्सत्ता जगत्सत्तैव चिद्वपुः ॥२४॥ (३।१४।७५)
चित्त्वं चेत्यविकल्पेन स्वयं स्फुरति तन्मयम् ।
विकारादि तदेवान्तस्तत्सारत्वान्न भिद्यते ॥२५॥ (६।३३।७)
पुष्पपल्लवपत्रादि लताया नेतरद्यथा ।
द्वित्वैकत्वजगत्त्वादि त्वन्त्वाहंत्वं तथा चितेः ॥२६॥(६।३३।१२)
अविकल्पतदात्मत्वात्सत्त्वासत्त्वैकतैव च ।
अवयवावयविता शब्दार्थौ शशशृङ्गवत् ॥ २७ ॥ (३।१४।७७)

[४] जगद्विना नेशस्य संस्थितिः :—

सन्निवेशं विना सत्ता यथा हेम्नो न विद्यते। (६/९६/४३)
तथा जगदहंभावं विना नेशस्य संस्थितिः ॥१॥ (६/९६/४४)
चित्सत्त्वैव जगत्सत्ता जगत्सत्त्वैव चिद्वपुः ॥ २ ॥ (३/१४/७५)
अत्र भेदविकारादि नखे मलमिव स्थितम् ॥ ३ ॥ (३/१४/७६)

[५] सर्वं खल्विदं ब्रह्म :—

करणं कर्म कर्ता च जननं मरणं स्थितिः ।
सर्वं ब्रह्मैव नह्यस्ति तद्विना कल्पनेतरा ॥१॥ (३/१००/३०)
ब्रह्मव्योम जगज्जालं ब्रह्मव्योम दिशो दश ।
ब्रह्मव्योम कलाकालदेशद्रव्यक्रियादिकम् ॥२॥ (६ ६०/२८)
पदार्थजातं शैलादि यथा स्वप्ने पुरादि च ।
चिदेवैकं परं व्योम तथा जाग्रत्पदार्थभूः ॥ ३ ॥ (६/५६/३)
परमार्थघनं पृथ्वी परमार्थघनं नभः ।
परमार्थघनं शैलाः परमार्थघनं द्रुमाः ॥ ४ ॥ (३/५५/४५)
यदिदं किञ्चिदाभोगि जगज्जालं प्रदृश्यते ।
तत्सर्वममलं ब्रह्म भवत्येतद्व्यवस्थितम् ॥ ५ ॥ (६/११/१६)
पाताले भूतले स्वर्गे तृणे प्राण्यम्बरेऽपि च ।
दृश्यते तत्परं ब्रह्म चिद्रूपं नान्यदस्ति हि ॥ ६ ॥ (६/२/२८)

१४—जगन्मिथ्यात्वम्

मायेयं स्वप्नवद्भ्रान्तिर्मिथ्यारचितचक्रिका ।
मनोराज्यमिवालोलसलिलावर्तसुन्दरी ॥ १ ॥ (४।४७।४१)

[१] सत्यासत्यानिर्णयः :—

आदावन्ते च यन्नित्यं तत्सत्यं नाम नेतरत् । (५।५।६)
आदावन्ते च यत्सत्यं वर्तमाने सदैव तत् ॥ १ ॥(४।४५।४६)
आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा । (४।४५।४५)
आदावन्ते च यन्नास्ति कीदृशी तस्य सत्यता ॥२॥ (५।५।६)
यदस्ति तस्य नाशोऽस्ति न कदाचन राघव ॥३॥ (३।४।६२)

[२] न सन्नासज्जगत् :—

न सन्नासन्न सञ्जातश्चेतसो जगतो भ्रमः ।
अथ धीसमवायानामिन्द्रजालमिवोत्थितः ॥ १ ॥ (३।६५।६)
नातः सत्यमिदं दृश्यं न चासत्यं कदाचन । (३।४४।३३)
न तत्सत्यं न चासत्यं रज्जुसर्पभ्रमो यथा ॥ २ ॥ (३।४४।४१)
न सत्यं न च मिथ्यैव स्वप्नजालमिवोत्थितम् । (६।११४।२०)
एवं न सन्नासदिदं भ्रान्तिमात्रं विभासते ॥३॥ (३।४४।२७)

[३] जगतः सदसन्मयत्वम् :—

सती वाप्यसती तापनद्येव लहरी चला ।

मनसेन्द्रजालश्रीर्जगती प्रवितन्यते ॥ १ ॥ (३।१।२९)
असत्यमस्थैर्यवशात्सत्यं संप्रतिभा सतः ।
यथा स्वप्नस्तथा चित्तं जगत्सदसदात्मकम् ॥ २ ॥ (३।६५।५)
यथा नभसि मुक्तालीपिच्छकेशोण्डूकादयः ।
असत्याः सत्यतां याता भात्येवं दुर्दृशां जगत् ॥३॥ (३।४२।७)
असत्यमेव सत्याभं प्रतिभानमिदं स्थितम् । (३।५४।२१)
अकृतं चानुभूतं च न सत्यं सत्यवत्स्थिम् ॥४॥ (३।१३।४२)

[४] जगतो भ्रान्तिमात्रत्वम् :—

एवं तावदिदं विद्धि दृश्यं जगदिति स्थितम् ।
अहं चेत्याद्यनाकारं भ्रान्तिमात्रमसन्मयम् ॥ १ ॥ (४।१।२)
मृगतृष्णाम्बिवासत्यं सत्यवत्प्रत्ययप्रदम् । (४।१।७)
अनुभूतं मनोराज्यमिवासत्यमवास्तवम् ॥ २ ॥ (४।१।१२)
शून्ये प्रकचितं नानावर्णमाकारितात्मकम् ।
अपिण्डगृहमाशून्यमिन्द्रचापमिवोत्थितम् ॥ ३ ॥ (४।१।२३)
जगदादावनुत्पन्नं यच्चेदमनुभूयते ।
तत्संविद्व्योमकचनं स्वप्नस्त्रीसुरतं यथा ॥ ४ ॥ (३।५४।२०)
मृगतृष्णा यथा तापान्मनसोऽनिश्चयात्तथा ।
असन्त इव दृश्यन्ते सर्वे ब्रह्मादयोऽप्यमी ॥ ५ ॥ (४।४५।१७)
मिथ्याज्ञानघनाः सर्वे जगत्याकारराशयः ।
यथा नौयायिनो मिथ्या स्थाणुस्पन्दमतिस्तथा ॥६॥(४।४५।१८)

मनोव्यामोह एवेदं रज्ज्वामहिभयं यथा ।
भावनामात्रवैचित्र्याच्चिरमावर्तते जगत् ॥७॥ (४।४५।२६)
मिथ्यात्मिकैव सर्गश्रीर्भवतीह महामरौ ।
तीरद्रुमलतोन्मुक्तपुष्पालीव तरङ्गिणी ॥ ८ ॥ (३।६२।४)
स्वप्नेन्द्रजालपुरवत्संकथेहापुराद्रिवत् ।
संकल्पवदसस्यैव भाति सर्गानुभूतिभूः ॥ ६ ॥ (३।६२।५)
समस्तस्याप्रबुद्धस्य मनोजातस्य कस्यचित्
बीजं विना मृषैवेयं मिथ्यारूढिमुपागता ॥१०॥ (३।५७।१६)
स्वप्नोपलम्भं सर्गाख्यं स सर्वोऽनुभवन्स्थितः ।
चिरमावृत्तदेहात्मा भूचक्रभ्रमणं यथा ॥ ११ ॥ (३।५७।२०)
मिथ्यादृष्टय एवेमाः सृष्टयो मोहदृष्टयः ।
मायामात्रदृशो भ्रान्तिः शून्याः स्वप्नानुभूतयः॥१२॥(३।५७।५४)
प्रतिभाससमुत्थानं प्रतिभासपरिक्षयम् ।
यथा गन्धर्वनगरं तथा संसृतिविभ्रमः ॥१३॥ (६।३३।४५)
स्वप्नार्थमृगतृष्णाम्बुद्वीन्दु सङ्कल्पितार्थवत् ।
मिथ्या जगदहं त्वं च भाति केशोण्ड्रकं यथा॥१४॥(६।१६०।१३)
मायामात्रकमेवेदमरोधकमभित्तिमत् ।
इदं भास्वरमाभातं स्वप्नसंदर्शनं स्थितम् ॥१५॥ (३।६०।३६)
भ्रान्तिरेवमनन्तेऽयं चिद्व्योमव्योम्नि भासुरा ।
अपकुड्या जगन्नाम्नी नगरी कल्पनात्मिका ॥१६॥ (३।२१।४)
एतज्जालमसद्रूपं चिद्भानोः समुपस्थितम् ।
यथा स्वप्नमुहूर्तेऽन्तः सम्वत्सरशतभ्रमः ॥१७॥ (३।४१।५०)

यथा सङ्कल्पनिर्माणे जीवनं मरणं पुनः ।
यथा गन्धर्वनगरे कुडयमण्डनवेदनम् ॥ १८ ॥ (३।४१।५१)

यथा नौयानसंरम्भे वृक्षपर्वतवेपनम् ।
यथा स्वधातुसंक्षोभे पूर्वपर्वतनर्तनम् ॥१९॥ (३।४१।५२)

यथा समञ्जसं स्वप्ने स्वशिरःप्रविकर्तनम् ।
मिथ्यैवैवमियं प्रौढा भ्रान्तिराततरूपिणी ॥२०॥ (३।४१।५३)

यथा मरौ जलं बुद्धं कटकत्वं च हेमनि ।
असत्सदिव भातीदं तथा दृश्यत्वमात्मनि ॥२१॥(३।२८।१५)

ससर्वावरणा एते महत्यन्तर्विवर्जिते ।
ब्रह्माण्डा भान्ति दुर्दृष्टेर्व्योम्नि केशोण्डूको यथा २२(३।३०।१०)

यथा द्वित्वं शशाङ्कादौ पश्यत्यक्षिमलाविलम् ।
चिच्चेतनकलाक्रान्ता तथैव परमात्मनि ॥ २३ ॥ (३।६६।७)

यथा मदवशाद्भ्रान्तान्क्षीबः पश्यति पादपान् ।
तथा चेतनविक्षुब्धान्संसरांश्चित्प्रपश्यति ॥ २४ ॥ (३।६६।८)

यथा लीलाभ्रमाद्बालाः कुम्भकृच्चक्रवज्जगत् ।
भ्रान्तं पश्यन्ति चित्तात्तु विद्धि दृश्यं तथैव हि॥२५॥(३।६६।९)

पत्रमात्रादृते नान्यत्कदल्या विद्यते यथा ।
भ्रममात्रादृते नान्यज्जगतो विद्यते तथा ॥ २६ ॥ (२।६६।४)

अलीकमिदमुत्पन्नमलीकं च विवर्धते ।
अलीकमेव स्वदते तथालीकं विलीयते ॥ २७ ॥ (३।६७।७६)

[५] जीवस्य मिथ्यात्वम् :—

आत्मैवानात्मवदिह जीवो जगति राजते ।
द्वीन्दुत्वमिव दुर्दृष्टेः सच्चासच्च समुत्थितम् ॥१॥ (३।१००।३५)
चिच्छक्तेः स्पन्दशक्तेश्च सम्बन्धः कल्प्यते मनः ।
मिथ्यैव तत्समुत्पन्नं मिथ्याज्ञानं तदुच्यते ॥ २ ॥ (५।१३।८८)
एषा ह्यविद्या कथिता मायैषा सा निगद्यते ।
परमेतत्तदज्ञानं संसारादिविषप्रदम् ॥ ३ ॥ (५।१३।८९)

[६] अविद्या :—

संसारबीजकणिका यैषा विद्या रघूद्वह ।
एषा ह्यविद्यामानैव सतीव स्फारतां गता ॥ १ ॥(३।११३।११)
दृश्यते प्रकराभासा सदर्थे नोपयुज्यते । (३।११३।१५)
अन्तःशून्यापि सर्वत्र दृश्यते सारसुन्दरी ॥२॥ (३।११३।१७)
न क्वचित्संस्थितापीह सर्वत्रैवोपलभ्यते । (३।११३।१७)
निमेषमप्यतिष्ठन्ती स्थैर्याशङ्कां प्रयच्छति ॥३॥ (३।११३।१८)
प्रतिभासवशादेषा त्रिजगन्ति महान्ति च ।
मुहूर्तमात्रेणोत्पाद्य धत्ते ग्रासीकरोति च ॥ ४ ॥ (३।११३।२७)
मनोराज्यमिवाकारभासुरा सत्यवर्जिता ।
सहस्रशतशाखापि न किञ्चित्परमार्थतः ॥५॥ (३।११३।३३)
इयं दृश्यभरभ्रान्तिर्नन्वविद्येति चोच्यते ।
वस्तुतो विद्यते नैषा तापनद्यां यथा पयः ॥ ६ ॥ (३।५२।५)

अविद्येति धृता संविद्ब्रह्मणात्मनि सत्तया ।
तद्भ्रमेणासदप्यस्याः सद्रूपमिव लक्ष्यते ॥७॥ (६।१६०।११)
असन्मयमविद्याया रूपमेव तदेव हि ।
यद्वीक्षितासती नूनं नश्यत्येव न दृश्यते ॥८॥ (६।५१।१३)

(अ) चित्तमेवाविद्या :—

चित्तमेव सकलाडम्बरकारिणीमविद्यां विद्धि ।
सा विचित्रकेन्द्रजालवशादिदमुत्पादयति ।
अविद्या चित्तजीवबुद्धिशब्दानां भेदोनास्ति
वृक्षतरुशब्दयोरिव ॥ १ ॥ (३।११६।८)

(आ) अविद्याया असत्ता :—

कृता शास्त्रैः प्रबोधाय ॥ १ ॥ (६।५१।१७)
नामैवेदमविद्येति भ्रममात्रमसद्विदुः ।
न विद्यते या सा सत्या कीदृङ्नाम भवेत्किल ॥२॥ (६।४६।१४)
ब्रह्मतत्त्वमिदं सर्वमासीदस्ति भविष्यति ।
निर्विकारमनाद्यन्तं नाविद्यास्तीति निश्चयः ॥३॥ (६।४०।११)
कुत एषा कथं चेति विकल्पाननुदाहरन् ।
नेदमेषा न चास्तीति स्वयं ज्ञास्यसि बोधतः ॥४॥ (६।५२।७)

[७] माया :—

इति मायेव दुष्पारा चिच्छक्तिः परिजृम्भते ।

इत्थमाद्यन्तरहिता ब्राह्मी शक्तिरनामया ॥ १ ॥ (६।७०।१८)
ईदृशी राम मायेयं या स्वनाशेन हर्षदा ।
न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ॥२॥ (४।४१।१५)
विवेकमाच्छादयति जगन्ति जनयत्यलम् ।
न च विज्ञायते कैषा पश्याश्चर्यमिदं जगत् ॥३॥ (४।४१।१६)
अप्रेक्ष्यमाणा स्फुरति प्रेक्षिता तु विनश्यति ।
मायेयमपरिज्ञायमानरूपैव वलगति ॥ ४ ॥ (४।४१।१७)
नूनं स्थितिमुपायाता समासाद्य पदं स्थिता ।
कुतो जातेयमिति ते राम मास्तु विचारणा ॥५॥ (४।४१।३२)
इमां कथमहं हन्मीत्येषा तेऽस्तु विचारणा ।
अस्तं गतायां क्षीणायामस्यां ज्ञास्यसि राघव ॥६॥ (४।४१।३३)
यत एषा यथा चैषा यथा नष्टेत्यखण्डितम् ।
वस्तुतः किल नास्त्येषा विभात्येषा न वेक्षिता ॥७॥(४।४१।३४)
उपदेश्योपदेशार्थं शास्त्रार्थप्रतिपत्तये ।
शब्दार्थवाक्यरचनाभ्रमो मा तन्मयो भव ॥ ८ ॥ (४।४१।६)
शब्दार्थवाक्प्रपञ्चोऽयमुपदेशेषु कल्पितः ।
सदाऽज्ञेषु न तज्ज्ञेषु विद्यते पारमार्थिकः ॥ ९ ॥ (४।४१।९)
कलनामलमोहादि किञ्चिन्नात्मनि विद्यते ।
नीरागं ब्रह्म परमं तदेवेदं जगत्स्थितम् ॥ १० ॥ (४।४१।१०)

[८] मूढस्यैव जगत्सत्यत्वम् :—

यस्त्वबुद्धमतिर्मूढो रूढो न वितते पदे ।

वज्रसारमिदं तस्य जगदस्त्यसदेव सत् ॥ १ ॥ (३।४२।१)
यथा बालस्य वेतालो मृतिपर्यन्तदुःखदः ।
असदेव सदाकारं तथा मूढमतेर्जगत् ॥ २ ॥ (३।४२।२)
ताप एव यथा वारि मृगाणां भ्रमकारणम् ।
असत्यमेव सत्याभं तथा मूढमतेर्जगत् ॥ ३ ॥ (३।४२।३)
यथा स्वप्नमृतिर्जन्तोरसत्या सत्यरूपिणी ।
अर्थक्रियाकरी भाति तथा मूढधियां जगत् ॥ ४ ॥ (३।४२।४)
अव्युत्पन्नस्य कनके कानके कटके यथा ।
कटकज्ञप्तिरेवास्ति न मनागपि हेमधीः ॥ ५ ॥ (३।४२।५)
तथाऽज्ञस्य पुरागारनगनागेन्द्रभासुरा ।
इयं दृश्यदृगेवास्ति न त्वन्या परमार्थदृक् ॥ ६ ॥ (३।४२।६)
येन बुद्धं तु तस्यैतदाकाशादपि शून्यकम् ।
न बुद्धं येन तस्यैतद्वज्रसाराचलोपमम् ॥ ७ ॥ (३।२८।१३)
दीर्घसंसारमायेयं राम राजसतामसैः ।
धार्यते जन्तुभिर्नित्यं सुस्तम्भैरिव मण्डपः ॥ ८ ॥ (५।५।२)
सत्वस्थजातिभिर्धीरैस्त्वादृशैर्गुणबृंहितैः ।
हेलया त्यज्यते पक्वा मायेयं त्वगिवोरगैः ॥ ९ ॥ (५।५।३)

[९] यावदज्ञानं तावदेव जगदनुभवः :—

यावदज्ञानकलना यावदब्रह्मभावना ।
यावदास्था जगज्जाले तावच्चित्तादिकल्पना ॥ १ ॥ (६।२।३०)

देहे यावदहंभावो दृश्येऽस्मिन्यावदात्मता ।
यावन्ममेदमित्यास्था तावच्चित्तादिविभ्रमः ॥ २ ॥ (६।२।३१)
यावन्नोदितमुच्चैस्त्वं सज्जनासङ्गसङ्गतः ।
यावन्मौर्ख्यं न संक्षीणं तावच्चित्तादिनिम्नता ॥ ३ ॥ (६।२।३२)
यावच्छिथिलतां यातं नेदं भुवनभावनम् ।
सम्यग्दर्शनशक्त्यान्तस्तावच्चित्तादयः स्फुटाः ॥४॥ (६।२।३३)
यावदज्ञत्वमन्धत्वं वैवश्यं विषयाशया ।
मौर्ख्यान्मोहसमुच्छ्रायस्तावच्चित्तादिकल्पना ॥ ५ ॥ (६।२।३४)
यावदाशाविषामोदः परिस्फुरति हृद्वने ।
प्रविचारचकोरोऽन्तर्न तावत्प्रविशत्यलम् ॥ ६ ॥ (६।२।३५)

[१०] अविद्याया बोधाद्विलयः :—

अविद्यैवमविज्ञाता चिरानन्तावभासते ।
परिज्ञाता तु नास्त्येव मृगतृष्णानदी यथा ॥ १ ॥ (६।१६०।८)
यथोदिते दिनकरे क्वापि याति तमस्विनी ।
तथा विवेकेऽभ्युदिते क्वाप्यविद्या विलीयते ॥२॥ (३।११४।६)
यदा ब्रह्मात्मिकैवेयमविद्या नेतरात्मिका ।
तदास्त्येषाऽपरिज्ञाता परिज्ञाता न भिद्यते ॥ ३ ॥ (६।१६०।१२)
एवमालोक्यमानैषा क्वापि याति पलायते ।
असद्रूपा ह्यवस्तुत्वाद्दृश्यते ह्यविचारणात् ॥४॥ (६।१०।३६)

[११] जगद्भ्रमक्षयः :–

भोगेष्वनास्थमनसः शीतलामलनिर्वृतेः ।
छिन्नाशापाशजालस्य क्षीयते चित्तविभ्रमः ॥ १ ॥ (६।२।३६)
तृष्णामोहपरित्यागान्नित्यशीतलसंविदः ।
पुंसः प्रशान्तचित्तस्य प्रबुद्धा त्यक्तचित्तभूः ॥ २ ॥ (६।२।३७)
भावितानन्तचित्तत्वरूपरूपान्तरात्मनः ।
स्वान्तावलीनजगतः शान्तो जीवादिविभ्रमः ॥३॥ (६।३।२६)
असम्यग्दर्शने शान्ते मिथ्याभ्रमकरात्मनि ।
उदिते परमादित्ये परमार्थैकदर्शने ॥ ४ ॥ (६।२।४०)
अपुनर्दर्शनायैव दग्धसंशुष्कपर्णवत् ।
चित्तं विगलितं विद्धि वह्नौ घृतलवं यथा ॥ ५ ॥ (६।२।४१)
आब्रह्मकीटसंवित्तेः सम्यक्संवेदनात्क्षयः ॥६॥ (३।६७।६८)

[१२] अविद्याविलये नाशशब्दो न युज्यते :–

यदस्ति नाम तत्रैव नाशानाशक्रमो भवेत् ।
वस्तुतो यच्च नास्त्येव नाशः स्यात्तस्य कीदृशः॥१॥(३।२१।५८)
रज्ज्वां सर्पभ्रमे नष्टे सत्यबोधवशात्सुत ।
सर्पो न नष्ट उन्नष्टो वेत्येवं कैव सा कथा ॥ २ ॥ (३।२१।५६)
न विनश्यत एवेदं ततः पुत्र न विद्यते ।
नासतो विद्यते भावो नाभावो विद्यते सतः॥३॥(६।२१३।११)

यत्तु वस्तुत एवास्ति न कदाचन किञ्चन ।
तदभावात्म तद्राम कथं नाम विनश्यति ॥ ४ ॥ (६।२१३।१२)

[१३] जगदात्मनि लीयते :—

स्वप्नभ्रमेऽथ सङ्कल्पे पदार्थाः पर्वतादयः ।
संविदोऽन्तर्मिलन्त्येते स्पन्दनान्यनिले यथा ॥१॥ (३।५७।४४)
अस्पन्दस्य यथा वायोः सस्पन्दोऽन्तर्विशत्यलम् ।
अनन्यात्मा तथैवायं स्वप्नार्थः संविदो मलम् ॥२॥ (३।५७।४५)
स्वप्नाद्यर्थावभासेन संविदेव स्फुरत्यलम् ।
अस्फुरन्ती तु तेनैव यात्येकत्वं तदात्मिका ॥३॥ (३।५७।४६)

१५—परा दृष्टिः (अजातवादः)

जगच्छब्दस्य नामार्थो ननु नास्त्येव कश्चन । (३।४।६७)
वस्तुतस्तु जगन्नास्ति सर्वं ब्रह्मैव केवलम् ॥ १ ॥ (४।४०।३०)

[१] अप्रबुद्धबोधायैव भेदकल्पना :—

अप्रबुद्धदृशां पक्षे तत्प्रबोधाय केवलम् ।
वाच्यवाचकसम्बन्धकृतो भेदः प्रकल्प्यते ॥१॥ (३।१००।४)
अविद्येयमयं जीव इत्यादिकलनाक्रमः ।
अप्रबुद्धप्रबोधाय कल्पितो वाग्विदां वरैः ॥ २ ॥ (६।४९।१७)
काचिद्वा कलना यावन्न नीता राघव प्रथाम् ।
उपदेश्योपदेशश्रीस्तावल्लोके न शोभते ॥ ३ ॥ (३।९५।५)
अतो भेददृशादीनामङ्गीकृत्योपदिश्यते ।
ब्रह्मेदमेते जीवा वै वेति वाचमयं क्रमः ॥ ४ ॥ (३।९५।६)
अप्रबुद्धजनाचारो यत्र राघव दृश्यते ।
तत्र ब्रह्मण उत्पन्ना जीवा इत्युक्तयः स्थिताः ॥५॥ (३।९५।३)
उपदेशाय शास्त्रेषु जातः शब्दोऽथवाऽर्थजः ।
प्रतियोगिव्यवच्छेदसंख्यालक्षणपक्षवान् ॥ ६ ॥ (३।८४।१९)
भेदो दृश्यत एवायं व्यवहारान्न वास्तवः ।
वेतालो बालकस्येव कार्यार्थं परिकल्पितः ॥ ७ ॥ (३।८४।२०)

कार्यकारणभावो हि तथा स्वस्वामिलक्षणम् ।
हेतुश्च हेतुमांश्चैवावयवायविविक्रमः ॥ ८ ॥ (३।८४।२२)
व्यतिरेकाव्यतिरेकौ परिणामादिविभ्रमः ।
तथा भावविलासादि विद्याविद्ये सुखासुखे ॥९॥ (३।८४।२३)
एवमादिमयी मिथ्यासङ्कल्पकलना मिता ।
अज्ञानमवबोधार्थं न तु भेदोऽस्ति वस्तुनि ॥१०॥ (३।८४।२४)

[२] परमः सिद्धान्तः :—

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥१॥ (६।१२५।१)
सर्वं च खल्विदं ब्रह्म नित्यं चिद्घनमक्षतम् ।
कल्पनान्या मनोनाम्नी विद्यते नहि काचन ॥२॥(३।११४।१४)
परं ब्रह्मैव तत्सर्वमजरामरमव्ययम् । (३।४।६८)
सर्वमेकमनाद्यन्तमविभागमखण्डितम् ॥ ३ ॥ (३।८४।२६)
केवलं केवलाभासं सर्वसामान्यमक्षतम् ।
चेत्यानुपातरहितं चिन्मात्रमिह विद्यते ॥ ४ ॥ (३।११४।१६)
चेत्यानुपातरहितं सामान्येन च सर्वगम् ।
यच्चित्तत्त्वमनाख्येयं स आत्मा परमेश्वरः ॥५॥ (३।११४।१२)
तस्मान्नैवाविचारोऽस्ति नाऽविद्यास्ति न बन्धनम् ।
न मोक्षोऽस्ति निराबाधं शुद्धबोधमिदं जगत् ॥६॥(३।२१।७२)
बुधानामस्मदादीनां न किंचिन्नाम जायते ।
न च नश्यति वा किञ्चित्सर्वं शान्तमजं च सत्॥७॥(६।१४६।११)

परे शान्ते परं नाम स्थितमित्थमिदन्तया ।
नेह सर्गो न सर्गाख्या काचिदस्ति कदाचन ॥८॥ (३।११६।२५)
न जायते न म्रियते किंचिदत्र जगत्त्रये ।
न च भावविकाराणां सत्ता क्वचन विद्यते ॥९॥ (३।११४।१५)
न जगन्नापि जगती शान्तमेवाखिलं स्थितम् ।
ब्रह्मैव कचति स्वच्छमित्थमात्मात्मनात्मनि ॥१०॥ (३।१३।५१)
नाधेयं तत्र नाधारो न दृश्यं न च द्रष्टृता ।
ब्रह्माण्डं नास्ति न ब्रह्मा न च वैतण्डिका क्वचित् ११ (३।१३।५०)
तेन जातं ततो जातमितीयं रचना गिराम् ।
शास्त्रसंव्यवहारार्थं न राम परमार्थतः ॥ १२ ॥ (४।४०।१७)
न दृश्यमस्ति सद्रूपं न द्रष्टा न च दर्शनम् ।
न शून्यं न जडं नो चिच्छान्तमेवेदमाततम् ॥१३॥ (३।४।७०)
जाग्रत्स्वप्नसुषुप्तादि परमार्थविदां विदाम् ।
न विद्यते किञ्चिदपि यथास्थितमवस्थितम्॥१४॥ (६।१४६।२१)
वस्तुतस्त्वस्ति न स्वप्नो न जाग्रन्न सुषुप्तता ।
न तुर्यं न ततोऽतीतं सर्वं शान्तं परं नभः ॥१५॥ (६।१६७।१८)

[२] ब्रह्मणः कर्तृत्वनिषेधः :—

अनाख्योऽप्रतिघः स्वात्मा निराकारो य ईश्वरः ।
स करोति जगदिति हासायैव वचोऽधियाम् ॥१॥ (६।९८।८)
नेदं कर्तृकृतं किंचिन्न वा कर्तृकृतक्रमम् ।
स्वयमाभासते चेदं कर्त्रकर्तृपदं गतम् ॥ २ ॥ (४।५६।५)

अकर्तृकर्मकरणमकारणमबीजकम् ।
अप्रतर्क्यमविज्ञेयं ब्रह्म कर्तृ कथं भवेत् ॥ ३ ॥ (६/१।९५।१३)

[४] ब्रह्मणो विकारनिषेधः :—

अपुनः प्रागवस्थानं यत्स्वरूपविपर्ययः ।
तद्विकारादिकं तात यत्क्षीरादिषु वर्तते ॥ १ ॥ (६/१।४९।२)
पयस्तां पुनरभ्येति दधित्वान्न पुनः पयः ।
बुद्धमाद्यन्तमध्येषु ब्रह्म ब्रह्मैव निर्मलम् ॥ २ ॥ (६/१।४९।३)
क्षीरादेरिव तेनास्ति ब्रह्मणो न विकारिता ।
अनाद्यन्तविभागस्य न चैषोऽवयविक्रमः ॥ ३ ॥ (६/१।४९।४)
आत्मा त्वाद्यन्तमध्येषु समः सर्वत्र सर्वदा ।
स्वमप्यन्यत्वमायाति नात्मतत्वं कदाचन ॥ ४ ॥ (६/१।४९।८)
अरूपत्वात्तथैकत्वान्नित्यत्वादयमीश्वरः ।
वशं भावविकाराणां न कदाचन गच्छति ॥ ५ ॥ (६/२।४९।९)
न चाविकारमजरं सविकारं क्षयादृते ।
कारणं क्वचिदेवेह किंचिद्भवितुमर्हति ॥६॥ (६/२।१९५।१४)
न जन्यजनकाद्यास्ताः सम्भवन्त्युक्तयः परे ।
एकमेव ह्यनन्तत्वात्किं कथं जनयिष्यति ॥ ७ ॥ (४।४०।२६)
सर्वस्मात्सर्वगात्तस्मादनन्ताद्ब्रह्मणः पदात् ।
नान्यत्किञ्चित्संभवति तदुत्थं यत्तदेव तत् ॥ ८ ॥ (४।४०।३४)
यादृगाद्यन्तयोर्वस्तु तादृगेव तदुच्यते ।
मध्ये यस्य यदन्यत्वं तदबोधाद्विजृम्भितम् ॥ ९ ॥ (६/१।४९।७)

समस्याद्यन्तयोर्येयं दृश्यते विकृतिः क्षणात् ।
संविदः सम्भ्रमं विध्दि नाऽविकारेऽस्ति विक्रिया॥१०॥(६।४६।५)

[५] ब्रह्मणः कारणत्वनिषेधः :—

नित्यानन्दतयाऽजस्य कारणं नास्ति कार्यकृत् । (६।१०।१०)
स्वसत्तायां स्थितं ब्रह्म न बीजं न च कारणम् ॥१॥ (६।६७।२)
संस्थितं सर्वदा सर्वं सर्वाकारमिवोदितम् ।
अदृश्यत्वादलभ्यत्वान्न तत्कार्यं न कारणम् ॥२॥ (६।६६।२६)
आख्यानाख्यास्वरूपस्य निराभासप्रभादृशः ।
सतो वाप्यसतो वाथ कथं कारणता भवेत् ॥३॥ (६।६६।२८)
यदि कारणतापत्तियोग्यं शान्तं पदं भवेत् । (६।६७।८)
अनिङ्गितमनाभासमप्रतर्क्यं कथं भवेत् ॥ ४ ॥ (६।६७।६)
न च शून्यमनाद्यन्तं जगतः कारणं भवेत् ।
ब्रह्मामूर्तं समूर्तस्य दृश्यस्याब्रह्मरूपिणः ॥ ५ ॥ (६।५३।१७)
न चाविकारमजरं सविकारं क्षयादृते ।
कारणं क्वचिदेवेह किञ्चिद्भवितुमर्हति ॥ ६ ॥ (६।१६५।१४)
न हि कारणतः कार्यमुदेत्यसदृशं क्वचित् । (३।१८।१८)
ज्ञानस्य ज्ञेयता नास्ति केवलं ज्ञानमव्ययम् ॥७॥ (६।१६०।५)
सम्पद्यते हि यत्कार्यं कारणैः सहकारिभिः ।
मुख्यकारणवैचित्र्यं किञ्चित्तत्रावलोक्यते ॥ ८ ॥ (३।१८।२०)
न ब्रह्मजगतामस्ति कार्यकारणतोदयः ।
कारणानामभावेन सर्वेषां सहकारिणाम् ॥ ६ ॥ (३।२१।३७)

[६] ब्रह्मणो बीजत्वनिषेधः :—

इदं बीजेऽङ्कुर इव दृश्यमास्ते महाशये ।
ब्रूते य एवमज्ञत्वमेतत्तस्यास्ति शैशवम् ॥ १ ॥ (४।१।२१)
मनःषष्ठेन्द्रियातीतं यत्स्यादतितरामणु ।
बीजं तद्भवितं शक्तं स्वयंभूर्जगतां कथम् ॥ २ ॥ (४।१।२५)
आकाशादपि सूक्ष्मस्य परस्य परमात्मनः ।
सर्वाख्यानुपलंभस्य कीदृशी बीजता कथम् ॥ ३ ॥ (४।१।२६)
गगनाङ्गादपि स्वच्छे शून्ये तत्र परे पदे ।
कथं सन्ति जगन्मेरुसमुद्रगगनादयः ॥ ४ ॥ (४।१।२८)
मेरुरास्ते कथमणौ कुतः किञ्चिदनाकृतौ ।
तदतद्रूपयोरैक्यं क्व च्छायातपयोरिव ॥ ५ ॥ (४।१।३२)
साकारवटधानादावङ्कुराः सन्ति युक्तिमत् ।
नाकारे तन्महाकारं जगदस्तित्वयुक्तिकम् ॥ ६ ॥ (४।१।३३)
यत्तु परं शान्तं ब्रह्म का तत्राकारकल्पना ।
परमाणुत्वयोगेऽपि नात्र केवात्र बीजता ॥ ७ ॥ (६।५४।२२)
जगदास्ते परस्याणोरन्तरित्यपि नोचितम् ।
सार्षपे कणके मेरुरास्त इत्यज्ञकल्पना ॥ ८ ॥ (६।५४।२४)
सति बीजे प्रवर्तन्ते कार्यकारणदृष्टयः ।
निराकारस्य किं बीजं क्व जन्यजनकक्रमः ॥९॥ (६।५४।२५)
यत्रास्ति बीजं तत्र स्याच्छाखा विततरूपिणी ।
जन्यते कारणैः सा च वितता सहकारिभिः ॥१०॥(६।५४।२०)

सहकारिकारणानामभावे त्वङ्कुरोद्गतिः ।
बन्ध्याकन्येव दृष्टेह न कदाचन केनचित् ॥ ११ ॥ (४।२।३)
समस्तभूतप्रलये बीजमाकारि किं भवेत् ।
सहकार्यथ किं तस्य जायते यद्वशाज्जगत् ॥१२॥ (६।५४।२१)
बीजं जहद्बीजवपुः फलीभूतं विलोक्यते ।
ब्रह्माजहन्निजवपुः फलं बीजे च संस्थितम् ॥१३॥(४।१८।२४)
बीजोदरे तु या सत्ता बीजमेव हि सा भवेत् ।
बीजेऽङ्कुरोऽङ्कुरतया संश्रितो नोपलभ्यते ॥१४॥(६।१६५।३४)
ब्रह्मणोऽन्तर्जगत्तैवं जगत्त्वेनोपलभ्यते ।
अस्ति चेत्तद्भवेन्नित्यं सा ब्रह्मैवाविकारि तत् ॥१५॥(६।१६५।३५)
अविकारादनाकाराद्विकार्याकृतिभासुरम् ।
उदेतीति किलास्माभिर्नैव दृष्टं न च श्रुतम्॥१६॥(६।१६५।३६)
अनाकृतावाकृतिमन्न चैतत्स्थातुमर्हति ।
परमाणौ न चैवान्तरिव सम्भान्ति मेरवः ॥१७॥ (६।१६५।३७)
समुद्गके रत्नमिव जगद्ब्रह्मणि तिष्ठति ।
महाकारं निराकारे इत्युन्मत्तवचो भवेत् ॥१८॥ (६।१६५।३८)
शान्तं परं च साकारस्याधार इति राजते ।
न वक्तुं राजते क्वेव साकारस्याविनाशिता॥१९॥(६।१६५।३९)

[७] अकारणत्वाज्जगतो विभ्रमत्वम् :—

कारणं यस्य कार्यस्य भूमिपाल न विद्यते ।
विद्यते नेह तत्कार्यं तत्संवित्तिस्तु विभ्रमः ॥ १ ॥(६।६४।५४)

अकारणं तु यत्कार्यं सदिवाग्रेऽनुभूयते ।
तद्द्रष्टुर्विभ्रमाद्विध्दि मृगतृष्णाजलोपमम् ॥ २ ॥ (६।६४।५६)

कारणाभावतः कार्यमभूत्वा भवतीति यत् ।
मिथ्याज्ञानादृते तस्य न रूपमुपपद्यते ॥ ३ ॥ (६।६५।५६)

कारणाभावतः कार्यं न कस्यचिदिदं जगत् ।
अकारणत्वादकार्यत्वं भ्रमाद्विद्धि त्विदं जगत् ॥४॥ (६।६५।१७)

कारणेन विना कार्यं किल किं नाम विद्यते ।
यदपुत्रस्य सत्पुत्रदर्शनं स भ्रमो न सत् ॥ ५ ॥ (६।५४।१५)

यस्त्वकारणको भाति न स्वभावो विजृम्भते ।
सर्वरूपेण संकल्पगन्धर्वनगरादिवत् ॥ ६ ॥ (६।५४।१६)

यादृगेव परं ब्रह्म तादृगेव जगत्त्रयम् । (३।३।२८)
स्वरूपमजहत्त्वेव राजतेऽर्थविवर्तवत् ॥ ७ ॥ (६।५४।१७)

[८] स्वप्नवज्जगदाभासः :—

स्वप्ने चिन्मात्रमेवाद्यं स्वयं भाति जगत्तया ।
यथा तथैव सर्गादौ नात्रान्यदुपपद्यते ॥ १ ॥ (६।१७६।५)

तस्मात्स्वप्नवदाभासः संविद्रात्मनि संस्थितः ।
सर्गादिनानाकृतिना परमात्मा निराकृतिः ॥ २ ॥ (६।१६५।४४)

[९] जगतोऽजातत्वम् (अजातवादः) :—

न चोत्पन्नं न च ध्वंसि यत्किलादौ न विद्यते ।
उत्पत्तिः कादृशी तस्य नाशशब्दस्य का कथा ॥१॥ (३।११।५)

यथा स्वप्नेऽवनिर्नास्ति स्वानुभूताऽपि कुत्रचित् ।
तथेयं दृश्यता नास्ति स्वानुभूताप्यसन्मयी ॥२॥ (६।१६१।२२)
न किञ्चिदपि सम्पन्नं न च जातं न दृश्यते । (३।१३।४०)
न मिथ्यात्वं न सत्यत्वं किमपीदमजं ततम् ॥३॥ (६।१६५।२३)
तत्सर्वं कारणाभावान्न जातं न च विद्यते । (६।५३।१५)
यदकारणकं तस्य सत्ता नेहोपपद्यते ॥ ४ ॥ (६।५३।१६)
यथा सौवर्णकटके दृश्यमानमिदं स्फुटम् ।
कटकत्वं तु नैवास्ति जगत्त्वं न तथा परे ॥ ५ ॥ (३।११।८)
हेम्न्यूर्मिकारूपधरेऽप्यूर्मिकात्वं न विद्यते ।
यथा तथा जगद्रूपे जगन्नास्ति च ब्रह्मणि ॥६॥ (३।२१।३३)
अनुभूतान्यपीमानि जगन्ति व्योमरूपिणि ।
पृथ्व्यादीनि न सन्त्येव स्वप्नसङ्कल्पयोरिव ॥ ७ ॥ (३।१५।६)
पिण्डग्रहो जगत्यस्मिन्विज्ञानाकाशरूपिणि ।
मरुनद्यां जलमिव न सम्भवति कुत्रचित् ॥ ८ ॥ (३।१५।७)
जाग्रत्स्वप्नसुषुप्तादिपरमार्थविदां विदाम् ।
न विद्यते किञ्चिदपि यथास्थितमवस्थितम् ॥९॥ (६।१४६।२१)
स्वप्नसङ्कल्पपुरयोर्नास्त्यप्यनुभवस्थयोः ।
मनागपि यथा रूपं सर्गादौ जगतस्तथा ॥१०॥ (६।१४६।२२)
जगत्संविदि जातायामपि जातं न किञ्चन । (३।१३।४८)
परमाकाशमाशून्यमच्छमेव व्यवस्थितम् ॥ ११ ॥ (३।१३।४९)
जातशब्दो हि सन्मात्रपर्यायः श्रूयतां कथम् ।
प्रादुर्भावे जनिस्तूक्तः प्रादुर्भावस्य भूर्वपुः ॥१२॥(६।१४६।१६)

सत्तार्थ एव भूः प्रोक्तस्तस्मात्सञ्जातमुच्यते ।
सर्गतो जात इत्युक्ते सन्सर्ग इति शब्दितम् ॥१३॥ (६।१७६।१७)
एवं न किंचिदुत्पन्नं दृश्यं चिज्जगदाद्यपि ।
चिदाकाशे चिदाकाशं केवलं स्वात्मनि स्थितम् ।१४॥(३।२१।२४)
तस्माद्राम जगन्नासीन्न चास्ति न भविष्यति ।
चेतनाकाशमेवाशु कचतीत्थमिवात्मनि ॥ १५ ॥ (४।२।८)

[१०] अयं सिद्धान्तोऽनधिकारिणे न वक्तव्यः :—

अर्धव्युत्पन्नबुद्धेस्तु नैतद्व्यक्तं हि शोभते ।
दृश्यानया भोगदृशा भावयन्नेष नश्यति ॥ १ ॥ (४।३९।२१)
परां दृष्टिं प्रयातस्य भोगेच्छा नाभिजायते ।
सर्वं ब्रह्मेति सिद्धान्तः काले नामास्य युज्यते ॥२॥ (४।३९।२२)
आदौ शमदमप्रायैर्गुणैः शिष्यं विशोधयेत् ।
पश्चात्सर्वमिदं ब्रह्म शुद्धस्त्वमिति बोधयेत् ॥३॥ (४।३९।२३)
अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु स तेन विनियोजितः ॥ ४ ॥ (४।३९।२४)
प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निराशिषः ।
नास्त्यविद्यामलमिति युक्तं वक्तुं महात्मनः ॥५॥ (४।३९।२५)

अथ मोक्षो नाम तृतीयोऽध्यायः

१—आनन्दः

आनन्दायैव भूतानि यतन्ते यानि कानिचित् ॥१॥(६।१०८।२०)

[१] भोगानामापातमात्रमधुरत्वम् :—

आपातमात्रमधुरमावश्यकपरिक्षयम् ।
भोगोपभोगमात्रं मे किं नामेदं सुखावहम् ॥ १ ॥ (५।२२।३०)
आपातमधुराम्भा भङ्गुरा भवहेतवः ।
अचिरेण विकारिण्यो भीषणा भोगभूमयः ॥ २ ॥ (६।६।८)

[२] सुखानां दुःखरूपत्वम् :—

सर्वस्या एव पर्यन्ते सुखाशायाश्च संस्थितम् । (४।५६।६)
मालिन्यं दुःखमप्येवं ज्वालाया इव कज्जलम् ॥१॥ (४।५६।७)
सतोऽसत्ता स्थिता मूर्ध्नि मूर्ध्नि रम्येष्वरम्यता ।
सुखेषु मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् ॥२॥ (५।६।४१)
रम्येष्वरम्यता दृष्टा स्थिरेष्वस्थिरतापि च ।
सत्येष्वसत्यतार्थेषु तेनेह विरसा वयम् ॥ ३ ॥ (६।६३।६१)
विषया विषवैषम्या वामाः कामविमोहदाः ।
रसाः सरसवैरस्या लुठन्नेषु न को हतः ॥४॥ (६।६३।३६)
आपदः सम्पदः सर्वाः सुखं दुःखाय केवलम् ।

जीवितं मरणायैव बत मायाविजृम्भितम् ॥ ५ ॥ (६।९३।७३)
भोगा विषयसम्भोगा भोगा एव फणावताम् ।
दशयन्त्येव मनाक्स्पृष्टा दृष्टा नष्टाः प्रतिक्षणम् ॥६॥ (६।९३।७५)
सम्पदः प्रमदाश्चैव तरङ्गोत्सङ्गभङ्गुराः ।
कस्तास्वहिफणाच्छत्रच्छायासु रमते बुधः ॥७॥ (६।९३।७८)
शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः ।
आपातरम्या विषयाः पर्यन्तपरितापिनः ॥ ८ ॥ (६।९३।८४)
संसार एव दुःखानां सीमान्त इति कथ्यते ।
तन्मध्ये पतिते देहे सुखमासाद्यते कथम् ॥ ९ ॥ (५।९।५२)

[२] संसारस्यासारत्वम् :—

पातः पक्कफलस्येव मरणं दुर्निवारणम् । (६।७८।३)
आयुर्गलत्यविरतं जलं करतलादिव ॥ १ ॥ (६।७८।४)
शैलनद्या रय इव सम्प्रयात्येव यौवनम् । (६।७८।५)
इन्द्रजालमिवासत्यं जीवनं जीर्णसंस्थिति ॥२॥ (६।७८।६)
सुखानि प्रपलायन्ते शरा इव धनुश्च्युताः । (६।७८।६)
पतन्ति चेतो दुःखानि तृष्णा गृध्र इवामिषम् ॥३॥ (६।७८।७)
बुद्बुदः प्रावृषीवाप्सु शरीरं क्षणभङ्गुरम् । (६।७८।७)
रम्भागर्भ इवासारो व्यवहारो विचारगः ॥४॥ (६।७८।८)
सत्वरं युवता याति कान्तेवाप्रियकामिनः । (६।७८।८)
बलादरतिरायाता वैरस्यमिव पादपम् ॥ ५ ॥ (६।७८।९)

[४] अभ्युदयस्य निःसारत्वम् :—

रम्ये धनेऽथ दारादौ हर्षस्यावसरो हि कः ।
वृद्धायां मृगतृष्णायां किमानन्दो जलार्थिनाम् ॥१॥ (४।४६।३)
धनदारेषु वृद्धेषु दुःखं युक्तं न तुष्टयः ।
वृद्धायां मोहमायायां कः समाश्वासवानिह ॥२॥ (४।४६।४)

[५] सुखहेतुनिरूपणम् :—

यथा प्राप्तिक्षणे वस्तु प्रथमे तुष्टये तथा ।
न प्राप्त्येकक्षणादूर्ध्वमिति को नानुभूतवान् ॥१॥ (६।४४।२)
वाञ्छाकाले यथा वस्तु तुष्टये नान्यदा तथा । (६।४४।३)
वाञ्छाकाले तुष्टये यत्तत्र वाञ्छैव कारणम् ॥२॥ (६।४४।४)
बद्धवासनमर्थो यः सेव्यते सुखयत्यसौ ।
यत्सुखाय तदेवाशु वस्तु दुःखाय नाशतः ॥३॥ (६।१२०।१८)
अविनाभावनिष्ठत्वं प्रसिद्धं सुखदुःखयोः ।
तनुवासनमर्थो यः सेव्यते वा विवासनम् ॥४॥ (६।१२०।१९)
नासौ सुखायते नासौ नाशकाले न दुःखदः । (६।१२०।२०)
यत्सुखं दुःखमेवाहुः क्षणनाशानुभूतिभिः ॥५॥ (६।६८।३१)
अकृत्रिममनाद्यन्तं यत्सुखं तत्सुखं विदुः ॥ ६ ॥ (६।६८।३१)
इच्छोदयो यथा दुःखमिच्छाशान्तिर्यथा सुखम् ।
तथा न नरके नापि ब्रह्मलोकेऽनुभूयते ॥ ७ ॥ (६।३६।२४)
यत्र नाभ्युदितं चित्तं तत्सुखमकृत्रिमम् ।

न स्वर्गादौ सम्भवति मरौ हिमगृहं यथा ॥ ८ ॥ (६/१।४४।२६)
चित्तोपशमजं स्फारमवाच्यं वचसा सुखम् ।
क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति ॥९॥ (६/१।४४।२७)
आशापरिकरे राम नूनं परिहृते हृदा ।
पुमानागतसौन्दर्यो ह्लादमायाति चन्द्रवत् ॥१०॥ (५।७४।२४)
न तथा सुखयत्यङ्गसंलग्ना वरवर्णिनी ।
यथा सुखयति स्वान्तमिन्दुशीता निराशता ॥११॥ (५।७४।४०)
अपि राज्यादपि स्वर्गादपीन्दोरपि माधवात् ।
अपि कान्तासमासङ्गान्नैराश्यं परमं सुखम् ॥१२॥(५।७४।४४)
इदमेवास्त्विदं मास्तु ममेति हृदि रञ्जना ।
न यस्यास्ति तमात्मेशं तोलयन्ति कथं जनः ॥१३॥ (५।७४।५०)

[६] आत्मानन्दः—

क्षणं वर्षसहस्रं वा तत्र लब्ध्वा स्थितिं मनः ।
रतिमेति न भोगौघे दृष्टस्वर्ग इवावनौ ॥ १ ॥ (५।५४।६९)
तत्पदं सा गतिः शान्ता तच्छ्रेयः शाश्वतं शिवम् ।
तत्र विश्रान्तिमाप्तस्य भूयो नो बाधते भ्रमः ॥२॥ (५।५४।७०)
तां महानन्दपदवीं चित्तादासाद्य देहिनः ।
दृश्यं न बहु मन्यन्ते राजानो दानतामिव ॥३॥ (५।५४।७२)

२—बन्धमोक्षौ

[१] बन्धस्य स्वरूपम् :—

पदार्थवासनादार्ढ्यं बन्ध इत्यभिधीयते । (२।२।५)
सुखदुःखैर्युतो योऽसौ स्वयं बन्धानुभूतिमान् ॥१॥(६।१२५।३४)
उपादेयानुपतनं हेयैकान्तविवर्जनम् ।
यदेतन्मनसो राम तद्बन्धं विद्धि नेतरत् ॥ २ ॥ (५।१३।२०)
द्रष्टुर्दृश्यस्य सत्ताङ्ग बन्ध इत्यभिधीयते । (३।१।२२)
वासनावासने एव कारणं बन्धमोक्षयोः ॥३॥ (६।१२५।६१)
जगत्त्वमहमित्यादिर्मिथ्यात्मा दृश्यमुच्यते ।
यावदेतत्संभवति तावन्मोक्षो न विद्यते ॥ ४ ॥ (३।१।२३)

[२] बन्धकारणानि :—

(अ) वासना :—

वासनातन्तुबद्धा ये आशापाशवशीकृताः ।
वश्यतां यान्ति ते लोके रज्जुबद्धाः खगा इव ॥१॥(४।२७।१८)
ये भिन्नवासना धीराः सर्वत्रासक्तबुद्धयः ।
न हृष्यन्ति न कुप्यन्ति दुर्जयास्ते महाधियः ॥२॥ (४।२७।१९)
कोशकारवदात्मानं वासनातनुतन्तुभिः ।
वेष्टयच्चैव चेतोऽन्तर्बालत्वान्नावबुध्यते ॥ ३ ॥ (६।१०।८)

(आ) इयत्ता :—

इयन्मात्रपरिच्छिन्नो येनात्मा भव्यभावितः ।
स सर्वज्ञोऽपि सर्वत्र परां कृपणतां गतः ॥ ४ ॥ (४।२७।२२)
अनन्तस्याप्रमेयस्य येनेयत्ता प्रकल्पिता ।
आत्मनस्तस्य तेनात्मा स्वात्मनैवावशीकृतः ॥५॥ (४।२७।२३)
आस्थामात्रमनन्तानां दुःखानामाकरं विदुः ।
अनास्थामात्रमभितः सुखानामाकरं विदुः ॥ ६ ॥ (४।२७।२५)
अयं सोऽहं ममेदं तदित्याकल्पितकल्पनः ।
आपदां पात्रतामेति पयसामिव सागरः ॥ ७ ॥ (४।२७।२१)

(इ) मिथ्याभावना :—

मिथ्याभावनया ब्रह्मन्स्वविकल्पकलङ्किताः ।
न ब्रह्म वयमित्यन्तर्निश्चयेन ह्यधोगताः ॥ ८ ॥ (४।१२।२)
ब्रह्मणो व्यतिरिक्तत्वं ब्रह्मार्णवगता अपि ।
भावयन्त्यो विमुह्यन्ति भीमासु भवभूमिषु ॥ ९ ॥ (४।१२।३)

(ई) आत्मविस्मरणम् :—

हेतुर्विहरणे तेषामात्मविस्मरणादृते ।
न कश्चिल्लक्ष्यते साधो जन्मान्तरफलप्रदः ॥१०॥ (३।९५।१४)
नाहं ब्रह्मेति संकल्पात्सुदृढाद्बध्यते मनः ॥११॥ (३।११४।२३)

(उ) अहंभावना :—

अहमित्येव संकल्पो बन्धायातिविनाशिने ।
नाहमित्येव संकल्पो मोक्षाय विमलात्मने ॥१२॥ (६।६६।११)

(ऊ) अज्ञानम् :—

जड़ो देहो न दुःखार्हो दुःखी देह्यविचारतः ।
अविचारो घनाज्ञानादज्ञानं दुःखकारणम् ॥१३॥ (३।११५।१६)
अपरिज्ञात आत्मैव भ्रमतां समुपागतः ।
ज्ञात आत्मत्वमायाति सीमान्तः सर्वसंविदाम् ॥१४॥ (६।१०।४)

[२] मोक्षस्वरूपम् :—

सकलाशास्वसंसक्त्या यत्स्वयं चेतसः क्षयः ।
स मोक्षनाम्ना कथितस्तत्त्वज्ञैरात्मदर्शिभिः ॥१॥ (५।७३।३६)
जगद्भ्रमं परिज्ञाय यदवासनभासितम् ।
विरसाशेषविषयं तद्धि निर्वाणमुच्यते ॥ २ ॥ (६।४२।५१)
दीपनिर्वाणनिर्वाणमस्तंगतमनोगतिम् ।
आत्मन्येव शमं यातं सन्तमेवामलं विदुः ॥ ३ ॥ (६।३८।३२)
यत्तु चञ्चलताहीनं तन्मनो मृतमुच्यते ।
तदेव च तपःशास्त्रसिद्धान्तो मोक्ष उच्यते ॥ ४ ॥ (३।११२।८)
परस्य पुंसः संकल्पमयत्वं चित्तमुच्यते ।
अचित्तत्वमसंकल्पान्मोक्षस्तेनाभिजायते ॥ ५ ॥ (५।१३।८०)

दृश्यं विरसतां यातं यदा न स्वदते क्वचित् ।
तदा नेच्छा प्रसरति तदैव च विमुक्तता ॥ ६ ॥ (६।३७।३३)
अत्यन्तविस्मृतं विश्वं मोक्ष इत्यभिधीयते ।
ईप्सितानीप्सिते तत्र न स्तः केचन कस्यचित् ॥७॥ (३।२१।११)
अज्ञानस्य महाग्रन्थेर्मिथ्यावेद्यात्मनोऽसतः ।
अहमित्यर्थरूपस्य भेदो मोक्ष इति स्मृतः ॥ ८ ॥ (६।२०।१७)

[४] कदा मोक्षोऽनुभूयते :—

यदा ब्रह्मगुणैर्जीवो युक्तस्त्यक्त्वा मनोगुणान् । (६।१२८।४५)
संशान्तकरणग्रामस्तदा स्यात्सर्वगः प्रभुः ॥१॥ (६।१२८।४६)
देहेन्द्रियमनोबुद्धेः परस्तस्माच्च यः परः । (६।१२८।४६)
सोऽहमस्मि यदा ध्यायेत्तदा जीवो विमुच्यते ॥२॥ (६।१२८।४७)
सर्वेषु भूतेषु चात्मानं सर्वभूतानि चात्मनि । (६।१२८।४८)
यदा पश्यत्यभेदेन तदा जीवो विमुच्यते ॥३॥ (६।१२८।४९)
कर्तृभोक्त्रादिनिर्मुक्तः सर्वोपाधिविवर्जितः । (६।१८।४७)
सुखदुःखविनिर्मुक्तस्तदानीं विप्रमुच्यते ॥४॥ (६।१२८।४९)
जाग्रत्स्वप्नसुषुप्ताख्यं हित्वा स्थानत्रयं यदा । (६।१२८।४९)
विशेत्तुरीयमानन्दं तदा जीवो विमुच्यते ॥ ५ ॥ (६।१२८।५०)
यदि सर्वं परित्यज्य तिष्ठस्युत्क्रान्तवासनः ।
अमुनैव निमेषेण तन्मुक्तोऽसि न संशयः ॥ ६ ॥ (३।६६।१९)
यत्राभिलाषस्तन्नूनं संत्यज्य स्थीयते यदि ।
प्राप्त एवाङ्ग तन्मोक्षः किमेतावति दुष्करम् ॥७॥ (३।६६।२१)

[५] द्विविधो मोक्षः :—

द्विविधा मुक्तता लोके संभवत्यनघाकृते ।
सदेहैका विदेहान्या विभागोऽयं तयोः शृणु ॥ १ ॥ (५।४२।११)

(अ) सदेहः :—

असंसक्तमतेर्यस्य त्यागादानेषु कर्मणाम् ।
नैषणा तत्स्थितिं विद्धि त्वं जीवन्मुक्ततामिह ॥१॥ (५।४२।१२)

(आ) विदेहः :—

सैव देहक्षये राम पुनर्जननवर्जिता ।
विदेहमुक्तता प्रोक्ता तत्स्था नायान्ति दृश्यताम् ॥२॥(५।४२।१३)

[६] तयोरभेदः :—

न मनागपि भेदोऽस्ति सदेहादेहमुक्तयोः ।
सस्पन्दोऽप्यथवाऽस्पन्दो वायुरेव यथानिलः ॥ १ ॥ (२।४।५)

[७] स्थावरत्वमोक्षयोर्भेदः :—

चिच्छक्तिर्वासनाबीजरूपिणी स्वापधर्मिणी ।
स्थिता रसतया नित्यं स्थावरादिषु वस्तुषु ॥१॥ (३।१०।२३)

यथा बीजेषु पुष्पादि मृदो राशौ घटो यथा ।
तथाऽन्तः संस्थिता साधो स्थावरेषु स्ववासना ॥२॥ (६।१०।१६)
यत्रास्ति वासनाबीजं तत्सुषुप्तं न सिद्धये ।
निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृतम् ॥३॥ (६।१०।२०)
अन्तः सुप्ता स्थिता मन्दा यत्र बीज इवाङ्कुरः ।
वासना तत्सुषुप्तत्वं विद्धि जन्मप्रदं पुनः ॥ ४ ॥ (६।१०।१६)
स्थावराद्य एते हि समस्ता जडधर्मिणः ।
सुषुप्तपदमारूढा जन्मयोग्याः पुनः पुनः ॥ ५ ॥ (६।१०।१८)
वासनायास्तथा वह्नेर्ऋणव्याधिद्विषामपि ।
स्नेहवैरविषाणां यः शेषः स्वल्पोऽपि बाधते ॥६॥ (६।१०।२१)
अन्तः संलीनमननं परितः सुप्तवासनम् ।
सुषुप्तं जडधर्मापि जन्म दुःखशतप्रदम् ॥ ७ ॥ (६।१०।१७)
तत्र दूरस्थिता मुक्तिर्मन्ये वेदविदां वर ।
सुप्तपुर्यष्टका यत्र चित्स्थिता दुःखदायिनी ॥८॥ (६।१०।११)
निर्दग्धवासनाबीजसत्तासामान्यरूपवान् ।
सदेहो वा विदेहो वा न भूयो दुःखभाग्भवेत् ॥९॥ (६।१०।२२)
बुद्धिपूर्वं विचार्येदं यथावस्त्ववलोकनात् ।
सत्तासामान्यबोधो यः स मोक्षश्चेदनन्तकः ॥१०॥(६।१०।१३)
परिज्ञाय परित्यागो वासनानां य उत्तमः ।
सत्तासामान्यरूपत्वं तत्कैवल्यपदं विदुः ॥ ११ ॥ (६।१०।१४)
विचार्यार्यैः सहालोक्य शास्त्राण्यध्यात्मभावनात् ।
सत्तासामान्यनिष्ठत्वं यत्तद्ब्रह्म परं विदुः ॥१२॥ (६।१०।१५)

[८] बन्धमोक्षयोर्मिथ्यात्वम् :—

मिथ्याकाल्पनिकीवेयं मूर्खाणां बन्धकल्पना ।
मिथ्यैवाभ्युदिता तेषामितरा मोक्षकल्पना ॥ १ ॥ (३।१००।३९)
एवमज्ञानकादेव बन्धमोक्षदृशोऽस्मृतेः ।
वस्तुतस्तु न बन्धोऽस्ति न मोक्षोऽस्ति महामते॥२॥(३।१००।४०)
बन्धमोक्षादिसंमोहो न प्राज्ञस्यास्ति कश्चन ।
संमोहबन्धमोक्षादि ह्यज्ञस्यैवास्ति राघव ॥३॥ (३।१००।४२)
नित्यासंभवबन्धस्य बद्धोऽस्मीति कुकल्पना ।
यस्य काल्पनिकस्तस्य मोक्षो मिथ्या न तत्त्वतः॥४॥(३।१००।३७)

३—मोक्षोपायः

[१] न ज्ञानेतर उपायः :—

संसारोत्तरणे तत्र न हेतुर्वनवासिता ।
नापि स्वदेशावासित्वं न च कष्टतपःक्रियाः ॥१॥(६।१९९।३०)
न क्रियायाः परित्यागो न क्रियायाः समाश्रयः ।
नाचारेषु समारम्भविचित्रफलपालयः ॥ २ ॥ (६।१९९।३१)
न तीर्थेन न दानेन न स्नानेन न विद्यया ।
न ध्यानेन न योगेन न तपोभिर्न चाध्वरैः ॥३॥ (६।१७४।२४)
न दैवं नच कर्माणि न धनानि न बान्धवाः । (५।१३।८)
किञ्चिन्नोपकरोत्यत्र तपोदानव्रतादिकम् ॥ ४ ॥ (३।६।४)
न शास्त्रान्न गुरोर्वाक्यान्न दानान्नेश्वरार्चनात् । (६।१९७।१८)
तपस्तीर्थादिना स्वर्गाः प्राप्यन्ते न तु मुक्तता ॥५॥ (६।१७४।२६)
ततो वच्मि महाबाहो यथा ज्ञानेतरा गतिः ।
नास्ति संसारतरणे पाशबन्धस्य चेतसः ॥ ६ ॥ (५।६७।२)

[२] ज्ञानमेवोपायः :—

ज्ञानयुक्तिप्लवेनैव संसाराब्धि सुदुस्तरम् ।
महाधियः समुत्तीर्णा निमेषेण रघूद्वह ॥ १ ॥ (२।११।३६)
अत्र ज्ञानमनुष्ठानं न त्वन्यदुपयुज्यते । (३।६।२)
ज्ञानादेव परा सिद्धिर्न त्वनुष्ठानदुःखतः ॥ २ ॥ (३।६।१)

बहुकालमियं रूढा मिथ्याज्ञानविषूचिका ।
जगन्नाम्न्यविचाराख्या विना ज्ञानं न शाम्यति ॥३॥ (३।८।२)
अयं स देव इत्येव संपरिज्ञानमात्रतः ।
जन्तोर्न जायते दुःखं जीवन्मुक्तत्वमेति च ॥ ४ ॥ (३।६।६)
ज्ञानेन सर्वदुःखानां विनाश उपजायते । (५।९३।१८)
ज्ञानवानुदितानन्दो न क्वचित्परिमज्जति ॥ ५ ॥ (५।९३।२४)
ज्ञानवानेव सुखवान्ज्ञानवानेव जीवति ।
ज्ञानवानेव बलवान्स्तस्माज्ज्ञानमयो भव ॥ ६ ॥ (५।९२।४९)
ज्ञानान्निर्दुःखतामेति ज्ञानादज्ञानसंक्षयः ।
ज्ञानादेव परा सिद्धिर्नान्यस्माद्राम वस्तुतः ॥ ७ ॥ (५।८८।१२)
ज्ञायते परमात्मा चेद्राम दुःखस्य संततिः ।
क्षयमेति विषावेशशान्ताविव विषूचिका ॥ ८ ॥ (३।७।१७)
दुरुत्तरा या विपदो दुःखकल्लोलसंकुलाः ।
तीर्यते प्रज्ञया ताभ्यो नानाऽपद्भ्यो महामते ॥ ९ ॥ (५।१२।२०)
कलना सर्वजन्तूनां विज्ञानेन शमेन च ।
प्रबुद्धा ब्रह्मतामेति भ्रमतीतरथा जगत् ॥ १० ॥ (५।१३।६८)

[३] मोक्षप्राप्तौ भक्तेरनावश्यकता :—

(अ) आत्मदेवेतरो देवो नाराधनीयः :—

आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मात्मना न चेत्त्रातस्तदुपायोऽस्ति नेतरः ॥ १ ॥ (६।१६२।१८)

अभ्यासवैराग्ययुतादाक्रान्तेन्द्रियपन्नगात् ।
नात्मनः प्राप्यते यत्तत्प्राप्यते न जगत्त्रयात् ॥ २ (५।४३।१८)
आराधयात्मनात्मानमात्मनात्मानमर्चयेत् ।
आत्मनात्मानमालोक्य संतिष्ठस्वात्मनात्मनि ॥३॥ (५।४३।१८)
सर्वेषामुत्तमस्थानां सर्वासां चिरसंपदाम् ।
स्वमनोनिग्रहो भूमिर्भूमिः सस्यश्रियामिव ॥४॥ (५।४३।३५)
शास्त्रयत्नविचारेभ्यो मूर्खाणां प्रपलायिनाम् ।
कल्पिता वैष्णवी भक्तिः प्रवृत्त्यर्थं शुभस्थितौ ॥५॥ (५।४३।२०)
क्रियते माधवादीनां प्रणयप्रार्थना स्वयम् ।
तथैव क्रियते कस्मान्न स्वकस्यैव चेतसः ॥६॥ (५।४३।२५)
सर्वस्यैव जनस्यास्य विष्णुरभ्यन्तरे स्थितः ।
तं परित्यज्य ये यान्ति बहिर्विष्णुं नराधमाः ॥७॥ (५।४३।२६)
वरमाप्नोति यो वापि विष्णोरमिततेजसः ।
तेन स्वस्यैव तत्प्राप्तं फलमभ्यासशाखिनः ॥८॥ ५।४३।३४)

(आ) कोऽपि देवोऽविचारवन्तं ज्ञानं दातुं न समर्थः :—

रामापर्यवसानेयं माया संसृतिनामिका ।
आत्मचिज्जयेनैव क्षयमायाति नान्यथा ॥ ९ ॥ (५।४४।१)
चिरमाराधितोप्येष परमप्रीतिमानपि ।
नाविचारवतो ज्ञानं दातुं शक्नोति माधवः ॥१०॥ (५।४३।१०)
यद्यदासाद्यते किञ्चित्केनचित्क्वचिदेव हि ।
स्वशक्तिसंप्रवृत्त्या तल्लभ्यते नान्यतः क्वचित् ॥११॥(५।४३।१३)

न हरेर्न गुरोर्नार्थात्किञ्चिदासाद्यते महत्
आक्रान्तमनसः स्वस्माद्यदासादितमात्मनः॥ १२ ॥ (५।४३।१७)
गुरुश्चेदुद्धरत्यज्ञमात्मीयात्पौरुषादृते ।
उष्ट्रं दान्तं बलीवर्दं तत्कस्मान्नोद्धरत्यसौ ॥१३॥ (५।४३।१६)

(इ) ईश्वरः सर्वस्यान्तरेव वर्तते :—

य एष देवः कथितो नैष दूरेऽवतिष्ठते ।
शरीरे संस्थितो नित्यं चिन्मात्रमिति विश्रुतः ॥१४॥ (३।७।२)
चिन्मात्रमेष शशिभृच्चिन्मात्रं गरुडेश्वरः ।
चिन्मात्रमेव तपनश्चिन्मात्रं कमलोद्भवः ॥ १५ ॥ (३।७।४)
न ह्येष दूरे नाभ्याशे नालभ्यो विषमे न च ।
स्वानन्दाभासरूपोऽसौ स्वदेहादेव लभ्यते ॥१६॥ (३।६।३)
संत्यज्य हृद्गुहेशानं देवमन्यं प्रयान्ति ये ।
ते रत्नमभिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः ॥१७॥ (५।८।१४)

(ई) ज्ञानादेवेश्वरप्राप्तिः :—

अस्य देवाधिदेवस्य परस्य परमात्मनः ।
ज्ञानादेव परा सिद्धिर्नत्वनुष्ठानदुःखतः ॥ १८ ॥ (३।६।१)
विना तेनेतरेणायमात्मा लभ्यत एव नो । (६।३८।३०)
अत्र ज्ञानमनुष्ठानं न त्वन्यदुपयुज्यते ॥१९॥ (३।६।२)

(उ) आत्मदेवपूजनविधिः :—

अव्युत्पन्नधियो ये हि बालपेलवचेतसः ।
कृत्रिमार्चामयं तेषां देवार्चनमुदाहृतम् ॥ २० ॥ (६।३०।५)
संवेदनात्मकतया गतया सर्वगोचरम् ।
न तस्याह्वानमंत्रादि किञ्चिद्देवोपयुज्यते ॥ २१ ॥ (६।३५।२४)
न दीपेन न धूपेन न पुष्पविभवार्पणैः ।
नान्नदानादिदानेन न चन्दनविलेपनैः ॥२२॥ (६।३८।२३)
न च कुंकुमकर्पूरभोगैश्चित्रैर्न चेतरैः ।
नित्यमक्लेशलभ्येन शीतलेनाऽविनाशिना ॥२३॥ (६।३८।२४)
एकेनैवाऽमृतेनैष बोधेन स्वेन पूज्यते ।
एतदेव परं ध्यानं पूजैषैव परा स्मृता ॥ २४ ॥ (६।३८।२५)
नित्यमेव शरीरस्थमिमं ध्यायेत्परं शिवम् । (६।३९।३)
ऐषोऽसौ परमो योग एषा सा परमा क्रिया ॥२५॥ (६।३८।३६)
शमबोधादिभिः पुष्पैर्देव आत्मा यदर्च्यते ।
तत्तु देवार्चनं विद्धि नाकारार्चनमर्चनम् ॥२६॥ (६।२९।१२८)
पूजनं ध्यानमेवान्तर्नान्यदस्त्यस्य पूजनम् । (६।३८।६)
स्वसंविदात्मा देवोऽयं नोपहारेण पूज्यते ॥२७॥ (६।३८।२२)
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्ननाच्छन्स्वपञ्श्वसन् ।(६।३८।२६)
प्रलपन्विसृजन्गृह्णन्शुद्धसंविन्मयो भवेत् ॥२८॥ (६।३८।२७)
ध्यानामृतेन सम्पूज्य स्वयमात्मानमीश्वरम् । (६।३८।२७)
ध्यानोपहार एवात्मा ध्यानं ह्यस्य समीहितम् ॥२९॥ (६।३८।२८)

ध्यानमर्घ्यं च पाद्यं च शुद्धसंवेदनात्मकम् ।
ध्यानसंवेदनं पुष्पं सर्वं ध्यानपरं विदुः ॥३०॥ (६।३८।२६)
विना तेनेतरेणायमात्मा लभ्यत एव नो ।
ध्यानात्प्रसादमायान्ति सर्वभोगसुखश्रियः ॥३१॥ (६।३८।३०)

(ऊ) ज्ञानिनां देवार्चनम् :—

यथाप्राप्तेन सर्वेण तमर्चयति वस्तुना ।
समया सर्वथा बुद्ध्या चिन्मात्रं देवचित्परम् ॥३२॥ (६।३६।३०)
यथाप्राप्तक्रमोत्थेन सर्वार्थेन समर्चयेत् ।
मनागपि न कर्तव्यो यत्नोऽत्रापूर्ववस्तुनि ॥ ३३ ॥ (६।३६।३१)
प्राप्तदेहतया नित्यं यथार्थक्रियायाऽनया ।
कामसंसेवनेनाथ पजयेच्छोभनं विभुम् ॥ ३४ ॥ (६।३६।३२)
भक्ष्यभोज्यान्नपानेन नानाविभवशालिना ।
शयनासनयानेन यथाप्राप्तेनार्चयेच्छिवम् ॥३५॥ (६।३६।३३)
कान्तान्नपानसंभोगसंभारादिविलासिना ।
सुखेन सर्वरूपेण सम्बुद्ध्याऽऽत्मानमर्चयेत् ॥३६॥ (६।३६।३४)
आधिव्याधिप्रीतेन मोहसंरम्भशालिना ।
सर्वोपद्रवदुःखेन प्राप्तेनात्मानमर्चयेत् ॥ ३७ ॥ (६।३६।३५)
दारिद्र्येणाथ राज्येन प्रवाहपतितात्मना ।
विचित्रचेष्टापुष्पेण शुद्धात्मानं समर्चयेत् ॥ ३८ ॥ (६।३६।३७)
रागद्वेषविलासेन शुद्धात्मानं समर्चयेत् । (६।३६।३८)
मैत्र्या माधुर्यधर्मिण्या हृत्स्थमात्मानमर्चयेत् ॥३६॥(६।३६।३६)

उपेक्षया करुणया सदा मुदितया हृदि ।
शुद्धया शक्तिपद्धत्या बोधेनात्मानमर्चयेत् ॥ ४० ॥ (६।३९।४०)
आकस्मिकोपयातेन स्थितेनानियतेन च ।
भोगाभोगैकभोगेन प्राप्तेनात्मानमर्चयेत् ॥ ४१॥ (६।२९।४१)
भोगानामनिषिद्धानां निषिद्धानां च सर्वदा ।
त्यागेन वीतरागेण स्वात्मानं शुद्धमर्चयेत् ॥४२॥(६।३९।४२)
ईहितानीहितौघेन युक्तायुक्तमयात्मना । (६।३९।४३)
निर्विकारतयैतद्धि परमार्चनमात्मनः ॥ ४३ ॥ (६।३९।४४)
सर्वदैव समग्रासु चेष्टानिष्टासु दृष्टिषु ।
परमं साम्यमाधाय नित्यात्मार्चाव्रतं चरेत् ॥४४॥ (६।३९·४५)
त्यक्तेनाप्तेन चार्थेन ह्यर्थानामीशमर्चयेत् । (६।३९।४३)
नष्टं नष्टमुपेक्षेत प्राप्तं प्राप्तमुपाहरेत् ॥ ४५ ॥ (६।३९।४५)
आपातरमणीयं यद्यच्चापातसुदुःसहम् ।
तत्सर्वं सुसमं बुद्ध्वा नित्यात्मार्चाव्रतं चरेत् ॥ (६।३९।४७)
अयं सोऽहमयं नाहं विभागमिति सन्त्यजेत् ।
सर्वं ब्रह्मेति निश्चित्य शुद्धात्मानं समर्चयेत् ॥४७॥ (६।३९।४९)
सर्वदा सर्वरूपेण सर्वाकारविकारिणा ।
सर्वं सर्वप्रकारेण प्राप्तेनात्मानमर्चयेत् ॥ ४८ ॥ (६।३९।४९)
अनीहितं परित्यज्य परित्यज्य तथेहितम् ।
उभयाश्रयेणापि नित्यमात्मानमर्चयेत् ॥ ४९ ॥ (६।३९।५०)
देशकालक्रियायोगाद्यदुपैति शुभाशुभम् ।
अविकारं गृहीतेन तेनैवात्मानमर्चयेत् ॥ ५० ॥ (६।३९।५३)

(ए) बाह्यदेवार्चनस्य गौणत्वम् :—

हृद्गुहावासिचित्तत्वं मुख्यं सानातनं वपुः ।
शंखचक्रगदाहस्तो गौण आकार आत्मनः ॥ ५१ ॥ (५।४३।२७)
यो हि मुख्यं परित्यज्य गौणं समनुधावति ।
त्यक्त्वा रसायनं सिद्धं साध्यं संसाधयत्यसौ ॥५२॥(५।४३।२८)
मुख्यः पुरुषयत्नोत्थो विचारः स्वात्मदर्शने ।
गौणो वरादिको हेतुर्मुख्यहेतुपरो भव ॥ ५३ ॥ (५।४३।११)
अभ्यासयत्नौ प्रथमं मुख्यो विधिरुदाहृतः ।
तदभावे तु गौणः स्यात्पूज्यपूजामयक्रमः ॥५४॥ (५।४३।२१)
अप्राप्तात्मविवेकोऽन्तरङ्गचित्तवशीकृतः ।
शंखचक्रगदापाणिमर्चयेत्परमेश्वरम् ॥ ५५ ॥ (५।४३।४०)
तत्पूजनेन कष्टेन तपसा तस्य राघव ।
काले निर्मलतामेति चित्तं वैराग्यकारिणा ॥५६॥ (५।४३।३१)
नित्याभ्यासविवेकाभ्यां चित्तमाशु प्रसीदति ।
आम्र एव दशामेति साहकारीं शनैः शनैः ॥५७॥ (५।४३।३२)
एतदप्यात्मनैवात्मा फलमाप्नोति भाषितम् ।
हरिपूजाक्रमाख्येन निमित्तेनारिसूदन ॥ ५८ ॥ (५।४३।३३)

[४] आजीवनं कर्मत्यागो न युज्यते तस्मात्कर्मत्यागोऽपि न मोक्षे कारणम् :—

कर्मैव पुरुषो राम पुरुषस्यैव कर्मता ।

एतेह्यभिन्ने विद्धि त्वं यथा तुहिनशीतते ॥ १ ॥ (६।२८।८)
मनागपि न भेदोऽस्ति संवित्स्पन्दमयात्मनोः ।
कल्पनांशादृते राम सृष्टौ पुरुषकर्मणोः ॥ २ ॥ (६।२८।६)
अस्य राघव सूक्ष्मस्य कर्मणो वेदनात्मनः ।
कस्त्यागः किमनुष्ठानं यावद्देहमिति स्थितम् ॥३॥ (६।२।३१)
एतच्चेतनमेवान्तर्विकसत्युद्भवभ्रमैः ।
वासनेच्छामनःकर्मसङ्कल्पाद्यभिधात्मभिः ॥ ४ ॥ (६।२।३४)
प्रबुद्धस्याप्रबुद्धस्य देहिनो देहगेहके ।
आदेहं विद्यते चित्तं त्यागस्तस्य न विद्यते ॥ ५ ॥ (६।२।३५)
जीवतां तस्य संत्यागः कथं नामोपपद्यते । (६।२।३६)
त्यागो हि कर्मणां तस्मादादेहं नोपपद्यते ॥ ६ ॥ (६।२।४२)
मूलं स्वकर्मणः संविन्मनसो वासनात्मनः । (६।२।४३)
सा चादेहं समुच्छेत्तुमृते बोधान्न शक्यते ॥ ७ ॥ (६।२।४४)
कुर्वतोऽकुर्वतो वापि स्वर्गेऽपि नरकेऽपि वा ।
यादृग्वासनमेतत्स्यान्मनस्तदनुभूयते ॥ ८ ॥ (४।३८।४)
तस्मादज्ञाततत्त्वानां पुंसां कुर्वतामकुर्वतां च
कर्तृता न तु ज्ञाततत्त्वानामवासनत्वात् ॥ ६ ॥ (४।३८।५)
राजन्यावदयं देहस्तावन्मुक्तधियामपि ।
यथाप्राप्तक्रियात्यागो रोचते न स्वभावतः ॥१०॥ (५।०६।१६)
यावदायुरिदं राम निश्चितं स्पन्दते तनुः ।
तद्यथाप्राप्तमव्यग्रं स्पन्दतामपरेण किम् ॥ ११ ॥(६।१६।५)

[५] सम्यग्ज्ञानस्वरूपम्—

अनाद्यन्तावभासात्मा परमात्मेह विद्यते ।
इत्येको निश्चयः स्फारः सम्यग्ज्ञानं विदुर्बुधाः ॥१॥ (५।७९।२)
इमा घटपटाकाराः पदार्थशतपंक्तयः ।
आत्मैव नान्यदस्तीति निश्चयः सम्यगीक्षणम् ॥२॥ (५।७९।३)
ज्ञानस्य ज्ञेयता नास्ति केवलं ज्ञानमव्ययम् ।
अवाच्यमिति बोधोऽन्तः सम्यग्ज्ञानमिति स्मृतम् ॥३॥(६।१९०।५)

[६] स्वपौरुषविचाराभ्यामेवात्मज्ञानं जायते :—

स्वपौरुषप्रयत्नेन विवेकेन विकासिना ।
स देवो ज्ञायते राम न तपःस्नानकर्मभिः ॥ १ ॥ (३।६।९)
दृश्यते स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया। (६।११८।४)
सर्वदा सर्वथा सर्वं स प्रत्यक्षोऽनुभूतितः ॥२॥ (५।७३।१५)
सुन्दर्या निजया बुद्ध्या प्रज्ञयेव वयस्यया ।
पदमासाद्यते राम न नाम क्रिययान्यया ॥ ३ ॥ (५।१२।१८)
स्वयमेव विचारेण विचार्यात्मानमात्मना ।
यावन्नाधिगतं ज्ञेयं न तावदधिगम्यते ॥ ४ ॥ (५।५।६)
स्वयमालोकय प्राज्ञ संसारारम्भदृष्टिषु ।
किं सत्यं किमसत्यं वा भव सत्यपरायणः ॥ ५ ॥ (५।५।८)
विचारेणावदातेन पश्यत्यात्मानमात्मना । (५।५।१७)
संसारमननं चित्रं विचारेण विलीयते ॥ ६ ॥ (५।१३।१३)

[७] विचारार्थं चित्तशुद्धिरपेक्षिता :—

शास्त्रसज्जनसत्कार्यसङ्गेनोपहृतैनसाम् ।
सारावलोकिनी बुद्धिर्जायते दीपकोपमा ॥ १ ॥ (५।५।५)
पूर्वं राघव शास्त्रेण वैराग्येण परेण च ।
तथा सज्जनसंगेन नीयतां पुण्यतां मनः ॥ २ ॥ (५।५।१४)
वैराग्येणाथ शास्त्रेण महत्त्वादिगुणैरपि ।
यत्नेनापद्विघातार्थं स्वयमेवोन्नयेन्ममः ॥ ३ ॥ (५।२१।११)

[८] विचारविषयाः :—

कोऽहं कथमिदं किंवा कथं मरणजन्मनी ।
विचारयान्तरेवं त्वं महत्तामलमेष्यसि ॥ १ ॥ (५।५८।३२)
येषु येषु पदार्थेषु धृतिं बध्नाति मानवः ।
तेषु तेष्वेव तस्यायं दृष्टो नाशोदयो भृशम् ॥ २ ॥ (५।६।३४)
आगमापायि विरसं दशावैषम्यदूषितम् ।
आसारसारं संसारं किं तत्पश्यति दुर्मतिः ॥ ३ ॥ (५।६।३७)
सुखदुःखानुभावित्वमात्मनीत्यवबुध्यते ।
असत्यमेव गगने बिन्दुताम्लानते यथा ॥ ४ ॥ (५।५।३३)
सुखदुःखे न देहस्य सर्वातीतस्य नात्मनः ।
एते ह्यज्ञानकस्यैव तस्मिन्नष्टे न कस्य चित् ॥ ५ ॥ (५।५।३४)
मिश्रीभूतमिवानेन देहेनोपहतात्मना ।
व्यक्तीकृत्य स्वमात्मानं स्वस्थो भवत मा चिरम् ॥६॥ (५।५।२४)

[९] अविद्ययैवाविद्यानाशः :–

यो मुमुक्षुरविद्यांशः केवलो नाम सात्त्विकः ।
सात्त्विकैरेव सोऽविद्याभागैः शास्त्रादिनामभिः ॥१॥(६।४१।५)
अविद्यां श्रेष्ठयाऽश्रेष्ठां क्षालयन्निह तिष्ठति ।
मलं मलेनापहरन्युक्तिज्ञो रजको यथा ॥ २ ॥ (६।४२।६)
काकतालीयवत्पश्चादविद्याक्षय आगते ।
प्रपश्यत्यात्मनैवात्मा विचारयति चात्मना ॥ ३ ॥ (६।४१।७)
पश्यत्यात्मानमात्मैव विचारयति चात्मना ।
आत्मैवेहास्ति नाविद्या इत्यविद्याक्षयं विदुः ॥४॥ (६।४१।१०)

[१०] ज्ञानप्राप्तौ शास्त्रस्योपयोगः :–

वर्गत्रयोपदेशो हि शास्त्रादिष्वस्ति राघव ।
ब्रह्मप्राप्तिस्त्ववाच्यत्वान्नास्ति तच्छासनेष्वपि ॥१॥ (६।१९७।१५)
केवलं सर्ववाक्यार्थैर्ध्वन्यमानात्रगम्यते ।
कालश्रीः प्रसवेनेव स्वयं स्वानुभवेन सा ॥२॥ (६।१९७।१६)
सर्वार्थातिगतं शास्त्रे विद्यते ब्रह्मवेदनम् ।
सर्वगातिगतं स्वच्छं लावण्यमिव योषिति ॥३॥ (६।१९७।१७)
न शास्त्रान्न गुरोर्वाक्यान्न दानान्नेश्वरार्चनात् ।
एष सर्वपदातीतो बोधः सम्प्राप्यते परः ॥४॥ (६।१९७।१८)
एतान्यकरणान्येव कारणत्वं गतान्यलम् ।
परमात्मैकविश्रान्तौ यथा राघव तच्छृणु ॥५॥ (६।१९७।१९)

शास्त्रादभ्यासयोगेन चित्तं यातं विशुद्धताम् ।
अनिच्छदेवमेवाशु पदं पश्यति पावनम् ॥६॥ (६।१९७।२०)
एतच्छास्त्रादविद्यायाः सात्विको भाग उच्यते ।
तामसः सात्विकेनास्या भागेनायाति संक्षयम् ७ (६।१९७।२१)
नूनं मलं प्रधानेन क्षालयच्छास्त्ररूपिणा ।
पुरुषः शुद्धतामेति परमां वस्तुशक्तितः ॥ ८ ॥ (६।१९७।२२)
मुमुक्षुशास्त्रयोरेवं मिथः सम्बन्धमात्रतः ।
सर्वसंवित्पदातीतमात्मज्ञानं प्रवर्तते ॥ ९ ॥ (६।१९७।२५)
लोष्टेन लोष्टं सलिले क्षालयन्बालको यथा ।
क्षयेण लोष्टयोर्हस्तनैर्मल्यं लभते परम् ॥ १० ॥(६।१९७।२७)
तथा शास्त्रविकल्पौघैर्विकल्पांश्चेतनाद्बुधः ।
क्षालयन्स्वविचारेण परमां याति शुद्धताम् ॥११॥(६।१९७।२८)
महावाक्यार्थनिष्यन्दं स्वात्मज्ञानमवाप्यते ।
शास्त्रादेरिक्षुरसतः स्वाद्विव स्वानुभूतितः ॥१२॥ (६।१९७।२९)
शास्त्रार्थैर्बुध्यते नात्मा गुरोर्वचनतो न च ।
बुध्यते स्वयमेवैष स्वबोधवशतस्ततः ॥ १३ ॥ (६/१।४१।१५)
गुरूपदेशशास्त्रार्थैर्विना चात्मा न बुध्यते ।
एतत्संयोगसत्तैव स्वात्मज्ञानप्रकाशिनी ॥ १४ ॥ (६/१।४१।१६)

४—ज्ञानसिद्धिः

[१] ज्ञानबन्धुः :—

अज्ञातारं वरं मन्ये न पुनर्ज्ञानबन्धुताम् । (६।२१।१)
व्याचष्टे यः पठति शास्त्रं भोगाय शिल्पिवत् ॥ १ ॥ (६।२१।२)
यतते न त्वनुष्ठाने ज्ञानबन्धुः स उच्यते । (६।२१।३)
कर्मस्पन्देषु नो बोधः फलितो यस्य दृश्यते ॥२॥ (६।२१।४)
वासनाशनमात्रेण तुष्टाः शास्त्रफलानि ये ।
जानन्ति ज्ञानबन्धूंस्तान्विद्याच्छास्त्रार्थशिल्पिनः ॥३॥ (६।२१।५)
प्रवृत्तिलक्षणे धर्मे वर्तते यः श्रुतोचिते ।
अदूरवर्तिज्ञानत्वाज्ज्ञानबन्धुः स उच्यते ॥ ४ ॥ (६।२१।६)
आत्मज्ञानं विदुर्ज्ञानं ज्ञानान्यन्यानि यानि तु ।
तानि ज्ञानावभासनानि सारस्यानवबोधनात् ॥५॥ (६।२१।७)
आत्मज्ञानमनासाद्य ज्ञानान्तरलवेन ये ।
सन्तुष्टाः कष्टचेष्टं ते ते स्मृता ज्ञानबन्धवः ॥६॥ (६।२१।८)

[२] ज्ञानी :—

ज्ञानेन ज्ञेयनिष्ठत्वाद्योऽचित्तं चित्तमेव च ।
न बुध्यते कर्मफलं स ज्ञानीत्यभिधीयते ॥ १ ॥ (६।२२।१)

ज्ञात्वा सम्यगनुज्ञानं दृश्यते येन कर्मसु ।
निर्वासनात्मकं ज्ञस्य स ज्ञानीत्यभिधीयते ॥ २ ॥ (६।२२।२)
अन्तःशीतलतेहासु प्राज्ञैर्यस्यावलोक्यते ।
अकृत्रिमैकशान्तस्य स ज्ञानीत्यभिधीयते ॥ ३ ॥ (६।२२।३)
अपुनर्जन्मने यः स्याद्बोधः स ज्ञानशब्दभाक् ।
वसनाशनदाशेषा व्यवस्था शिल्पजीविका ॥ ४ ॥ (६।२२।४)
प्रवाहपतिते कार्ये कामसंकल्पवर्जितः ।
तिष्ठत्याकाशहृदयो यः स पण्डित उच्यते॥ ५ ॥ (६।२२।५)

[३] नाभ्यासेन विना ज्ञानसिद्धिः :—

जन्मान्तरशताभ्यस्ता राम संसारसंस्थितिः ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥१॥ (५।६२।२३)
पौनःपुन्येन करणमभ्यास इति कथ्यते । (६।६७।४३)
अभ्यासेन विना साधो नाभ्युदेत्यात्मभावना ॥२॥ (६।११।१)
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः ॥ ३ ॥ (३।२२।२४)
उदितौदार्यसौन्दर्यवैराग्यरसरञ्जिता ।
आनन्दस्यन्दिनी येषां मतिस्तेऽभ्यासिनः परे ॥४॥(३।२२।२६)
अत्यन्ताभावसम्पत्तौ ज्ञातृज्ञेयस्य वस्तुनः ।
युक्त्या शास्त्रैर्यतन्ते ये ते ब्रह्माभ्यासिनः स्थिताः५(३।२२।२७)
नाभ्यासेन विना ज्ञाने शिवे विश्रान्तवानसि ।
अभ्यासेन तु कालेन भृशं विश्रान्तिमेष्यसि ॥६॥(६।१५५।१३)

[४] संसारोत्तरणे युक्तिर्योग इति कथ्यते :—

संसारोत्तरणे युक्तिर्योगशब्देन कथ्यते ।
तां विद्धि द्विप्रकारां त्वं चित्तोपशमधर्मिणीम् ॥१॥ (६।१३।३)
आत्मज्ञानं प्रकारोऽस्या एकः प्रकटितो भुवि ।
द्वितीयः प्राणसंरोधः शृणु योऽयं मयोच्यते ॥२॥ (६।१३।४)
प्रकारौ द्वावपि प्रोक्तौ योगशब्देन यद्यपि ।
तथापि रूढिमायातः प्राणयुक्तावसौ भृशम् ॥ ३ ॥ (६।१२।६)
असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः ।
मम त्वभिमतः साधो सुसाध्यो ज्ञाननिश्चयः ॥४॥ (६।१३।८)
द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ ५ ॥ (५।७८।८)
चित्तचित्तपरिस्पन्दपक्षयोरेकसंक्षये ।
स्वयं गुणो गुणी स्थित्वा नश्यतो द्वौ न संशयः॥६॥(५।७८।७)

[५] योगनिष्ठा :—

जीवस्य च तुरीयाख्या स्थितिर्या परमात्मनि ।
अवस्थाबीजनिद्रादिनिर्मुक्ता चित्सुखात्मिका॥१॥(६।१२८।५०)
योगस्य सेयं वा निष्ठा सुखं संवेदनं महत् ॥२॥ (६।१२८।५१)
मनस्यस्तं गते पुंसां तदन्यन्नोपलभ्यते ।
प्रशान्तामृतकल्लोले केवलामृतवारिधौ ॥ ३ ॥ (६।१२८।५२)

[६] योगाभ्यासत्रयम् :—

एतकतत्त्वघनाभ्यासः प्राणानां विलयस्तथा ।
मनोविनिग्रहश्चेति योगशब्दार्थसंग्रहः ॥ १ ॥ (६।६९।२७)
एकस्मिन्नेव संसिद्धे संसिध्यन्ति परस्परम् ।
एकार्थाभ्यासनप्राणरोधचेतःपरिक्षयाः ॥ २ ॥ (६।६९।४०)
त्रिष्वेतेषु प्रयोगेषु मनःप्रशमनं वरम् ।
साध्यं विद्धि तदेवाशु यथा भवति तच्छिवम् ॥३॥(६।६९।२९)

[७] एकतत्त्वघनाभ्यासः :—

एकतत्त्वघनाभ्यासाच्छान्तं शाम्यत्यलं मनः ।
तल्लीनत्वात्स्वभावस्य तेन प्राणोऽपि शाम्यति ॥१॥ (६।६९।४८)

(अ) ब्रह्मभावना :—

विचार्य यदनन्तात्मतत्त्वं तन्मयतां नय ।
मनस्ततस्तल्लयेन तदेव भवति स्थिरम् ॥ २ ॥ (६।६९।४९)
प्रत्याहारवतां चेतः स्वयं भोग्यक्षयादिव ।
विलीयते सह प्राणैः परमेवावशिष्यते ॥ ३ ॥ (६।६९।५२)
यथैव भावयत्यात्मा सततं भविष्यति स्त्रयम् ।
तथैवापूर्यते शक्त्या शीघ्रमेव महानपि ॥ ४ ॥ (४।११।५९)
भाविता शक्तिरात्मानमात्मतां नयति क्षणात् ।
अनन्तमखिलं प्रावृड् मिहिका महती यथा ॥५॥ (४।११।६०)

(आ) पदार्थभावनात्यागः (अभावभावना):—

सत्यदृष्टौ प्रपन्नायामसत्ये क्षयमागते ।
निर्विकल्पचिदच्छात्मा स आत्मा समवाप्यते॥६॥(४।२१।४३)
भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अत्यन्ताभावसम्बोधे यदि रूढिरलं भवेत् ॥७॥ (३।७।२७)
तज्ज्ञातं ब्रह्मणो रूपं भवेन्नान्येन कर्मणा ।
दृश्यात्यन्ताभावतस्तु ऋते नान्या शुभा गतिः ॥८॥ (३।७।२८)
जगन्नाम्नोऽस्य दृश्यस्य स्वसत्तासम्भवं विना ।
बुध्यते परमं तत्त्वं न कदाचन केनचित् ॥ ९ ॥ (३।७।३०)
अत्यन्ताभावसम्पत्तौ द्रष्टृदृश्यदृशां मनः ।
एकध्याने परे रूढे निर्विकल्पसमाधिनि ॥१०॥ (३।२१।७६)
वासनाक्षयबीजेऽस्मिन्किश्चिदङ्कुरिते हृदि ।
क्रमान्नोदयमेष्यन्ति रागद्वेषादिका दृशः ॥११॥ (३।२१।७७)
संसारसम्भवश्चायं निर्मूलत्वमुपेष्यति ।
निर्विकल्पसमाधानं प्रतिष्ठामलमेष्यति ॥१२॥ (३।२१।७८)
अत्यन्ताभावसम्पत्ति विनाहन्ताजगत्स्थितेः ।
अनुत्पादमयी ह्येषा नोदेत्येव विमुक्तता ॥१३॥ (३।२१।१२)
अत्यन्ताभावसम्पत्तौ ज्ञातृज्ञेयस्य वस्तुनः ।
युक्त्या शास्त्रैर्यतन्ते ये ते ब्रह्माभ्यासिनःस्थिताः॥१४॥(३।२२।२७)
सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा ।
इदं जगदहं चेति बोधाभ्यास उदाहृतः ॥ १५ ॥ (३।२२।२८)

दृश्यासम्भवबोधो हि ज्ञानं ज्ञेयं च कथ्यते ।
तदभ्यासेन निर्वाणमित्यभ्यासो महोदयः ॥१६॥ (३।२२।३१)

(७) केवलीभावः :—

यद्द्रष्टुरस्याद्रष्टृत्वं दृश्याभावे भवेद्बलात् ।
तद्विद्धि केवलीभावं तत एवासतः सतः ॥ १७ ॥ (३।४।५३)
तत्तामुपगते भावे रागद्वेषादिवासनाः ।
शाम्यन्त्यस्पन्दिते वाते स्पन्दनक्षुब्धता यथा॥१८॥ (३।४।५४)
त्रिजगत्त्वमहं चेति दृश्येऽसत्तामुपागते ।
द्रष्टुः स्यात्केवलीभावस्तादृशो विमलात्मनः ॥१९॥ (३।४।५६)
अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे ।
स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे ॥ २० ॥ (३।४।५८)

[८] प्राणस्पन्दनिरोधः :—

तालवृन्तस्य संस्पन्दे शान्ते शान्तो यथानिलः ।
प्राणानिलपरिस्पन्दे शान्ते शान्तं तथा मनः ॥१॥(६।६९।४१)
तस्मिन्संरोधिते नूनमुपशान्तं भवेन्मनः । (५।७८।१५)
मनःस्पन्दोपशान्त्यायं संसारः प्रविलीयते ॥२॥ (५।७८।१६)
प्राणशक्तौ निरुद्धायां मनो राम विलीयते ।
द्रव्यच्छायानु तद्द्रव्यं प्राणरूपं हि मानसम् ॥३॥ (५।१३।८३)

(अ) चित्तसंकल्पितोऽयं सम्बन्धः :—

तेन सङ्कल्पितः प्राणः प्राणो मे गतिरित्यपि ।
न भवामि विनानेन तेन तत्तत्परायणम् ॥ ४ ॥ (ई।१३६।२)
एवं यन्मनसाभ्यस्तमुपलब्धं तथैव तत् ।
तेन मे जीवितं प्राणा इति प्राणे मनः स्थितम् ॥५॥ (ई।१३६।१०)

(आ) प्राणविद्या :—

सर्वदुःखक्षयकरी सर्वसौभाग्यवर्धिनी । (ई।२४।८)
कारणं जीवितस्येह प्राणचिन्ता समाश्रिता ॥ ६ ॥ (ई।२४।९)
इडा च पिङ्गला चास्य देहस्य मुनिनायक ।
सुस्थिते कोमले मध्ये पार्श्वकोष्ठे निमीलिते ॥ ७ ॥ (ई।२४।२०)
पद्मयुग्मत्रयं यन्त्रमस्थिमांसमयं मृदु ।
ऊर्ध्वाधोनालमन्योन्यमिलत्कोमलसद्दलम् ॥८॥ (ई।२४।२१)
सेकेन विकसत्पत्रं सकलाकाशचारिणा ।
चलन्ति तस्य पत्राणि मृदु व्याप्तानि वायुना ॥९॥ (ई।२४।२२)
चलत्सु तेषु पत्रेषु स मरुत्परिवर्धते ।
वाताहते लतापत्रजाले बहिरिवाभितः ॥ १० ॥ (ई।२४।२३)
वृद्धिं नीतः स नाडीषु कृत्वा स्थानमनेकधा ।
ऊर्ध्वाधोवर्तमानासु देहेऽस्मिन्प्रसरत्यथ ॥११॥ (ई।२४।२४)
प्राणापानसमानाद्यैस्ततः स हृदयानिलः ।
संकेतैः प्रोच्यते तज्ज्ञैर्विचित्राकारचेष्टितैः ॥१२॥ (ई।२४।२५)
हृत्पद्मयन्त्रत्रितये समस्ताः प्राणशक्तयः ।

ऊर्ध्वाधः प्रसृता देहे चन्द्रबिम्बादिवांशवः ॥१३॥ (६।२४।२६)
यान्त्यायान्ति विकर्षन्ति हरन्ति विहरन्ति च ।
उत्पतन्ति पतन्त्याशु ता एताः प्राणशक्तयः ॥१४॥ (६।२४।२७)
स एष हृत्पद्मगतः प्राण इत्युच्यते बुधैः ।
अस्य काचिन्मुने शक्तिः प्रस्पन्दयति लोचने॥१५॥(६।२४।२८)
काचित्स्पर्शमुपादत्ते काचिद्वहति नासया ।
काचिदन्नं जरयति काचिद्वक्ति वचांसि च ॥१६॥ (६।२४।२९)
बहुनात्र किमुक्तेन सर्वमेव शरीरके ।
करोति भगवान्वायुर्यन्त्रेहामिव यान्त्रिकः ॥१७॥ (६।२४।३०)
तत्रोर्ध्वाधो द्विसंकेतौ प्रसृतावनिलौ मुने ।
प्राणापानविति ख्यातौ प्रकटौ द्वौ वरानिलौ ॥१८॥(६।२४।३१)
सहस्रविनिकृत्ताञ्जाद्बिसतन्तुलवादपि ।
दुर्लक्ष्या विद्यमानापि गतिः सूक्ष्मतराऽनयोः ॥१९॥(६।२४।३७)
प्राणोऽयमनिशं ब्रह्मन्स्पन्दशक्तिः सदागतिः ।
सबाह्याभ्यन्तरे देहे प्राणोऽयमुपरि स्थितः ॥२०॥ (६।२५।३)
अपानोऽप्यनिशं ब्रह्मन्स्पन्दशक्तिः सदागतिः ।
सबाह्याभ्यन्तरे देहे त्वपानोऽयमवाक्स्थितः ॥२१॥ (६।२५।४)
प्राणापानगतिं प्राप्य सुस्वस्थः सुखमेधते ।
प्राणस्याभ्युदयो ब्रह्मन्पद्मपत्राद्धृदि स्थितात्॥२२॥(६।२५।२९)
द्वादशाङ्गुलपर्यन्ते प्राणोऽस्तं यात्ययं बहिः ।
अपानस्योदयो बाह्याद्द्वादशान्तान्महामुने ॥२३॥ (६।२५।३०)
अस्तङ्गतिरथाम्भोजमध्ये हृदयसंस्थिते ।

प्राणो यत्र समायाति द्वादशान्ते नभःपदे ॥२४॥ (६।२५।३१)
पदात्तस्मादपानोऽयं खादेति समनन्तरम् ।
बाह्याकाशोन्मुखो प्राणो वहत्यग्निशिखा यथा॥२५॥(६।२५।३२)
हृदाकाशोन्मुखोऽपानो निम्ने वहति वारिवत् । (६।२५।३३)
अपानशशिनोऽन्तस्था कला प्राणविवस्वता ॥२६॥(६।२५।३६)
यत्र ग्रस्ता तदासाद्य पदं भूयो न शोच्यते ।
प्राणार्कस्य तथाऽन्तस्था यत्रापानसितांशुना॥२७॥ (६।२५।३७)
ग्रस्ता तत्पदमासाद्य न भूयो जन्मभाङ्नरः ।
प्राण एवार्कतां याति सबाह्याभ्यन्तरेऽम्बरे॥२८॥ (६।२५।३८)
आप्यायनकरीं पश्चाच्छक्तितामधितिष्ठति ।
प्राण एवेन्दुतां त्यक्त्वा शरीराप्यायकारिणीम्॥२९॥(६।२५।३९)
क्षणादायाति सूर्यत्वं संशोषणकरं पदम् ।
अर्कतां सम्परित्यज्य न यावच्चन्द्रतां गतः ॥३०॥ (६।२५।४०)
प्राणस्तावद्विचार्यान्तेऽदेशकाले न शोच्यते ।
हृदि चन्द्रार्कयोर्ज्ञात्वा नित्यमस्तमयोदयम् ॥३१॥ (६।२५।४१)
आत्मनो निजमाधारं न भूयो जायते मनः ।
सोदयास्तमयं सेन्दुं सरश्मि सगमागमम् ॥३२॥ (६।२५।४२)
अपानेऽस्तङ्गते प्राणः समुदेति हृदम्बुजात् । (६।२५।४७)
प्राणे त्वस्तङ्गते बाह्यादपानः प्रोदितः क्षणात् ॥३३॥(६।२५।४८)

(इ) प्राणायामः :—

जाग्रतःस्वपतश्चैव प्राणायामोऽयमुत्तमः ।

प्रवर्तते यतस्तज्ज्ञ तत्तावच्छ्रेयसे शृणु ॥ ३४ ॥ (६।२५।५)
बाह्योन्मुखत्वं प्राणानां यद्धृदम्बुजकोटरात् ।
स्वरसेनास्तयत्नानां तं धीरा रेचकं विदुः ॥३५॥ (६।२५।६)
द्वादशाङ्गुलपर्यन्तं बाह्यमाक्रमतामधः ।
प्राणानामङ्गसंस्पर्शो यः स पूरक उच्यते ॥ ३६ ॥ (६।२५।७)
बाह्यात्परापतत्यन्तरपाने यत्नवर्जितः ।
योऽयं प्रपूरणः स्पर्शो विदुस्तमपि पूरकम् ॥ ३७ ॥ (६।२५।८)
अपानेऽस्तङ्गते प्राणो यावन्नाभ्युदितो हृदि ।
तावत्सा कुम्भकावस्था योगिभिर्यानुभूयते ॥ ३८ ॥ (६।२५।९)
रेचकः कुम्भकश्चैव पूरकश्च त्रिधा स्थितः ।
अपानस्योदयस्थाने द्वादशान्तादधो बहिः ॥३९॥ (६।२५।१०)
स्वभावाः सर्वकालस्थाः सम्यग्यत्नविवर्जिताः ।
ये प्रोक्ताः स्फारमतिभिस्ताञ्छृणु त्वं महामते॥४०॥(६।२५।११)
द्वादशाङ्गुलपर्यन्ताद्बाह्यादभ्युदितः प्रभो ।
यो वातस्तस्य तत्रैव स्वभावात्पूरकादयः ॥४१॥ (६।२५।१२)
मृदन्तरस्थानिष्पन्नघटवद्या स्थितिर्बहिः ।
द्वादशाङ्गुलपर्यन्ते नासाग्रसमसंमुखे ॥ ४२ ॥ (६।२५।१३)
व्योम्नि नित्यमपानस्य तं विदुः कुम्भकं बुधाः ।
बाह्योन्मुखस्य वायोर्या नासिकाग्रावधिर्गतिः॥४३॥(६।२५।१४)
तं बाह्यपूरकं त्वाद्यं विदुर्योगविदो जनाः ।
नासाग्रादपि निर्गत्य द्वादशान्तावधिर्गतिः ॥४४॥ (६।२५।१५)
या वायोस्तं विदुर्धीरा अपरं बाह्यपूरकम् ।

बहिरस्तङ्गते प्राणे यावन्नापान उद्गतः ॥४५॥ (६/१।२५।१६)
तावत्पूर्णां समावस्थं बहिष्ठं कुम्भकं विदुः ।
यत्तदन्तर्मुखत्वं स्यादपानस्योदयं विना ॥४६॥ (६/१।२५।१७)
तं बाह्यरेचकं विद्याच्चिन्त्यमानं विमुक्तिदम् ।
द्वादशान्ताद्यदुत्थाय रूपपीवरता परा ॥ ४७ ॥ (६/१।२५।१८)
अपानस्य बहिष्ठं तमपरं पूरकं विदुः ।
बाह्यानाभ्यन्तरांश्चैतान्कुम्भकादीननारतम् ॥४८॥ (६/१।२५।१९)
प्राणापानस्वभावांस्तान्बुध्वा भूयो न जायते । (६/१।२५।२०)
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा॥४९॥(६/१।२५।२१)
एते निरोधमायान्ति प्रकृत्याऽतिचलानिलाः ।
यत्करोति यदश्नाति बुद्ध्यैवालमनुस्मरन् ॥५०॥ (६/१।२५।२२)
कुम्भकादीन्नरः स्वान्तस्तत्र कर्ता न किञ्चन ।
अव्यग्रमस्मिन्व्यापारे बाह्यं परिजहन्मनः ॥५१॥ (६/१।२५।२३)
दिनैः कतिपयैरेव पदमाप्नोति केवलम् ।
एतदभ्यसतः पुंसो बाह्ये विषयवृत्तिषु ॥५२॥ (६/१।२५।२४)
न बध्नाति रतिं चेतः श्वदृतौ ब्राह्मणो यथा । (६/१।२५।२५)
अस्तङ्गतवति प्राणे त्वपानेऽभ्युदयोन्मुखे ॥५३॥ (६/१।२५।५०)
बहिः कुम्भकमालम्ब्य चिरं भूयो न शोच्यते ।
अपानेऽस्तङ्गते प्राणे किञ्चिदभ्युदयोन्मुखे ॥५४॥(६/१।२५।५१)
अन्तःकुम्भकमालम्ब्य चिरं भूयो न शोच्यते ।
प्राणरेचकमालम्ब्य अपानाद्दूरकोटिगम् ॥५५॥ (६/१।२५।५२)
स्वच्छं कुम्भकमभ्यस्य न भूयः परितप्यते ।

अपाने रेचकाधारं प्राणपूरान्तरस्थितम् ॥५६॥ (६।२५।५३)
स्वसंस्थं पूरकं दृष्ट्वा न भूयो जायते नरः ।
प्राणापानावुभावन्तर्यत्रैतौ विलयं गतौ ॥ ५७ ॥ (६।२५।१४)
तदालम्ब्य पदं शान्तमात्मानं नानुतप्यते ।
प्राणभक्षोन्मुखेऽपाने देशं कालं च निष्कलम् ॥५८॥(६।२५।५५)
विचार्य बहिरन्तर्वा न भूयः परिशोच्यते ।
अपानभक्षणपरे प्राणे हृदि तथा बहिः ॥५९॥ (६।२५।५६)
देशं कालं च सम्प्रेक्ष्य न भूयो जायते मनः ।
यत्र प्राणो ह्यपानेन प्राणेनापान एव च ॥ ६० ॥ (६।२५।५७)
निगीर्णौ बहिरन्तश्च देशकालौ च पश्य तौ ।
क्षणमस्तं गतप्राणमपानोदयवर्जितम् ॥ ६१ ॥ (६।२५।५८)
अयत्नसिद्धबाह्यस्थं कुम्भकं तत्पदं विदुः ।
अयत्नसिद्धो ह्यन्तस्थकुम्भकः परमं पदम् ॥६२॥ (६।२५।५९)
एतत्तदात्मनो रूपं शुद्धैषा परमैव चित् ।
एतच्चत्सदाभासमेतत्प्राप्य न शोच्यते ॥ ६३ ॥ (६।२५।६०)

(ई) प्राणस्पन्दनिरोधयुक्तयः ।

वैराग्यात्कारणाभ्यासाद्युक्तितो व्यसनक्षयात् ।
परमार्थावबोधाच्च रोध्यन्ते प्राणवायवः ॥ ६४ ॥ (५।१३।८५)
शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः ।
अनास्थायां कृतास्थायां पूर्वसंसारवृत्तिषु ॥६५॥ (५।७८।१८)

यथाभिवाञ्छितध्यानाच्चिरमेकतयोदितात् ।
एकतत्त्वघनाभ्यासात्प्राणस्पन्दो निरुद्ध्यते ॥६६॥ (५।७८।१९)
पूरकादिनिजायामादृढाभ्यासादखेदजात् ।
एकान्तध्यानसंयोगात्प्राणस्पन्दो निरुद्ध्यते॥६७॥ (५।७८।२०)
ओङ्कारोच्चारणप्रान्तशब्दतत्त्वानुभवनात् ।
सुषुप्ते संविदो जाते प्राणस्पन्दो निरुद्ध्यते॥६८॥(५।७८।२१)
रेचके नूनमभ्यस्ते प्राणे स्फारे खमागते ।
न स्पृशत्यङ्गरंध्राणि प्राणस्पन्दो निरुद्ध्यते ॥६९॥(५।७८।२२)
पूरके नूनमभ्यस्ते पूराद्रिरिघनस्थिते ।
प्राणे प्रशान्तसञ्चारे प्राणस्पन्दो निरुद्ध्यते॥७०॥(५।७८।२३)
कुम्भके कुम्भवत्कालमनन्तं परितिष्ठति ।
अभ्यासात्स्तंभिते प्राणे प्राणस्पन्दो निरुद्ध्यते॥७१॥(५।७८।२४)
तालुमूलगतां यत्नाज्जिह्वयाक्रम्य घंटिकाम् ।
ऊर्ध्वरन्ध्रगते प्राणे प्राणस्पन्दो निरुद्ध्यते ॥७२॥ (५।७८।२५)
समस्तकलनोन्मुक्ते न किञ्चिन्नाम सूक्ष्मखे ।
ध्यानात्संविदि लीनायां प्राणस्पन्दो निरुद्ध्यते॥७३॥(५।७८।२६)
द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे ।
संविद्दृशि प्रशाम्यन्त्यां प्राणस्पन्दो निरुद्ध्यते॥७४॥(५।७८।२७)
भ्रूमध्ये तारकालोकशान्तावन्तमुपागते ।
चेतने केतने बुद्धे प्राणस्पन्दो निरुद्ध्यते॥ ७५ ॥(५।७८।२९)
अभ्यासादूर्ध्वरन्ध्रेण तालूर्ध्वं द्वादशान्तगे ।
प्राणे गलितसंवृत्ते प्राणस्पन्दो निरुद्ध्यते ॥७६॥ (५।७८।२८)

झटित्येवं यदुद्भूतं ज्ञानं तस्मिन्दृढाश्रिते ।
असंश्लिष्टविकल्पांशे प्राणस्पन्दो निरुद्ध्यते ॥७७॥(५।७८।३१)
तस्मात्संविन्मये शुद्धे हृदये हृतवासनः ।
बलान्नियोजिते चित्ते प्राणस्पन्दो निरुद्ध्यते ॥७८॥(५।७८।३८)
एभिः क्रमैस्तथान्यैश्च नानासङ्कल्पकल्पितैः ।
नानादेशिकवक्त्रस्थैः प्राणस्पन्दो निरुद्ध्यते ॥७९॥ (५।७८।३९)
अभ्यासेन परिस्पन्दे प्राणानां क्षयमागते ।
मनः प्रशममायाति निर्वाणमवशिष्यते ॥ ८० ॥ (५।७८।४६)

[९] मनोविलयः :—

(अ) मनो नाभिः संसारचक्रस्य :—

चित्तं नाभिः किलास्येह मायाचक्रस्य सर्वतः ।
स्थीयते चेत्तदाक्रम्य तन्न किञ्चित्प्रबाधते ॥१॥ (५।४९।४०)
तस्मिन्द्रुतमवष्टब्धे धिया पुरुषयत्नतः ।
गृहीतनाभिवहनान्मायाचक्रं निरुद्ध्यते ॥ २ ॥ (५।५०।७)
इदं संसारचक्रं हि नाभौ सङ्कल्पमात्रके । (६/१।२९।५)
संरोधितायां वहनाद्रघुनन्दन रुद्ध्यते ॥ ३ ॥ (६/१।२९।६)
परं पौरुषमास्थाय बलं प्रज्ञां च युक्तितः । (६/१।२९।७)
नाभिं संसारचक्रस्य चित्तमेव निरोधयेत् ॥ ४ ॥ (६/१।२९।८)
मनोनिष्ठतया विश्वमिदं परिणतिं गतम् । (५।२४।१४)

तस्मिञ्जिते जितं सर्वं सर्वमासादितं भवेत् ॥५॥ (५।२४।१५)

चित्तसत्तैव जगत्सत्ता जगत्सत्तैव चित्तकम् ।
एकाभावाद्द्वयोर्नाशः स च सत्यविचारणात् ॥६॥ (४।१७।१९)

चित्तान्तरेव संसारः कुम्भान्तः कुम्भखं यथा ।
चित्तनाशे न संसारः कुम्भनाशे न कुम्भखम् ॥७॥ (५।५०।१४)

शान्ते वातपरिस्पन्दे यथा गन्धः प्रशाम्यति ।
तथा शान्ते मनःस्पन्दे शाम्यन्ति प्राणवायवः ॥८॥ (६/१।६९।४४)

चित्ते व्यक्ते लयं याति द्वैतमैक्यं च सर्वतः ।
शिष्यते परमं शान्तमच्छमेकमनामयम् ॥ ९ ॥ (६/१।६३।४४)

अस्याश्चित्तं विदुः क्षेत्रं संसृतेः सस्यसन्ततेः ।
क्षेत्रे त्वक्षेत्रतां याते शालेः क इव सम्भवः ॥१०॥ (६/१।६३।४५)

चित्तमेव विचित्रेहं भावाभावविलासिना ।
विवर्ततेऽर्थभावेन जलमूर्मितया यथा ॥ ११ ॥ (६/१।६३।४६)

चित्तोत्सादनरूपेण सर्वत्यागेन भूपते ।
सर्वमासाद्यते सम्यक्साम्राज्येनेव सर्वदा ॥१२॥ (६/१।६३।४७)

संसारस्यास्य दुःखस्य सर्वोपद्रवदायिनः ।
उपाय एक एवास्ति मनसः स्वस्य निग्रहः ॥१३॥ (४।३५।२)

मनोविलयमात्रेण दुःखशान्तिरवाप्यते ।   (३।११२।६)
सर्वं सर्वगतं शान्तं ब्रह्म सम्पद्यते तदा ॥ १४॥ (३।१११।१५)

स्वपौरुषैकसाध्येन स्वेप्सिततत्यागरूपिणा ।
मनः प्रशममात्रेण विना नास्ति शुभा गतिः ॥१५॥ (३।१११।१२)

(आ) चेतसः पीनतावाप्तिः :—

अन्यात्मन्यात्मभावेन देहमात्रास्थयानया ।
पुत्रदारकुटुम्बैश्च चेतो गच्छति पीनताम् ॥१६॥ (५।५०।५७)
अहङ्कारविकारेण ममतामलहेलया ।
इदं ममेति भावेन चेतो गच्छति पीनताम् ॥१७॥ (५।५०।५८)
जरामरणदुःखेन व्यर्थमुन्नतिमीयुषा ।
देषाशीविषकोशेन चेतो गच्छति पीनताम् ॥१८॥ (५।५०।५९)
आधिव्याधिविलासेन समाश्वासेन संसृतेः ।
हेयोपादेयप्रयत्नेन चेतो गच्छति पीनताम् ॥१९॥ (५।५०।६०)
स्नेहेन धनलोभेन लाभेन मणियोषिताम् ।
आपातरमणीयेन चेतो गच्छति पीनताम् ॥२०॥ (५।५०।६१)
दुराशाक्षीरपानेन भोगानिलबलेन च ।
आस्थादानेन चारेण चित्ताहिर्याति पीनताम् ॥२१॥ (५।५०।६२)
आगमापायवपुषा विषवैषम्यशंसिना ।
भोगाभोगेन भीमेन चेतो गच्छति पीनताम् ॥२२॥ (५।५०।६३)

(इ) मनसो ब्रह्मत्वाप्तिः :—

संयोजितं परे चित्तं शुद्धं निर्वासनं भवेत् ।
ततस्तु कल्पनाशून्यमात्मतां याति राघव ॥२३॥ (३।९८।२)
मन एव विचारेण मन्ये विलयमेष्यति ।
मनोविलयमात्रेण ततः श्रेयो भविष्यति ॥ २४ ॥ (३।९७।१०)

मनोनाम्नि परिक्षीणे कर्माशयाहितसंभ्रमे ।
मुक्त इत्युच्यते जन्तुः पुनर्नाम न जायते ॥२५॥ (३।६७।११)
प्रबुद्धानां मनो राम ब्रह्मैवेह हि नेतरत् ।
जलसामान्यबुद्धीनामब्धेर्नान्यस्तरङ्गकः ॥ २६ ॥ (३।१००।२)
यदा संक्षीयते चित्तमभावात्यन्तभावनात् ।
चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ॥२७॥ (५।५६।२)

(ई) मनोनिरोधयुक्तयः :—

अङ्कुशेन विना मत्तं यथा दुष्टं मतङ्गजम् । (५।९२।३५)
न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम् ॥२८॥ (५।९२।३४)
साधयन्ति समुत्सृज्य युक्तिं ये तान्हठान्विदुः ।
भयाद्भयमुपायान्ति क्लेशात्क्लेशं व्रजन्ति ते॥२९॥(५।९२।४०)
विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयम् । (५।९२।३८)
ते निबध्नन्ति नागेन्द्रमुन्मत्तं बिसतन्तुभिः ॥३०॥ (५।९२।३९)
अध्यात्मविद्याधिगमः साधुसङ्गम एव च ।
वासनासम्परित्यागः प्राणस्पन्दनिरोधनम् ।
एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल ॥३१॥(५।९२।३६)
स्वसंविद्यत्नसंरोधाद्यथा चेतः प्रशाम्यति ।
न तथाङ्ग तपस्तीर्थविद्यायज्ञक्रियागणैः ॥ ३२ ॥ (६।१६३।८)
स्वेनैव पौरुषेणाशु स्वसंवेदनरूपिणा ।
यत्नेन चित्तवेतालस्त्यक्त्वेष्टं वस्तु जीयते॥३३॥ (३।१११।२)
विवेकैकानुसंधानाच्चिदंशात्मतया मनः ।

चिदेकतामुपायाति दृढाभ्यासवशादिह ॥३४॥ (३।११२।१५)
त्यजन्नभिमतं वस्तु यस्तिष्ठति निरामयः ।
जितमेव मनस्तेन कुदन्त इव दन्तिना ॥ ३५ ॥ (३।१११।३)
तस्य चञ्चलता यैषा त्वविद्या राम सोच्यते ।
वासनापदनाम्नीं तां विचारेण विनाशय ॥३६॥(३।११२।११)
या योदेति मनोनाम्नी वासना वासितान्तरा ।
तां तां परिहरेत्प्राज्ञस्ततोऽविद्याक्षयो भवेत् ॥३७॥ (३।११२।२२)
विषयान्प्रति भोः पुत्र सर्वानेव हि सर्वथा ।
अनास्था परमा ह्येषा सा युक्तिर्मनसो जये ॥३८॥(५।२४।१७)
ज्ञानादवसानीभावं स्वनाशं प्राप्नुयान्मनः ।
प्राणस्पन्दं च नादत्ते ततः शान्तिर्हि शिष्यते ॥३९॥ (६१।६९।३५)
ज्ञानात्सर्वपदार्थानामसत्त्वमुदेत्यलम् ।
ततोऽङ्ग वासनानाशाद्वियोगः प्राणचेतसोः ॥४०॥ (६१।६९।३६)
राजन्स्वात्मविचारोऽयं कोऽहं स्यामिति रूपधृक् ।
चित्तदुर्द्रुमबीजस्य दहने दहनः स्मृतः ॥ ४१ ॥ (६१।९४।२९)
यस्य मौर्ख्यं क्षयं यातं सर्वं ब्रह्मेति भावनात् ।
नोदेति वासना तस्य प्राज्ञस्येवाम्बुधिर्मरौ ॥४२॥ (६१।८७।२५)

१—ज्ञानयुक्तिः :—

अपि पुष्पावदलनादपि लोचनमीलनात् ।
सुकरोऽहंकृतेस्त्यागो न क्लेशोऽत्र मनागपि ॥४३॥ (६१। १११।३१)
यथैतदेषं तनय तथा शृणु वदामि ते ।

अज्ञानमात्रसंसिद्धं वस्तु ज्ञानेन नश्यति ॥४४॥(१।१११।३२)
यथा रज्ज्वां भुजङ्गत्वं मरावम्बुमतिर्यथा ।
मिथ्यावभासः स्फुरति तथा मिथ्याप्यहंकृतिः॥४५॥(६।१११।३४)
मननं कृत्रिमं रूपं ममैतन्न यतोऽस्म्यहम् ।
इति तथ्यागतः शान्तं चेतो ब्रह्म सनातनम्॥४६॥(४।११।२७)

२—सङ्कल्पोच्छेदः :—

सङ्कल्पनं मनोबन्धस्तदभावो विमुक्तता । (६।१।२७)
अचित्तत्वमसङ्कल्पान्मोक्षस्तेनाभिजायते ॥४७॥ (५।१३।८०)
सङ्कल्पमात्रमेवेदं जगन्मिथ्यात्वमुत्थितम् ।
असङ्कल्पनमात्रेण ब्रह्मन्क्वापि विलीयते ॥ ४८ ॥ (६।३३।४२)
उपशान्ते हि सङ्कल्पे उपशान्तमिदं भवेत् ।
संसारदुःखमखिलं मूलादपि महामते ॥ ४९ ॥ (४।५४।१९)
सङ्कल्पेनैव सङ्कल्पं मनसा स्वमनो मुने ।
छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम् ॥५०॥(४।५४।१८)
भावनाभावमात्रेण सङ्कल्पः क्षीयते स्वयम् ।
सङ्कल्पनाशयत्नेन न भयान्यनुगच्छति ॥५१॥ (४।५४।१३)
सङ्कल्पो येन हन्तव्यस्तेन भावविपर्ययात् ।
अप्यर्धेन निमेषेण लीलयैव निहन्यते ॥ ५२ ॥ (४।५४।१६)
अहंभावनमेवाहुः कल्पनं कल्पनाविदः ।
नभोऽर्थभावनं तस्य सङ्कल्पत्याग उच्यते ॥ ५३ ॥ (६।१।३)

३—भोगेष्वरतिः :—

भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यते । (४।३५।३)
यतो यतो विरज्यते ततस्ततो विमुच्यते ॥५४॥ (३।६१।३५)
किमन्यैः शास्त्रसन्दर्भैः क्रियतामिदमेव तु ।
यद्यत्स्वादिह तत्सर्वं दृश्यतां विषवह्निवत् ॥ ५५ ॥ (४।३५।४)
जाता चेदरतिर्जन्तोः भोगान्प्रति मनागपि ।
तदसौ तावतैवोच्चैः पदं प्राप्त इति श्रुतिः ॥५६॥ (३।६१।३४)
न भोगेष्वरतिर्यावज्जायते भवनाशिनी । (५।२४।३७)
न परा निर्वृतिस्तावत्प्राप्यते जयदायिनी ॥५७॥ (५।२४।३८)
तावद्भ्रमन्ति दुःखेषु संसारावटवासिनः ।
विरतिं विषयेष्वेते यावन्नायान्ति देहिनः ॥५८॥ (५।२४।२२)
आत्मावलोकनेनैषा विषयारतिरुत्तमा ।
हृदये स्थितिमायाति श्रीरिवाम्भोजकोटरे ॥५९॥ (५।२४।५३)
परदृष्टौ वितृष्णात्वं तृष्णाभावे च दृक्परा ।
एते मिथः स्थिते दृष्टी तेजोदीपदशे यथा ॥ ६० ॥(५।२४।५३)
विचारो भोगगर्हातो विचाराद्भोगगर्हणम् । (५।२४।६२)
परं पौरुषमाश्रित्य भोगेष्वरतिमाहरेत् ॥६१॥ (५।२४।३७)
क्रमादभ्यस्यमानैषा विषयारतिरात्मज ।
सर्वतः स्फुटतामेति सेकसिक्ता लता यथा ॥६२॥ (५।२४।२०)
पुरुषार्थादृते पुत्र नेह सम्प्राप्यते शुभम् । (५।२४।२५)
नासाद्यते ह्यनभ्यस्ता काङ्क्षतापि शठात्मना ॥६३॥(५।२४।२१)

४—इन्द्रियनिग्रहविधिः :—

मनो यदनुसंधत्ते तत्सर्वेन्द्रियवृत्तयः ।
क्षणात्संपादयन्त्येता राजाज्ञामिव मंत्रिणः ॥६४॥ (३।११४।४७)
तस्मान्मनोनुसंधानं भावेषु न करोति यः ।
अन्तश्चेतनयत्नेन स शान्तिमधिगच्छति ॥६५॥ (३।११४।४८)
परं पौरुषमाश्रित्य यत्नात्परमया धिया ।
भोगाशाभावनां चित्तात्समूलामलमुद्धरेत् ॥६६॥ (३।११४।५१)
चित्तमिन्द्रियसेनाया नायकं तज्जयाज्जयः ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥ ६७ ॥ (६।१६३।६)
विवेकवानुदारात्मा विजितेन्द्रिय उच्यते ।
वासनावीचिवेगेन भवाब्धौ न स मुह्यते ॥६८॥(६।१६३।१९)

५—वासनात्यागः :—

वासनैव महाराज स्वरूपं विद्धि चेतसः ।
चित्तशब्दस्तु पर्यायो वासनाया उदाहृतः ॥६९॥ (६।९४।५)
यथा स्वप्नपरिज्ञानात्स्वप्नदेहो न वास्तवः ।
अनुभूतोऽप्ययं तद्वद्वासनातानवादसत् ॥ ७० ॥ (३।२२।१)
प्रक्षीणवासना येह जीवतां जीवनस्थितिः ।
अमुक्तैरपरिज्ञाता सा जीवन्मुक्ततोच्यते ॥ ७१ ॥(३।२२।८)
सर्वेषणानां संशान्तौ शुद्धचित्तस्य या स्थितिः ।

तत्सत्यमुच्यते सैषा विमला चिदुदाहृता ॥ ७२ ॥ (४।१७।३)

इदमस्तु ममेत्यन्तयैषा राघव भावना ।
तां तृष्णां शृंखलां विद्धि कलानां च महामते ॥७३॥ (५।१७।७)

तामेतां सर्वभावेषु सत्स्वसत्सु च सर्वदा ।
संत्यज्य परमोदारः परमेति महामनाः ॥ ७४ ॥ (५।१७।८)

बन्धाशामथ मोक्षाशां सुखदुःखदशामपि ।
त्यक्त्वा सदसदाशां च तिष्ठाक्षुब्धमहाब्धिवत् ॥७५॥(५।१७।९)

(अ) तृष्णानिन्दा :—

जरामरणदुःखानामेका रत्नसमुद्गिका ।
आधिव्याधिविलासानां नित्यं मत्ता विलासिनी॥७६॥(१।१७।३९)

हार्दान्धकारशर्वर्या तृष्णायेह दुरन्तया ।
स्फुरन्ति चेतनाकाशे दोषकौशिकपंक्तयः ॥७७॥ (१।१७।१)

दृष्टदैन्यो हतस्वान्तो हतौजा याति नीचताम् ।
मुह्यति रौति पतति तृष्णयाभिहतो जनः ॥७८॥ (५।१५।१०)

जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
क्षीयते जीर्यते सर्वं तृष्णैकान जीर्यते ॥ ७९ ॥ (६।९३।८६)

(आ) संसारेऽस्मिन्न किमपि हेयोपादेयम् :—

मनःप्रकल्पिते भग्ने हृदि विस्तीर्णपत्तने ।
वृद्धि चोपगते ब्रूहि किं वृद्धं कस्य किं क्षतम् ॥८०॥(४।४५।३५)

सर्वत्रासत्यभूतेऽस्मिन्प्रपञ्चैकान्तकारिणि ।
संसारे किमुपादेयं प्राज्ञो यदभिवाञ्छतु ॥ ८१ ॥ (४।४५।४२)

सर्वत्र सत्यभूतेऽस्मिन्ब्रह्मतत्त्वमयेऽपि च ।
किं स्यात्त्रिभुवने हेयं प्राज्ञाः परिहरन्तु यत्॥८२॥ (४।४८।४३)

आयुर्वायुविघट्टिताभ्रपटलीलम्बाम्बुवद्भङ्गुरम् ।
भोगा मेघवितानमध्यविलसत्सौदामनीचञ्चला ।
लोला यौवनलालना जलरयः कायः क्षणापायवान्
पुत्र त्रासमुपेत्य संसृतिवशान्निर्वाणमन्विष्यताम्।८३।(६।१३६।३२)

(इ) वासनात्यागो द्विविधः :—

सर्वत्र वासनात्यागो राम राजीवलोचन ।
द्विविधः कथ्यते तज्ज्ञैर्ज्ञेयो ध्येयश्च मानद ॥८४॥ (५।१६।६)

द्वावेव राघव त्यागौ समौ मुक्तपदे स्थितौ ।
द्वावेतौ ब्रह्मतां यातौ द्वावेव विगतज्वरौ ॥८५॥ (५।१६।१५)

(१) ध्येयत्यागः :—

अहमेषां पदार्थानामेते च मम जीवितम् ।
नाहमेभिर्विना कश्चिन्न मयैते विना किल ॥ ८६ ॥(५।१६।७)

इत्यन्तर्निश्चयं कृत्वा विचार्य मनसा सह ।
नाहं पदार्थस्य न मे पदार्थ इति भाविते ॥८७॥ (५।१६।८)

अन्तः शीतलया बुद्ध्या कुर्वत्या लीलया क्रियाम् ।
यो नूनं वासनात्यागो ध्येयो राम स कीर्तितः॥८८॥(५।१६।९)

अहंकारमयीं त्यक्त्वा वासनां लीलयैव यः ।
तिष्ठति ध्येयसंत्यागी जीवन्मुक्तः स उच्यते ॥८९॥(५।१६।११)

(२) ज्ञेयत्यागः :—

सर्वं समतया बुद्ध्वा यं कृत्वा वासनाक्षयम् ।
जहाति निर्ममो देहं ज्ञेयोऽसौ वासनाक्षयः ॥ ९० ॥(५।१६।१०)
निर्मूलकलनां त्यक्त्वा वासनां यः शमं गतः ।
ज्ञेयत्यागमयं विद्धि मुक्तं तं रघुनन्दन ॥९१॥ (५।१६।१२)

(ई) वासनात्यागयुक्तिः :—

बद्धो हि वासनाबद्धो मोक्षः स्याद्वासनाक्षयः ।
वासनास्त्वं परित्यज्य मोक्षार्थित्वमपि त्यज॥९२॥ (४।५७।१९)
तामसीर्वासनाः पूर्वं त्यक्त्वा विषयवासिताः ।
मैत्र्यादिभावनानाम्नीं गृहाणामलवासनाम्॥९३॥ (४।५७।२०)
तामप्यन्तः परित्यज्य ताभिर्व्यवहरन्नपि ।
अन्तःशान्तसमस्तेहो भव चिन्मात्रवासनः ॥९४॥ (४।५७।२१)
तामप्यथ परित्यज्य मनोबुद्धिसमन्विताम् ।
शेषे स्थिरसमाधानो येन त्यजसि तत्त्यज ॥९५॥ (४।५७।२२)
चिन्मयः कलनाकालप्रकाशतिमिरादिकम् ।
वासनां वासितारं च प्राणस्पन्दनपूर्वकम् ॥९६॥ (४।५७।२३)
समूलमपि संत्यक्त्वा व्योमसौम्यप्रशान्तधीः ।
यस्त्वं भवसि सद्बुद्धे स भावनस्तु सत्कृतः॥९७॥(५।५७।२४)
हृदयात्संपरित्यज्य सर्वमेव महामतिः ।
यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्वरः ॥९८॥ (४।५७।२५)

समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः ॥९९॥ (४।५७।२६)
नैष्कर्म्येण न तस्यार्थो न तस्यार्थोऽस्ति कर्मभिः ।
न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥१००॥(४।५७।२७)
यस्य मौर्ख्यं क्षयं यातं सर्वं ब्रह्मेति भावनात् ।
नोदेति वासना तस्य प्राज्ञस्येवाम्बुधिर्मरौ ॥१०१॥(६१।८७।२५)
परमार्थावबोधेन समूलं राम वासना ।
दीपेनेवान्धकारश्रीर्गलत्यालोक एति च ॥१०२॥(५।७४।२१)

६—अहंकारोन्मूलनम् :—

अहंकाराम्बुदे क्षीणे चिद्व्योम्नि विमले तते ।
नूनं सम्प्रौढतामेति स्वालोको भास्करः परः॥१०३॥ (५।१३।१७)
चिज्ज्योत्स्ना यावदेवान्तरहंकारघनावृता ।
विकासयति नो तावत्परमार्थकुमुद्वतीम् ॥१०४॥ (४।३३।२८)
अहंबीजश्चित्तद्रुमः सशाखाफलपल्लवः ।
उन्मूलय समूलं तमाकाशहृदयो भव ॥१०५॥ (६१।९४।१३)
अहंत्वोल्लेखतः सत्ता भ्रमभावविकारिणी ।
तदभावात्स्वभावैकनिष्ठता शमशालिनी ॥१०६॥ (६१।२६।२९)
भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अहंभावोऽभिमन्तात्मा मूलमाद्यमुदाहृतम् ॥१०७॥ (६१।१५।२)
ईदृशोऽयं जगद्वृक्षो जायतेऽहंत्वबीजतः ।
बीजे ज्ञानाग्निनिर्दग्धे नैव किञ्चन जायते ॥१०८॥ (६१।८।२)

(अ) अहंकारोन्मूलनविधिः :—

प्रेक्षमाणं च तन्नास्ति किलाहंत्वं कदाचन ।
एतावदेव तज्ज्ञानमनेनैव प्रदह्यते ॥ १०९ ॥ (६।८।३)
चिन्मात्रदर्पणाकारे निर्मले स्वात्मनि स्थिते ।
इति भावानुसंधानादहंकारो न जायते ॥११०॥(४।३३।४३)
मिथ्येयमिन्द्रजालश्रीः किं मे स्नेहविरागयोः ।
इत्यन्तरानुसंधानादहंकारो न जायते ॥१११॥ (४।३३।४४)
अहं हि जगदित्यन्तर्हेयादेयदृशोः क्षये ।
समतायां प्रसन्नायां नाहंभावः प्रवर्धते ॥११२॥(४।३३।४६)

(आ) परमानुभवासिद्धिः :—

शान्तो दान्तश्चोपरतो निषिद्धाकाम्यकर्मणः ।
विषयेन्द्रियसंश्लेषसुखाच्च श्रद्धयान्वितः ॥११३॥ (६।१२८।२)
मृद्वासने समासीनो जितचित्तेन्द्रियक्रियः ।
ओमित्युच्चारयेत्तावन्मनो यावत्प्रसीदति ॥११४॥ (६।१२८।२)
प्राणायामं ततः कुर्यादन्तःकरणशुद्धये ।
इन्द्रियाण्याहरेत्पश्चाद्विषयेभ्यः शनैः शनैः ॥११५॥(६।१२८।४)
देहेन्द्रियमनोबुद्धिक्षेत्रज्ञानां च सम्भवः ।
यस्माद्भवति तज्ज्ञात्वा तेषु पश्चाद्विलापयेत्॥११६॥ (६।१२८।४)
विराजि प्रथमं स्थित्वा तत्रात्मनि ततः परम् ।
अव्याकृते स्थितः पश्चात्स्थितः परमकारणे॥११७॥(६।११८।५)

मांसादिपार्थिवं भागं पृथिव्यां प्रविलापयेत् ।
आप्यं रक्तादिकं चाप्सु तैजसं तेजसि क्षिपेत्॥११८॥(६।१२८।६)
वायव्यं च महावायौ नाभसं नभसि क्षिपेत् ।
पृथिव्यादिषु विन्यस्य चेन्द्रियाण्यात्मयोनिषु॥११९॥(६।१२८।७)
श्रोत्रादिलक्षणोपेतां कर्तुर्भोगप्रसिद्धये ।
दिक्षु न्यस्यात्मनः श्रोत्रं त्वचं विद्युति निक्षिपेत्॥१२०॥(६।१२८।८)
चक्षुरादित्यबिम्बे च जिह्वामप्सु विनिक्षिपेत् ।
प्राणं वायौ वाचमग्नौ पाणिमिन्द्रे विनिक्षिपेत्।१२१। (६।११८।९)
विष्णौ तथाऽत्मनः पादौ पायुं मित्रे तथैव च ।
उपस्थं कश्यपे न्यस्य मनश्चन्द्रे निवेशयेत्॥१२२॥(६।१२८।१०)
बुद्धिं ब्रह्मणि संयच्छेदेताः करणदेवताः । (६।१२८।११)
एवं न्यस्यात्मनो देहं विराडस्मीति चिन्तयेत्॥१२३॥(६।१२८।१२)
ब्रह्माण्डान्तः स्थितो योऽसावर्धनारीश्वरः प्रभुः ।
आधारः सर्वभूतानां कारणं तदुदाहृतम्॥१२४॥(६।१२८।१३)
स यज्ञसृष्टिरूपोऽसौ जगद्वृत्तौ व्यवस्थितः । (६।१२८।१४)
क्षितिं चाप्सु समावेश्य सलिलं चानले क्षिपेत्।१२५।(६।१२८।१६)
अग्निं वायौ समावेश्य वायुं च नभसि क्षिपेत् ।
नभश्च महदाकाशे समस्तोत्पत्तिकारणे ॥१२६॥ (६।१२८।१७)
स्थित्वा तस्मिन्क्षणं योगी लिङ्गमात्रशरीरधृक् ।
वासना भूतसूक्ष्माश्च कर्मविद्ये तथैव च ॥११७॥ (६।१२८।१८)
दशेन्द्रियमनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः ।
ततोऽधोंगण्डाद्बहिर्यातस्तत्रात्मास्मीति चिन्तयेत्१२८(६।१२८।१९)

चतुर्मुखोग्रके चायं भूतसूक्ष्मव्यवस्थितः ।
लिङ्गमव्याकृते सूक्ष्मे न्यस्याव्यक्ते च बुद्धिमान् १२९(६।१२८।२०)
नामरूपविनिर्मुक्तं यस्मिन्संतिष्ठते जगत् ।
तमाहुः प्रकृतिं केचिन्मायामेके परे त्वणून् ॥१३०॥(६।१२८।२१)
अविद्यामपरे प्राहुस्तर्कविभ्रान्तचेतसः ।
तत्र सर्वे लयं गत्वा तिष्ठन्त्यव्यक्तरूपिणः ॥१३१॥(६।१२८।२२)
निःसम्बन्धा निरास्वादाः सम्भवन्ति ततः पुनः ।
तत्स्वरूपा हि तिष्ठन्ति यावत्सृष्टिः प्रवर्तते ॥१३२॥ (६।१२८।२३)
अतः स्थानत्रयं त्यक्त्वा तुरीयं पदमव्ययम् । (६।१२८।२४)
ध्यायेत्तत्प्राप्तये लिङ्गं प्रविलाप्य परं विशेत्॥१३३॥(६।१२८।२५)

(इ) अहंभावे गलिते सर्वदोषापगमः :—

यत्किञ्चिदिदमायाति सुखदुःखमलं भवे ।
तदहंकारचक्रस्य प्रविकारो विजृम्भते ॥१३४॥ (४।३३।३९)
गलिते वा गलद्रूपे चित्तेऽहंकारनामनि । (६।११६।१)
बलादपि हि संजाता न लिम्पन्त्याशयं सितम्१३५(६।११६।२)
लोभमोहादयो दोषाः पयांसीव सरोरुहम् । (६।११६।२)
मुदिताद्याः श्रियो वक्त्रं न मुञ्चन्ति कदाचन॥१३६॥(६।११६।३)
वासनाग्रन्थयश्छिन्ना इव त्रुट्यन्त्यलं शनैः ।
कोपस्तानवमायाति मोहो मान्द्यं हि गच्छति॥१३७॥(६।११६।४)
कामः क्लमं गच्छति च लोभः क्वापि पलायते ।
नोल्लसन्तीन्द्रियाण्युच्चैः खेदः स्फुरति नोच्चकैः१३८(६।११६।५)

न दुःखान्युपबृंहन्ति न वल्गन्ति सुखानि च ।
सर्वत्र समतोदेति हृदि शैत्यप्रदायिनी ॥१३९॥ (६।११६।६)

७—असङ्गाभ्यासः :—

सम्वित्तेर्जन्मबीजस्य योऽन्तस्थो वासनारसः ।
स करोत्यङ्कुरोल्लासं तमसङ्गाग्निना दह ॥१४०॥(६।२८।२३)
अन्तःसङ्गवाञ्जन्तुर्मग्नः संसारसागरे ।
अन्तःसंसक्तिमुक्तस्तु तीर्णः संसारसागरात्॥१४१॥(५।६७।३०)
असक्तं निर्मलं चित्तं मुक्तं संसार्यपि स्फुटम् ।
सक्तं तु दीर्घतपसा युक्तमप्यतिबन्धवत् ॥१४२॥ (५।६७।३३)
संसक्तिवशतः सर्वे वितता दुःखराशयः । (५।६८।१०)
संसक्तचित्तमायान्ति सर्वा दुःखपरम्पराः ॥१४३॥(५।६८।४७)
असत्प्रायो हि सम्बन्धो यथा सलिलकाष्ठयोः ।
तथैव मिथ्यासम्बन्धः शरीरपरमात्मनोः ॥१४४॥ (५।६७।२४)
देहभावनयैवात्मा देहदुःखवशे स्थितः ।
तत्त्यागेन ततो मुक्तो भवतीति विदुर्बुधाः॥१४५॥ (५।६७।२६)
चिदात्मा निर्मलो नित्यः स्वावभासो निरामयः ।
देहस्त्वनित्यो मलवांस्तेन सम्बध्यते कथम्॥१४६॥(५।७१।२४)
केवलं चिति विश्रम्य किञ्चिच्चेत्यावलम्बिनि ।
सर्वत्र नीरसमिव तिष्ठत्वात्मरसं मनः ॥१४७॥ (५।६९।८)
तत्रस्थो विगतासङ्गो जीवोऽजीवत्वमागतः ।
व्यवहारमिमं सर्वं मा करोतु करोतु वा ॥१४८॥(५।५९।९)

नाभिनन्दति नैष्कर्म्यं न कर्मस्वनुषज्जते ।
सुसमो यः फलत्यागी सोऽसंसक्त इति स्मृतः ॥१४९॥(५।६८।६)
सर्वमात्मेदमखिलं किं वाञ्छामि त्यजामि किम् ।
इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थितिम्॥१५०॥(५।६८।४)
सर्वकर्मफलादीनां मनसैव न कर्मणा ।
निपुणं यः परित्यागी सोऽसंसक्त इति स्मृतः॥१५१॥(५।६८।८)
भावाभावे पदार्थानां हर्षामर्षविकारता ।
मलिना वासना यैषा सा सङ्ग इति कथ्यते॥१५२॥(५।९३।८४)
मुक्ता हर्षविषादाभ्यां शुद्धा भवति वासना । (५।९३।८५)
तामसङ्गाभिधां विद्धि यावद्देहं च भाविनी॥१५३॥(५।९३।८६)
कुर्वतोऽकुर्वतश्चैव मनसा यदमज्जगम् ।
शुभाशुभेषु कार्येषु तदसङ्गं विदुर्बुधाः ॥ १५४ ॥(६।२८।२४)
अथवा वासनोत्साद एवासङ्ग इति स्मृतः ।
यया कयाचिद्युक्त्यान्तः सम्पादय तमेव हि॥१५५॥(६।२८।२५)

८—समभावप्राप्तिः :—

मा खेदं भज हेयेषु नोपादेयपरो भव ।
हेयोपादेयदृशौ त्यक्त्वा शेषस्थः स्वच्छतां व्रज॥१५६॥(५।१३।२१)
हेयोपादेयकलने क्षीणे यावन्न चेतसः ।
न तावत्समता भाति साभ्रे व्योम्नीव चन्द्रिका।१५७।(५।१३।२३)
अवस्त्विदमिदं वस्तु यस्येति लुलितं मनः ।
तस्मिन्नोदेति समता शाखोट इव मञ्जरी ॥१५८॥(५।१३।२४)

युक्तायुक्तैषणा यत्र लाभालाभविलासिनी ।
समता स्वच्छता तत्र कुतो वैराग्यभासिनी॥१५९॥(५।१३।२५)

(अ) समतानन्दः :—

न तदासाद्यते राज्यान्न कान्ताजनसङ्गमात् ।
अनपायि सुखं सारं समत्वाद्यदवाप्यते ॥१६०॥(६।१९८।१०)
द्वन्द्वोपशमसीमान्तं संरम्भज्वरनाशनम् ।
सर्वदुःखातपाम्भोदं समत्वं विद्धि राघव॥१६१॥(६।१९८।११)
सुखदुःखेषु भीमेषु सन्ततेषु महत्स्वपि ।
मनागपि न वैरस्यं प्रयान्ति समदृष्टयः ॥१६२॥(६।१९८।२७)

(आ) सर्वबन्धुत्वम् :—

अयं बन्धुरयं नेति गणना लघुचेतसाम् ।
उदारचरितानां तु विगतावरणैव धीः ॥१६३॥ (५।१८।६१)
न तदस्ति यत्राहं न तदस्ति न यन्मम ।
इति निर्णीय धीराणां विगतावरणैव धीः ॥१६४॥(५।१८।६२)
सर्वा एव हि ते भूतजातयो राम बन्धवः ।
अत्यन्तासंयुता एतास्तव राम न काश्चन ॥१६५॥(५।१८।६४)
एकत्वे विद्यमानस्य सर्वगस्य किलात्मनः ।
अयं बन्धुः परश्चायमित्यसौ कलना कुतः ॥१६६॥ (५।२०।४)

९—कर्माभावः :—

कृष्णतासंक्षये यद्वत्क्षीयते कज्जलं स्वयम् ।
स्पन्दात्मकर्मविगमे तद्वत्प्रक्षीयते मनः ॥१६७॥ (३।९५।२५)
वह्न्यौष्ण्ययोरिव सदा श्लिष्टयोश्चित्तकर्मणोः ।
द्वयोरेकतराभावे द्वयमेव विलीयते ॥ १६८ ॥ (३।९५।३७)
आत्मज्ञानात्समुत्पन्नः सङ्कल्पः कर्मकारणम् । (६।१२४।५)
सङ्कल्पित्वं हि बन्धस्य कारणं तत्परित्यज॥१६९॥(६।१२४।६)
अवेदनमसम्वेद्यं यद्वासनमासितम् ।
शान्तं सममनुल्लेखं स कर्मत्याग उच्यते ॥१७०॥ (६।३।२४)

१०—सर्वत्यागः :—

यावत्सर्वं न संत्यक्तं तावदात्मा न लभ्यते ।
सर्वावस्थापरित्यागे शेष आत्मेति कथ्यते ॥१७१॥(५।५८।४४)
यत्र सर्वात्मनैवात्मा लाभाय यतति स्वयम् ।
त्यक्तान्यकार्यं प्राप्नोति तन्नाम नृप नेतरत्॥१७२॥(५।५८।४६)
न किञ्चिद्येन सम्प्राप्तं तेनेदं परमामृतम् ।
सम्प्राप्यान्तः प्रपूर्णेन सर्वं प्राप्तमखण्डितम्॥१७३॥(५।३४।७६)
विद्धि चिन्तामणिं साधो सर्वत्यागमकृत्रिमम् ।
तमन्तं सर्वदुःखानां त्वं साधयसि शुद्धधीः ॥१७४॥ (६।९०।५)
सर्वत्यागेन शुद्धेन सर्वमासाद्यतेऽनघ ।
सर्वत्यागो हि साम्राज्यं किं चिन्तामणिना भवेत्॥१७५॥(६।९०।५)

(अ) सर्वत्यागस्वरूपम् :—

साधो न देहत्यागेन न राज्यत्यजनेन च ।
न चोटजादिशोषेण सर्वत्यागो भवेन्नृप ॥१७६॥ (६।९३।२६)
सर्वस्यैव मनो बीजं तरुबीजं तरोरिव । (६।९३।३४)
सर्वस्य बीजे संत्यक्ते सर्वं त्यक्तं भवत्यलम्॥१७७(६।९३।३५)
चित्तं सर्वमिति प्राहुस्त्यक्त्वा पुत्र राजसे ।
चित्तत्यागं विदुः सर्वत्यागं सर्वविदो जनाः॥१७८॥(६।१११।२१)
यत्सर्वं सर्वतो यच्च तस्मिन्सर्वैककारणे ।
सर्वस्मिन्संपरित्यक्ते सर्वत्यागः कृतो भवेत्॥१७९॥(६।९३।३०)
सूत्रं मुक्ताफलेनेव जगज्जालं त्रिकालकम् ।
सर्वमन्तः कृतं तेन येन सर्वं समुज्झितम् ॥१८०॥(६।९३।४९)

(आ) महात्यागी :—

धर्माधर्मौ सुखं दुःखं तथा मरणजन्मनी ।
धिया येनेति सन्त्यक्तं महात्यागी स उच्यते॥१८१॥(६।११५।३३)
सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः ।
धिया येन परित्यक्ता महात्यागी स उच्यते॥१८२॥(६।११५।३४)
न मे देहो न जन्मापि युक्तायुक्ते न कर्मणी ।
इति निश्चयवानन्तर्महात्यागी स उच्यते ॥१८३॥(६।११५।३६)
देहस्य मनसो दुःखैरिन्द्रियाणां मनःस्थितेः ।
नूनं येनोज्झिता सत्ता महात्यागी स उच्यते॥१८४॥(६।११५।३५)

येन धर्ममधर्मं च मनोमननमीहितम् ।
सर्वमन्तः परित्यक्तं महात्यागी स उच्यते ॥१८५॥ (६।११५।३७)
यावती दृश्यकलना सकलेयं विलोक्यते ।
सा येन सुष्टु संत्यक्ता महात्यागी स उच्यते। १८६।(६।११५।३८)

(इ) त्यागफलम् :—

न गृह्णाति हि यत्किञ्चित्सर्वं तस्मै प्रदीयते । (६।९३।६२)
सर्वं त्यजति यस्तस्य सर्वमेवोपतिष्ठते ॥१८७॥ (६।९३।५९)

११—समाधानम् (समाधिः) :—

यदि वापि समाधाने निर्विकल्पे स्थितिं व्रजेत् ।
तदक्षयसुषुप्ताभं तन्मन्येतामलं पदम् ॥१८८॥ (३।१।३६)

(अ) समाधिस्वरूपम् :—

बद्धपद्मासनस्यापि कृतब्रह्माञ्जलेरपि ।
अविश्रान्तस्वभावस्य कः समाधिः कथं च वा॥१८९॥(५।६२।७)
तत्त्वावबोधो भगवन्सर्वाशातृणपावकः ।
प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥१९०॥(५।६२।८)
समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनो ।
साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ॥१९१॥ (५।६२।९)
अक्षुब्धा निरहङ्कारा द्वन्द्वेष्वननुपातिनी ।
प्रोक्ता समाधिशब्देन मेरोः स्थिरतराकृतिः। १९२॥ (५।६२।१०)

निश्चिन्ताधिगताभीष्टा हेयोपादेयवर्जिता ।
प्रोक्ता समाधिशब्देन परिपूर्णा मनोगतिः ॥१६३॥(५।६२।११)
यतःप्रभृति बोधेन युक्तमात्यन्तिकं मनः ।
तदारभ्य समाधानमव्युच्छिन्नं महात्मनः ॥१६४॥(५।६२।१२)
परं विषयवैतृष्ण्यं समाधानमुदाहृतम् । (६/२।३५।४६)
दृढं विषयवैरस्यमेव ध्यानमुदाहृतम् ॥१६५॥ (६/२।४६।१६)
सर्वार्थशातलत्वेन बलाद्ध्याने यदाऽऽगतम् ।
ज्ञानाद्विषयवैरस्यं स समाधिर्हि नेतरः ॥ १६६ ॥ (६/२।४६।१५)
सम्यग्ज्ञानं समुच्छूनं सदैवोज्झितवासनम् ।
ध्यानं भवति निर्वाणमानन्दपदमागतम् ॥१६७॥ (६/२।४६।१८)

[१०] चित्तनाशानन्दः :—

संशान्ते चित्तवेताले यामानन्दकलां तनुः ।
याति तामपि राज्येन जागतेन न गच्छति ॥ १ ॥(४।१५।२०)
सर्वाशाज्वरसंमोहमिहिकाशरदागमम् ।
अचित्तत्वं विना नान्यच्छ्रेयः पश्यामि जन्तुषु ॥२॥ (४।१५।२४)
त एव सुखसंभोगसीमान्तं समुपागताः ।
महाधिया शान्तधियो ये याता विमनस्कताम्॥३॥ (४।१५।२५)
चित्तताम्रे शोधिते हि परमार्थसुवर्णताम् ।
गतेऽकृत्रिम आनन्दः किं देहोपलखण्डकैः ॥ ४ ॥ (३।६१।४६)

५—सप्त ज्ञानभूमयः

इमां सप्तपदां ज्ञानभूमिमाकर्णयानघ ।
नानया ज्ञातया भूयो मोहपङ्के निमज्जसि ॥ १ ॥ (३।११८।१)
वदन्ति बहुभेदेन वादिनो योगभूमिकाः ।
मम त्वभिमता नूनमिमा एव शुभप्रदाः ॥ २ ॥ (३।११८।२)

[१] प्रथमं मतम्ः—

अवबोधं विदुर्ज्ञानं तदिदं सप्तभूमिकम् ।
मुक्तिस्तु ज्ञेयमित्युक्तं भूमिकासप्तकात्परम् ॥१॥ (३।११८।३)
सत्यावबोधो मोक्षश्चैवेति पर्यायनामनी ।
सत्यावबोधो जीवोऽयं नेह भूयः प्ररोहति ॥ २ ॥ (३।११८।४)
ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ।
विचारणा द्वितीया तु तृतीया तनुमानसा ॥३॥ (३।११८।५)
सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ॥४॥ (३।११८।६)
आसामन्ते स्थिता मुक्तिस्तस्यां भूयो न शोच्यते ।
एतासां भूमिकानां त्वमिदं निर्वचनं शृणु ॥५॥ (३।११८।७)
स्थितः किं मूढ एवास्मि प्रेक्ष्येऽहं शास्त्रसज्जनैः ।
वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥६॥ (३।११८।८)
शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ।
सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥ ७ ॥ (३।११८।९)

विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वसक्तता ।
यात्र सा तनुताभावात्प्रोच्यते तनुमानसा ॥८॥ (३।११८।१०)
भूमिकात्रितयाभ्यासाच्चित्तेऽर्थे विरतेर्वशात् ।
सत्यात्मनि स्थितिः शुद्धे सत्त्वापत्तिरुदाहृता ॥९॥(३।११८।११)
दशाचतुष्टयाभ्यासादसंसङ्गफलेन च ।
रूढसत्त्वचमत्कारात्प्रोक्ता संसक्तिनामिका॥१०॥(३।११८।१२)
भूमिकापञ्चकाभ्यासात्स्वात्मारामतया दृढम् ।
आभ्यन्तराणां बाह्यानां पदार्थानामभावनात्॥११॥ (३।११८।१३)
परप्रयुक्तेन चिरं प्रयत्नेनार्थभावनात् ।
पदार्थभावनानाम्नी षष्ठी संजायते गतिः ॥१२॥(३।११८।१४)
भूमिषट्कचिराभ्यासाद्भेदस्यानुपलम्भतः ।
यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः॥१३॥(३।११८।१५)
एषा हि जीवन्मुक्तेषु तुर्यावस्थेह विद्यते ।
विदेहमुक्तिविषयस्तुर्यातीतमतः परम् ॥ १४ ॥ (३।११८।१६)

[२] द्वितीयं मतम् :—

शास्त्रसज्जनसम्पर्कैः प्रज्ञामादौ विवर्धयेत् ।
प्रथमा भूमिकैषोक्ता योगस्यैव च योगिनः ॥१॥ (६।१२०।१)
विचारणा द्वितीया स्यात्तृतीयाऽसङ्गभावना ।
विलापनी चतुर्थी स्याद्वासनाविलयात्मिका ॥२॥ (६।१२०।२)
शुद्धसंविन्मयानन्दरूपा भवति पञ्चमी ।
अर्धसुप्तप्रबुद्धाभो जीवन्मुक्तोऽत्र तिष्ठति ॥३॥ (६।१२०।३)

स्वसंवेदनरूपा च षष्ठी भवति भूमिका ।
आनन्दैकघनाकारा सुषुप्तसदृशस्थितिः ॥४॥ (६।१२०।४)
तुर्यावस्थोपशान्ताथ मुक्तिरेवेह केवलम् ।
समता स्वच्छता सौम्या सप्तमी भूमिका भवेत् ॥५॥(६।१२०।५)
तुर्यातीता तु यावस्था परा निर्वाणरूपिणी ।
सप्तमी सा परिप्रौढा विषयः स्यान्न जीवताम् ॥६॥(६।१२०।६)
पूर्वावस्थात्रयं त्वत्र जाग्रदित्येव संस्थितम् ।
चतुर्थी स्वप्न इत्युक्ता स्वप्नाभं यत्र वै जगत् ॥७॥ (६।१२०।७)
आनन्दैकघनीभावात्सुषुप्ताख्या तु पञ्चमी ।
असंवेदनरूपाथ षष्ठी तुर्यपदाभिधा ॥ ८ ॥ (६।१२०।८)
तुर्यातीतपदावस्था सप्तमी भूमिकोत्तमा ।
मनोवचोभिरग्राह्या स्वप्रकाशपदात्मिका ॥९॥ (६।१२०।९)

[३] तृतीयं मतम् :—

(१) प्रथमा भूमिका :—

अनेकजन्मनामन्ते विवेकी जायते पुमान् । (६।१२६।४)
असारा बत संसारव्यवस्थालं ममैतया ॥ १ ॥ (६।१२६।५)
कथं विरागवान्भूत्वा संसाराब्धिं तराम्यहम् ।
एवं विचारणापरो यदा भवति सन्मतिः ॥ २ ॥ (६।१२६।७)
विरागमुपयात्यन्तर्भावनास्वनुवासरम् ।
क्रियासूदाररूपासु क्रमते मोदतेऽन्वहम् ॥ ३ ॥ (६।१२६।८)

ग्राम्यासु जडचेष्टासु सततं विचिकित्सति ।
नोदाहरति मर्माणि पुण्यकर्माणि सेवते ॥ ४ ॥ (६।१२६।६)
अनोनुद्वेगकारीणि मृदुकर्माणि सेवते ।
पापाद्बिभेति सततं न च भोगमपेक्षते ॥ ५ ॥ (६।१२६।१०)
स्नेहप्रणयगर्भाणि पेशलान्युचितानि च ।
देशकालोपपन्नानि वचनान्यभिभाषते ॥ ६ ॥ (६।१२६।११)
मनसा कर्मणा वाचा सज्जनानुपसेवते । (६।१२६।१२)
यतः कुतश्चिदानीय ज्ञानशास्त्राण्यवेक्षते ॥७॥ (६।१२६।१३)

(२) द्वितीया भूमिका :—

श्रुतिस्मृतिसदाचारधारणाध्यानकर्मणाम् ।
मुख्यया व्याख्यया ख्याताञ्श्रयते श्रेष्ठपण्डितान् ८॥(६।१२६।१५)
पदार्थप्रविभागज्ञः कार्याकार्यविनिर्णयम् ।
जानात्यधिगतश्रव्यो गृहं गृहपतिर्यथा ॥६॥ (६।१२६।१६)
मदाभिमानमात्सर्यमोहलोभातिशायिताम् ।
बहिरप्याश्रितामीषत्त्यजत्यहिरिव त्वचम् ॥ १० ॥ (६।१२६।१७)
इत्थंभूतमतिः शास्त्रगुरुसज्जनसेवनात् ।
सरहस्यमशेषेण यथावदधिगच्छति ॥ ११ ॥ (६।१२६।१८)

(३) तृतीया भूमिका :—

यथावच्छास्त्रवाक्यार्थे मतिमाधाय निश्चलम् ।
तापसाश्रमविश्रामैरध्यात्मकथनक्रमैः ॥ १२ ॥ (६।१२६।२०)

संसारनिन्दकैस्तद्वद्वैराग्यकरणक्रमैः ।
शिलाशय्यासमासीनो जरयत्यायुराततम् ॥१३॥ (६।१२६।२१)
वनवासविहारेण चित्तोपशमशोभिना ।
असङ्गसुखसौम्येन कालं नयति नीतिमान् ॥१४॥ (६।१२६।२२)
द्विविधोऽयमसंसङ्गः सामान्यः श्रेष्ठ एव च । (६।१२६।२५)

(अ) सामान्योऽसङ्गः :—

प्राक्कर्मनिर्मितं सर्वमीश्वराधीनमेव च ॥ १५ ॥ (६।१२६।२६)
सुखं वा यदि वा दुःखं कैवात्र मम कर्तृता ।
भोगाभोगा महारोगाः सम्पदः परमापदः ॥१६॥ (६।१२६।२७)
वियोगायैव संयोगा आधयो व्याधयो धियः ।
कालः कवलनोद्युक्तः सर्वभावाननारतम् ॥१७॥ (६।१२६।२८)
अनास्थयेति भावानां यदभावनमान्तरम् ।
वाक्यार्थलग्नमनसः सामान्योऽसावसङ्गमः ॥१८॥ (६।१२६।२९)

(आ) श्रेष्ठोऽसङ्गः :—

अनेकक्रमयोगेन संयोगेन महात्मनाम् ।
वियोगेनासतामन्तः प्रयोगेणात्मसंविदाम् ॥१९॥ (६।१२६।३०)
पौरुषेण प्रयत्नेन संतताभ्यासयोगतः ।
करामलकवद्वस्तुन्यागते स्फुटतां दृढम् ॥२०॥ (६।१२६।३१)
संसाराम्बुनिधेः पारे सारे परमकारणे ।
नाहं कर्तेश्वरः कर्ता कर्म वा प्राक्तनं मम ॥२१॥ (६।१२६।३२)

कृत्वा दूरतरे नूनमिति शब्दार्थभावनम् ।
यन्मौनमासनं शान्तं तच्छ्रेष्ठासङ्ग उच्यते ॥२२॥ (६।१२६।३३)

(४) चतुर्थी भूमिका :—

भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते ।
सम्यग्ज्ञानोदये चित्ते पूर्णचन्द्रोदयोपमे ॥२३॥ (६।१२६।५८)
निर्विभागमनाद्यन्तं योगिनो युक्तचेतसः ।
समं सर्वं प्रपश्यन्ति चतुर्थीं भूमिकामिताः ॥२४॥ (६।१२६।५९)
अद्वैते स्थैर्यमायाते द्वैते प्रशममागते ।
पश्यन्ति स्वप्नवल्लोकांश्चतुर्थीं भूमिकामिताः॥२५॥(६।१२६।६०)

(५) पञ्चमी भूमिका :—

सत्तावशेष एवास्ते पञ्चमीं भूमिकां गतः ।
पञ्चमीं भूमिकामेत्य सुषुप्तपदनामिकाम् ॥२६॥ (६।१२६।६२)
शान्ताशेषविशेषांशस्तिष्ठत्यद्वैतमात्रके ।
गलितद्वैतनिर्भासमुदितोऽन्तः प्रबुद्धवान् ॥२७॥ (६।१२६।६३)
सुषुप्तघन एवास्ते पञ्चमीं भूमिकामितः ।
अन्तर्मुखतया तिष्ठन्बहिर्वृत्तिपरोऽपि सन् ॥२८॥ (६।१२६।६४)
परिशान्ततया नित्यं निद्रालुरिव लक्ष्यते ।
कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः ॥२९॥ (६।१२६।६५)

(६) षष्ठी भूमिका :–

षष्ठीं तुर्याभिधामन्यां क्रमात्क्रमति भूमिकाम् ।
यत्र नासन्न सद्रूपो नाहं नाप्यनहंकृतिः ॥३०॥ (६।१२६।६६)
केवलं क्षीणमननमास्ते द्वैतैक्यनिर्गतः ।
निर्ग्रन्थिः शान्तसन्देहो जीवन्मुक्तो विभावनः॥३१॥ (६।१२६।६७
अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः ।
अन्तःशून्यो बहिःशून्यः शून्यः कुम्भ इवाम्बरे॥३२॥(६।१२६।६८
अन्तःपूर्णो बहिःपूर्णः पूर्णकुम्भ इवार्णवे ।
किञ्चिदेवैष सम्पन्नस्त्वथ वैष न किञ्चन ॥३३॥ (६।१२६।६९)

(७) सप्तमी भूमिका :–

षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ।
विदेहमुक्तता तूक्ता सप्तमी योगभूमिका ॥३४॥ (६।१२६।७०)
अगम्या वचसां शान्ता सा सीमा भवभूमिषु । (६।१२६।७१)
नित्यमव्यपदेश्यापि कथंचिदुपदिश्यते ॥३५॥ (६।१२६।७३)
मुक्तिरेषोच्यते राम ब्रह्मैतत्समुदाहृतम् ।
निर्वाणमेतत्कथितं पूर्णात्पूर्णतराकृति ॥३६॥ (३।९।२५)
विदेहमुक्तो नोदेति नास्तमेति न शाम्यति ।
न सन्नासन्न दूरस्थो नचाहं न च नेतरः ॥३७॥ (३।९।१५)

६—कर्मपाशोच्छेदः

[१] कर्मफलनियमः :—

न स शैलो न तद्व्योम न सोऽब्धिश्च न विष्टपम् ।
अस्ति यत्र फलं नास्ति कृतानामात्मकर्मणाम् ॥१॥ (३।९५।३३)
ऐहिकं प्राक्तनं वापि कर्म यद्रचितं स्फुरत् ।
पौरुषोऽसौ परो यत्नो न कदाचन निष्फलः ॥२॥ (३।९५।३४)

[२] कर्मस्वरूपम् :—

क्रियास्पन्दो जगत्यस्मिन्कर्मेति कथितो बुधैः ।
पूर्वं तस्य मनो देहं कर्मातश्चित्तमेव हि ॥ १ ॥ (३।९५।३२)
मानसोऽयं समुन्मेषः कलाकलनरूपतः ।
एतत्तत्कर्मणां बीजं फलमस्यैव विद्यते ॥२॥ (३।९५।२९)
कर्मबीजं मनःस्पन्दः कथ्यतेऽथानुभूयते ।
क्रियास्तु विविधास्तस्य शाखाश्चित्रफलास्तरोः ॥३॥(३।९६।११)

[३] पुरुषकर्मणोरभेदः :—

कुसुमाशययोर्भेदो न यथा भिन्नयोरिह ।
तथैव कर्ममनसोर्भेदो नास्त्यविभिन्नयोः ॥ १ ॥ (३।९५।३१)
कल्पनात्मिकया कर्मशक्त्या विरहितं मनः ।
न सम्भवति लोकेऽस्मिन्गुणहीनो गुणी यथा ॥२॥ (३।९६।६)

यथा वह्न्यौष्ण्ययोः सत्ता न सम्भवति भिन्नयोः ।
तथैव कर्ममनसोस्तथात्ममनसोरपि ॥ ३ ॥ (३।९६।७)
मनागपि न भेदोऽस्ति संवित्स्पन्दमयात्मनोः ।
कल्पनांशादृते राम स्रष्टौ पुरुषकर्मणोः ॥ ४ ॥ (६।२८।६)
कर्मैव पुरुषो राम पुरुषस्यैव कर्मता ।
एते ह्यभिन्ने विद्धि त्वं यथा तुहिनशीतते ॥ ५ ॥ (६।२८।८)
संवित्स्पन्दरसस्यैव दैवकर्मनरादयः ।
पर्यायशब्दा न पुनः पृथक्कर्मादयः स्थिताः ॥ ६ ॥ (६।२८।१०)
बीजाङ्कुरविकल्पानां क्रियापुरुषकर्मणाम् ।
ऊर्मिवीचितरङ्गाणां नास्ति भेदो न वस्तुनि ॥७॥ (६।२८।२१)

[४] सर्गादौ जवानां प्राक्तनानि कर्माणि न सन्ति :—

सर्गादिषु स्वयं भान्ति ब्रह्माद्या ये स्वयम्भुवः ।
विज्ञप्तिमात्रदेहास्ते न तेषां जन्मकर्मणी ॥ १ ॥ (६।१४२।२४)
सर्गादौ प्राक्तनं कर्म विद्यते नेह कस्यचित् ।
सर्गादौ सर्गरूपेण ब्रह्मैवेत्थं विजृम्भते ॥ २ ॥ (६।१४२।२६)
अकारणमुपायान्ति सर्वे जीवाः परात्पदात् । (६।१२४।४)
पश्चात्तेषां स्वकर्माणि कारणं सुखदुःखयोः ॥३॥ (६।१२४।५)
यथा ब्रह्मादयो भान्ति सर्गादौ ब्रह्मरूपिणः ।
भान्ति जीवास्तथान्येऽपि शतशोऽथ सहस्रशः ॥४॥(६।१४२।२७)
किन्तु ये ब्रह्मणोऽन्यत्वं बुध्यन्ते सात्त्विकोद्भवाः ।

अबोधा येत्वचिदाख्यं बुद्ध्या द्वैतमिदं स्वयम् ॥५॥ (६।१४२।२८)
तेषामुत्तरकालं तत्कर्मभिर्जन्म दृश्यते ।
स्वयमेव तथा भूतैस्तैरवस्तुत्वमाश्रितम् ॥ ६ ॥ (६।१४२।२९)
यैस्तु न ब्रह्मणोऽन्यत्वं बुद्धं बोधमहात्मनि ।
निरवद्यास्त एतेऽत्र ब्रह्मविष्णुहरादयः ॥ ७ ॥ (६।१४२।३०)
न सम्भवति जीवस्य सर्गादौ कर्म कस्यचित् ।
पश्चात्स्वकर्म निर्माय भुङ्क्ते कल्पनया स चित् ॥८॥ (६।१४२।३८)
सर्गे सर्गतया रूढे भवेत्प्राक्कर्मकल्पना ।
पश्चाज्जीवा भ्रमन्तीमे कर्मपाशवशीकृताः ॥ ९ ॥ (६।१४२।४१)
स्वप्नद्रष्टुर्दृश्यनृणामस्ति काल्पनिकं यथा ।
न वास्तवं पूर्वकामं जाग्रत्स्वप्ने तथा नृणाम् ॥१०॥(६।१४३।१०)
यथा प्राक्कर्म पुंस्त्वे च स्वप्ने पुंसां न विद्यते ।
इह जाग्रत्स्वप्ननृणां भातानामपि नो तथा ॥११॥ (६।१४३।११)
जीवः सर्वेषु सर्गेषु स्वप्नार्थान्निखिलान्मिथः ।
प्राक्कर्मसत्वं मिथ्यात्म यथावासनमेषु च ॥१२॥ (६।१४३।१२)
ब्रह्मणो हृदि सर्गोऽयं हृदि ते स्वप्नपूर्यथा ।
कार्यकारणता तत्र तथास्तेऽभिहिता यथा ॥१३॥ (६।१४३।२३)

[५] वासनैव कर्मफलेषु बध्नाति :—

वासनामात्रसारत्वादज्ञस्य सफलाः क्रियाः ।
सर्वा एवाफला ज्ञस्य वासनामात्रसंक्षयात् ॥१॥ (६।८७।१८)

सर्वा हि वासनाभावे प्रयान्त्यफलतां क्रियाः ।
अशुभाः फलवन्त्योऽपि सेकाभावे लता इव ॥२॥ (६।८७।१९)
ऋत्वन्तरे यथा याति विलयं पूर्वमार्तवम् ।
तथैव वासनानाशे नाशमेति क्रियाफलम् ॥ ३ ॥ (६।८७।२०)
न स्वभावेन फलति यथा शरलता फलम् ।
क्रिया निर्वासना पुत्र फलं फलति नो तथा ॥ ४ ॥ (६।८७।२१)

[६] कर्मबन्धनान्मुक्तेर्विधिः :—

आत्मज्ञानात्समुत्पन्नः संकल्पः कर्मकारणम् । (६।१२४।५)
संकल्पितं हि बन्धस्य कारणं तत्परित्यज ॥१॥ (६।१२४।६)
कर्मकल्पनया संवित्स्वकर्मफलभागिनी ।
कर्मकल्पनयोन्मुक्ता न कर्मफलभागिनी ॥ २ ॥ (६।१४९।२३)
सर्वा हि वासनाभावे प्रयान्त्यफलतां क्रियाः ।
अशुभाः फलवन्त्योऽपि सेकाभावे लता इव ॥३॥ (६।८७।१९)
समया स्वच्छया बुद्ध्या सततं निर्विकारया ।
यथा यत्क्रियते राम तददोषाय सर्वदा ॥ ४ ॥ (६।१९९।७)
शुभाशुभाः क्रिया नित्यं कुर्वन्परिहरन्नपि ।
पुनरेति न संसारमसंसक्तमना मुनिः ॥ ५ ॥ (६।१९९।३३)
शुभाशुभाः क्रिया नित्यमकुर्वन्नपि दुर्मतिः ।
निमज्जत्येव संसारे परित्यक्तमनाः शठः ॥६॥ (६।१९९।३४)

यो ह्यन्तस्थाया मनोवृत्तेर्निश्चय उपादेयताप्रत्ययो वासनाभि-

धानस्तत्कर्तृत्वशब्देनोच्यते ॥ ७ ॥ (४।३८।२)

चेष्टावशात्तादृक्फलभोक्तृत्वं वासनानुरूपं स्पन्दते पुरुषः स्पन्दानुरूपं फलमनुभवति । फलभोक्तृत्वं नाम कर्तृत्वादिति सिद्धान्तः ॥ ८ ॥ (४।३८।३)

कुर्वतोऽकुर्वतो वापि स्वर्गेऽपि नरकेऽपि वा ।
यादृग्वासनमेतत्स्यान्मनस्तदनुभूयते ॥ ९ ॥ (४।३८।४)

तस्मादज्ञाततत्त्वानां पुंसां कुर्वतामकुर्वतां च कर्तृता नतु ज्ञाततत्त्वानामवासनत्वात् ॥ १० ॥ (४।३८।५)

ज्ञाततत्त्वो हि शिथिलीभूतवासनः कुर्वन्नपि फलं नानुसंदधाति । अथच स्पन्दमात्रं केवलं करोत्यसक्तबुद्धिः सम्प्राप्तमपि फलमात्मैवेदं सर्वमेव कर्मफलमनुभवति ॥ ११ ॥ (४।३८।६)

मनो यत्करोति तत्कृतं भवति यन्न करोति तन्न कृतं भवति अतो मन एव कर्तृ न देहः ॥ १२ ॥ (४।३८।७)

अकुर्वन्नपि श्वभ्रपतनं शय्यासनगतोऽपि श्वभ्रपातवासनावासिते चेतसि श्वभ्रपतनदुःखमनुभवति । अपरस्तु कुर्वन्नपि श्वभ्रपतनं परमुपशममुपगतवति मनसि शय्यासनसुखमनुभवति । एवमनयोः शय्यासनश्वभ्रपातयोरेकः श्वभ्रपतनस्याकर्तापि कर्ता संपन्नो द्वितीयश्च श्वभ्रपतनस्य कर्ताप्यकर्ता सम्पन्नश्चित्तवशात्तस्माद्यच्चित्तं तन्मयो भवति पुरुष इति सिद्धान्तः । तेन तत्र कर्तुरकर्तुर्वा नित्यमसंसक्तं भवतु चेतः ॥१३॥ (४।३८।१२-१३)

एवं मनः सर्वकर्मणां सर्वेहितानां सर्वभावानां सर्वलोकानां सर्वगतीनां बीजं तस्मिन्परिहृते सर्वकर्माणि परिहृतानि भवन्ति सर्वदुःखानि क्षीयन्ते सर्वकर्माणि लयमुपयान्ति । मानसेनापि कर्मणा यत्कृतेनापि ज्ञो नाक्रम्यते न विवशीक्रियते न रञ्जनामुपैत्य-व्यतिरिक्तात् ।। १४ ।। (४।३८।१६)

यथा बालो मनसा नगरस्य निर्माणं निर्मृष्टं च कुर्वन्नगरनिर्माणं मनःकृतमकृतमिव लीलयानुभवति नोपदेयतया सुखदुःखमकृत्रिममिति पश्यति नगरनिर्मथनं च मनःकृतं कृतमिति पश्यतीति दुःखमपि लीलयानुभवन्नपि न दुःखमिति पश्यति । एवमसौ परमार्थतः कुर्वन्नपि न लिप्यत एवेति ।। १५ ।। (४।३८।१७)

शुभाशुभात्मकर्म स्वं नाशनीयं विवेकिना ।
तन्नास्तीत्यवबोधेन तत्त्वज्ञानेन सिध्यति ।। १६ ।। (६।३।७)
अवेदनमसंवेद्यं यद्वासनमासितम् ।
शान्तं सममनुल्लेखं स कर्मत्याग उच्यते ।। १७ ।। (६।३।२४)
समूलकर्मसंत्यागेनैव ये शान्तिमास्थिताः ।
नैव तेषां कृतेनार्थो नाकृतेनेह कश्चन ।। १८ ।। (६।३।२७)

इत्येव निश्चयमनामय भावयित्वा
त्यक्त्वा भृशं पुरुषकर्मविचारशङ्काम् ।
निर्वासनः सकलसंकलनाविमुक्तः
संविद्वपुर्ननु यथाभिमतेच्छमास्स्व ।।१९।। (६।२८।३२)

ये त्वेव कर्मसंत्यागमकृत्वान्यत्प्रकुर्वते ।
अत्यागं त्यागरूपात्म गगनं भारयन्ति ते ॥ २० ॥ (६।३।३४)
कर्मत्यागे स्थिते बोधाज्जीवन्मुक्तो विवासनः ।
गृहे तिष्ठत्वरण्ये वा शाम्यत्वभ्येतु वोद्यम् ॥२१॥ (६।३।३७)
गेहमेवोपशान्तस्य विजनं दूरकाननम् ।
अशान्तस्याप्यरण्यानि विजना सजना पुरी ॥२२॥ (६।३।३८)

[७] कर्मयोगः :—

अलब्धज्ञानदृष्टीनां क्रिया पुत्र परायणम् ।
यस्य नास्त्यम्बरं पट्टं कम्बलं किं त्यज्यत्यसौ ॥१॥ (१।८७।१७)
बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते ।
संकल्पनं मनोबन्धस्तदभावो विमुक्तता ॥ २ ॥ (६।१।२७)
नेह कार्यं न वाकार्यमस्ति किञ्चिन्न कुत्रचित् ।
सर्वं शिवमजं शान्तमनन्तं प्राग्वदास्यताम् ॥ ३ ॥ (६।१।२८)
सर्वकर्मफलाभोगमलं विस्मृत्य सुप्तवत् ।
प्रवाहपतिते कार्ये स्पन्दस्व गतवेदनम् ॥ ४ ॥ (६।१।१६)
यथाप्राप्तं हि कर्तव्यमसक्तेन सदा सता ।
मुकुरेणाकलङ्केन प्रतिबिम्बक्रिया यथा ॥ ५ ॥ (३।८८।११)
एतदेव परं धैर्यं जन्मज्वरनिवारणम् ।
यदवासनमभ्यस्ता निजकर्मसु कर्तृता ॥ ६ ॥ (६।१।२४)
प्रतिषेधविधीनां तु तज्ज्ञो न विषयः क्वचित् ।
शान्तसर्वैषणोच्छ्स्य कोऽस्य किं वक्ति किंकृते ॥७॥ (६।३७।३१)

अज्ञस्तु दितचित्तत्वात्क्रियानियमनं विना ।
गच्छन्न्यायेन मात्स्येन परं दुःखं प्रयाति हि ॥८॥ (६।६९।९)
सुज्ञास्त्विष्टेष्वनिष्टेषु न निमज्जन्ति वस्तुषु ।
यतेन्द्रियत्वाद्बुद्धत्वान्निर्वासनतया तथा ॥ ९ ॥ (६।६९।१०)
न निन्द्यमस्ति नानिन्द्यं नोपादेयं न हेयता ।
न चात्मीयं न च परं कर्म ज्ञविषयं क्वचित् ॥१०॥ (६।६९।१३)
महाकर्ता महाभोक्ता महात्यागी भवानघ ।
सर्वाः शङ्काः परित्यज्य धैर्यमालम्ब्य शाश्वतम्॥११॥(६।११५।१)
रागद्वेषौ सुखं दुःखं धर्माधर्मौ फलाफले ।
यः करोत्यनपेक्षेण महाकर्ता स उच्यते ॥१२॥ (६।११५।१२)
न किञ्चन द्वेष्टि न किञ्चिदभिकाङ्क्षति ।
भुंक्ते च प्रकृतं सर्वं महाभोक्ता स उच्यते ॥१३॥ (६।११५।२१)
सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः ।
धिया येन परित्यक्ता महात्यागी स उच्यते ॥१४॥ (६।११५।३४)
अन्तः संत्यक्तसर्वाशो वीतरागो विवासनः ।
बहिः सर्वसमाचारो लोके विहर राघव ॥ १५ ॥ (५।१८।१८)
उदारः पेशलाचारः सर्वाचारानुवृत्तिमान् ।
अन्तः सर्वपरित्यागी लोके विहर राघव ॥१६। (५।१८।१९)
अन्तर्नैराश्यमादाय बहिराशोन्मुखेहितः ।
बहिस्तप्तोऽन्तरा शीतो लोके विहर राघव ॥१७॥ (५।१८।२१)
बहिः कृत्रिमसंरम्भो हृदि संरम्भवर्जितः ।
कर्ता बहिरकर्तान्तर्लोके विहर राघव ॥ १८ ॥ (५।१८।२२)

बहिर्लोकोचिताचारस्त्वन्तराचारवर्जितः ।
समो ह्यतीव तिष्ठ त्वं संभ्रान्तसकलैषणः ॥१९॥ (४।१५।४४)
सर्वैषणाविमुक्तेन स्वात्मनात्मनि तिष्ठता ।
कुरु कर्माणि कार्याणि नूनं देहस्थ संस्थितिः ॥२०॥ (४।१५।४५)
शुद्धं सदसतोर्मध्यं पदं बुद्ध्याऽवलम्ब्य च ।
सबाह्याभ्यन्तरं दृश्यं मा गृहाण विमुञ्च मा॥२१॥ (४।४६।१४)
अत्यन्तविरतः स्वस्थः सर्ववासविवर्जितः ।
व्योमवत्तिष्ठ नीरागो राम कार्यपरोऽपि सन् ॥२२॥ (४।४६।१५)
यथैव कर्मकरणे कामना नास्ति धीमताम् ।
तथैव कर्मसंत्यागे कामना नास्ति धीमताम् ॥२३॥ (३।८८।१२)
अतः सुषुप्तोपमया धिया निष्कामया तया ।
सुषुप्तबुद्धसमया कुरु कार्यं यथागतम् ॥ २४ ॥ (३।८८।१३)
गम्यदेशैकनिष्ठस्य यथा पान्थस्य पादयोः ।
स्पन्दो विगतसंकल्पस्तथा स्पन्दस्व कर्मसु ॥ २५ ॥ (६।१।१५)
स्पन्दस्वाकृतसंकल्पं सुखदुःखान्यभावयन् ।
प्रवाहपतिते कार्ये चेष्टितोन्मुक्तशष्पवत् ॥ २६ ॥ (६।१।१७)
रसभावनमन्तस्ते मालं भवतु कर्मसु ।
दारुयन्त्रमयस्येव परार्थमिव कुर्वतः ॥ २७ ॥ (६।१।१८)
नीरसा एव ते सन्तु समस्तेन्द्रियसंविदः । (६।१।१९)
चिदानन्दरसान्येव प्रवृत्तान्यपि धारय ॥ २८ ॥ (६।१।२१)
अवासनमसंकल्पं यथाप्राप्तानुवृत्तिमान् ।
शनैश्चक्रभ्रमाभोग इव स्पन्दस्व कर्मसु ॥ २९ ॥ (६।१।२५)

[८] आर्यलक्षणम् :—

कर्तव्यमाचरन्काममकर्तव्यमनाचरन् ।
तिष्ठति प्राकृताचारो यः स आर्य इति स्मृतः ॥१॥ (६।१२६।५४)
यथाचारं यथाशास्त्रं यथाचित्तं यथास्थितम् ।
व्यवहारमुपादत्ते यः स आर्य इति स्मृतः ॥२॥ (६।१२६।५५)



७—आत्मानुभवः

[१] आत्मानुभवोदयलक्षणानि :—

जन्तोः कृतविचारस्य विगलद्वृत्तिचेतसः ।
मननं त्यजतो ज्ञात्वा किञ्चित्परिणतात्मनः ॥ १ ॥ (४।२२।१)

दृश्यं संत्यजतो हेयमुपादेयमुपेयुषः ।
द्रष्टारं पश्यतो दृश्यमद्रष्टारमपश्यतः ॥ २ ॥ (४।२२।२)

जागर्तव्ये परे तत्त्वे जागरूकस्य जीवतः ।
सुप्तस्य घनसंमोहमये संसारवर्त्मनि ॥ ३ ॥ (४।२२।३)

पर्यन्तात्यन्तवैराग्यात्सरसेष्वरसेष्वपि ।
भोगेष्वाभोगरम्येषु विरक्तस्य निराशिषः ॥ ४ ॥ (४।२२।४)

संसारवासनाजाले खगजाल इवाखुना ।
त्रोटिते हृदयग्रन्थौ श्लथे वैराग्यरंहसा ॥ ५ ॥ (४।२२।७)

कातकं फलमासाद्य यथा वारि प्रसीदति ।
तथा विज्ञानवशतः स्वभावः संप्रसीदति ॥ ६ ॥ (४।२२।८)

नीरागं निरुपासङ्गं निर्द्वन्द्वं निरुपाश्रयम् ।
विनिर्याति मनो मोहाद्विहगः पञ्जरादिव ॥ ७ ॥ (४।२२।९)

शान्ते संदेहदौरात्म्ये गतकौतुकविभ्रमम् ।
परिपूर्णान्तरं चेतः पूर्णेन्दुरिव राजते ॥ ८ ॥ (४।२२।१०)

जनितोत्तमसौन्दर्या दूरादस्तमयोन्नता ।

समतोदेति सर्वत्र शान्ते वात इवार्णवे ॥ ९ ॥ (४।२२।११)
अन्धकारमयी मूका जाड्यजर्जरितान्तरा ।
तनुत्वमेति संसारवासनेवोदये क्षपा ॥ १० ॥ (४।२२।१२)
दृष्टचिद्भास्करा प्रज्ञा पद्मिनी पुण्यपल्लवा ।
विकसत्यमलोद्योता प्रातर्द्यौरिव रूपिणी ॥११॥ (४।२२।१३)
प्रज्ञाहृदयहारिण्यो भुवनाह्लादनक्षमाः ।
सत्वलब्धाः प्रवर्धन्ते सकलेन्दोरिवांशवः ॥१२॥ (४।२२।१४)
तरङ्गवदिमे लोकाः प्रयान्त्यायान्ति चेतसः ।
क्रोडीकुर्वन्ति चाङ्गं ते न ज्ञं मरणजन्मनी ॥१३॥ (४।२२।१८)
विवेक उदिते शीते मिथ्या भ्रममरूदिता ।
क्षीयते वासना साग्रे मृगतृष्णा मराविव ॥१४॥ (४।२२।२१)

[२] आत्मस्वरूपे स्थितिः :—

अर्थादर्थान्तरं चित्ते याति मध्ये हि या स्थितिः ।
निरस्तमनना यासौ स्वरूपस्थितिरुच्यते ॥१॥ (३।११७।८)
संशान्तसर्वसङ्कल्पा या शिलान्तरिव स्थितिः ।
जाड्यनिद्राविनिर्मुक्ता सा स्वरूपस्थितिः स्मृता ॥२॥(३।११७।९)
अहंतांशे क्षते शान्ते भेदे निस्पन्दतां गते ।
अजडा या प्रकचति तत्स्वरूपमिति स्थितम् ॥३॥ (३।११७।१०)

[३] आत्मानुभूतेरनुपमेयत्वम् :—

अहंकारे परिक्षीणे यावस्था सुखमोदजा ।

सावस्था भरिताकारा सा सेव्या संप्रयत्नतः ॥१॥ (५।६४।४७)
परिपूर्णार्णवप्रख्या न वा गोचरमेति नः ।
नोपमानमुपादत्ते नानुधावति रञ्जनम् ॥ २ ॥ (५।६४।४८)
केवलं चित्प्रकाशांशकलिका स्थिरतां गता ।
तुर्या चेत्प्राप्यते दृष्टिस्तत्तया सोऽमीयते ॥३॥ (५।६४।४९)
अदूरगतसादृश्यात्सुषुप्तस्योपलक्ष्यते ।
सावस्था भरिताकारा गगनश्रीरिवातता ॥४॥ (५।६४।५०)
मनोहंकारविलये सर्वभावान्तरस्थिता ।
समुदेति परानन्दा या तनुः पारमेश्वरी ॥ ५ ॥ (५।६४।५१)
सा स्वयं योगसंसिद्धा सुषुप्ता दूरभाविनी ।
न गम्या वचसां राम हृद्येवेहानुभूयते ॥ ६ ॥ (५।६४।५२)
अनुभूतिं विना तत्त्वं खण्डादेर्नानुभूयते ।
अनुभूतिं विना रूपं नात्मनश्चानुभूयते ॥ ७ ॥ (५।६४।५३)
आत्मज्ञानविदो यान्ति यां गतिं गतिकोविदाः ।
पण्डितास्तत्र शक्रश्रीर्जरत्तृणलवायते ॥ ८ ॥ (६२।१४३।२)
पाताले भूतले स्वर्गे सुखमैश्वर्यमेव वा ।
न तत्पश्यामि यन्नाम पाण्डित्यादतिरिच्यते ॥९॥ (६२।१४३।३)

[४] परमार्थानुभवे मनसोऽभावः :—

अविद्यत्वादचित्त्वान्मायात्वाच्चासदेव हि ।
ध्रुवं नास्त्येव वा चित्तं भ्रमादन्यत्खवृत्तवत् ॥१॥ (५।८१।३)

चक्रारोहभ्रमस्यान्ते पर्वतस्पन्दनं यथा ।
मौर्ख्यमोहभ्रमे शान्ते चित्तं नोपलभामहे ॥२॥ (५।८१।५)
मृतं चित्तं गता तृष्णा प्रक्षीणो मोहपञ्जरः ।
निरहंकारता जाता जाग्रत्यस्मिन्प्रबुद्धवान् ॥३॥ (५।८१।६)
परमार्थफले ज्ञाते मुक्तौ परिणतिं गते ।
बोधोऽप्यसद्भवत्याशु परमार्थो मनोमृगः ॥ ४ ॥ (६/२।४६।१)
क्वापि सा मृगता याति प्रक्षीणस्नेहदीपवत् ।
परमार्थदशैवास्ते तत्रानन्तावभासिनी ॥ ५ ॥ (६/२।४६।२)
मनस्ता क्वापि संयाति तिष्ठत्यच्छैव बोधता ।
निर्बाधा निर्विभागा च सर्वाऽखर्वात्मिका सती॥६॥(६/२।४६।४)
सुविविक्ततया चित्तसत्ता बोधतयोदिता ।
अनाद्यन्ता भवत्यच्छप्रकाशफलदायिनी ॥७॥ (६/२।४६।५)
स्वयमेव ततस्तत्र निरस्तसकलैषणम् ।
अनाद्यन्तमनायासं ध्यानमेवावशिष्यते ॥ ८ ॥ (६/२।४६।६)
परमार्थैकतामेत्य न जाने क्व मनो गतम् ।
क्व वासना क्व कर्माणि क्व हर्षामर्षसंविदः ॥ ९ ॥ (६/२।४६।८)

[५] नाविद्यायाः पुनर्निवर्तनम् :—

क्षीणे स्वहृदयग्रन्थौ न बन्धोऽस्ति पुनर्गुणैः ।
यत्नेनापि पुनर्बद्धं केन वृन्ते च्युतं फलम् ॥ १ ॥ (५।७४।७५)
परव्यसनिनी नारी व्यग्रापि गृहकर्मणि ।

तदेवास्वादयत्यन्तः परसङ्गरसायनम् ॥ २ ॥ (५।७४।८३)
एवं तत्त्वे परे शुद्धे धीरो विश्रान्तिमागतः ।
न शक्यते चालयितुं देवैरपि सवासवैः ॥३॥ (४।७४।८४)
अविद्या संपरिज्ञाता न चैनं परिकर्षति ।
मृगतृष्णा परिज्ञाता तर्षुलं नावकर्षति ॥ ४ ॥ (५।७४।२०)
अविद्या संपरिज्ञाता यदैव हि तदैव हि ।
सा परिक्षीयते भूयः स्वप्नेनेव हि भोगभूः ॥५॥ (५।६४।१३)

[६] परमा तृप्तिः :—

मोक्षमिच्छाम्यहं कस्माद्बद्धः केनास्मि वै पुरा ।
अबद्धो मोक्षमिच्छामि केयं बालविडम्बना ॥१॥ (५।२६।१०)
न बन्धोऽस्ति न मोक्षोऽस्ति मौर्ख्यं मे क्षयमागतम् ।
किं मे ध्यानविलासेन किं वा ध्यानेन मे भवेत् ॥२॥(५।२६।११)
ध्यानाध्यानभ्रमौ त्यक्त्वा पुंस्त्वं स्वमवलोकयत् ।
यदायाति तदायातु न मे वृद्धिर्न वा क्षयः ॥३॥ (५।२६।१२)
न ध्यानं नापि वाऽध्यानं न भोगान्नाप्यभोगिताम् ।
अभिवाञ्छामि तिष्ठामि सममेव गतज्वरः ॥४॥ (५।२६।१३)
न मे वाञ्छा परे तत्त्वे न मे वाञ्छा जगत्स्थितौ ।
न मे ध्यानदशाकार्यं न कार्यं विभवेन मे ॥५॥ (५।२६।१४)
नाहं मृतो न जीवामि न सन्नासन्न सन्मयः ।
नेदं मे नैव चान्यन्मे नमो मह्यमहं बृहत् ॥६॥ (५।२६।१५)
इदमस्तु जगद्राज्यं तिष्ठाम्यत्र तु संस्थितः ।

नेह वास्तु जगद्राज्यं तिष्ठाम्यात्मनि शीतलः ॥७॥(५।२६।१६)
किं मे ध्यानदशा कार्यं किं राज्यविभवश्रिया ।
यदायाति तदायातु नाहं किञ्चन मे क्वचित् ॥८॥(५।२६।१७)
न किंचिदपि कर्तव्यं यदि नाम मयाधुना ।
तत्कस्मान्न करोमीदं किञ्चित्प्रकृतकर्म वै ॥६॥ (५।२६।१८)
न मे भोगस्थितौ वाञ्छा न च भोगविवर्जने । (५।३५।३८)
अस्ति सर्वत्र मे स्वर्गो नियतो नतु कुत्रचित्॥१०॥ (६।१०७।२६)
यदायाति तदायातु यत्प्रयाति प्रयातु तत् ।
सुखेषु मम नापेक्षा नोपेक्षा दुःखवृत्तिषु ॥११॥ (५।३५।३६)
सुखदुःखान्युपायान्तु यान्तु वाप्यहमेषु कः ।
वासना विविधा देहे त्वस्तं चोदयमेव वा ।१२॥ (५।३५।४०)
देहस्थाहमहं देहीति क्षीणे चित्तविभ्रमे ।
त्यजामि न त्यजामीति किं मुधा कलनोद्भिता॥१३॥(५।४०।१२)
प्राप्तानुत्तमविश्रान्तिर्लब्धालभ्यपरास्पदः ।
अनिवृत्तिपदं प्राप्तो मनसा कर्मणा गिरा ॥ १४ ॥ (५।७४।३५)
सर्वत्रैव हि तुष्यामि सर्वत्रैव रमे प्रभो ।
अवाञ्छनत्वान्मनसः सर्वत्रानन्दवानहम् ॥१५॥ (६।१०७।२७)
इदं सुखं इदं मेति मिथुने क्षयमागते ।
सममेव पदे शान्ते तिष्ठामीह यथासुखम् ॥१६॥ (६।१०६।७०)

८—जीवन्मुक्तिः

[१] जीवन्मुक्तलक्षणानि :—

न सुखाय सुखं यस्य दुःखं दुःखाय यस्य नो ।
अन्तर्मुखमतेर्नित्यं स मुक्त इति कथ्यते ॥ १ ॥ (६।१६६।१)
सुखदुःखेषु भीमेषु संततेषु महत्स्वपि ।
मनागपि न वैरस्यं प्रयान्ति समदृष्टयः ॥ २ ॥ (६।१६८।२७)
यस्य कस्मिंश्चिदप्यर्थे क्वचिद्रसिकतास्ति नो ।
व्यवहारवतोऽप्यन्तः स विश्रान्त उदाहृतः ॥३॥ (६।१६६।८)
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
यथाप्राप्तं विहरतः स विश्रान्त इति स्मृतः ॥४॥ (६।१६६।६)
नालम्बते रसिकतां न च नीरसतां क्वचित् ।
नार्थेषु विचरत्यर्थी वीतरागः सरागवत् ॥ ५ ॥ (६।१०२।१३)
उद्विजन्तेऽपि नो लोकाल्लोकान्नोद्वेजयन्ति च । (६।६८।२)
तेषां तनुत्वमायान्ति लोभमोहादयोऽरयः ॥ ६ ॥ (६।६८।१)
मनोज्ञमधुराचाराः प्रियपेशलवादिनः । (६।६८।३)
विवेचितारः कार्याणां निर्णेतारः क्षणादपि ॥७॥ (६।६८।४)
अनुद्वेगकराचारा बान्धवा नागरा इव
बहिः सर्वसमाचारा अन्तः सर्वार्थशीतलाः ॥८॥ (६।६८।५)
उपेक्षते न सम्प्राप्तं नाप्राप्तमभिवाञ्छति ।

सोम्यसौम्यो भवत्यन्तः शीतलः सर्ववृत्तिषु ॥९॥ (६।४५।१०)
प्रवाहपतिते कार्ये कामसंकल्पवर्जितः ।
तिष्ठत्याकाशहृदयो यः स पण्डित उच्यते ॥१०॥ (६।२२।५)
वर्णधर्माश्रमाचारशास्त्रयन्त्रणयोज्झितः ।
निर्गच्छति जगज्जालात्पञ्जरादिव केसरी ॥११॥(६।१२२।२)
सर्वकर्मफलत्यागी नित्यतृप्तो निराश्रयः ।
न पुण्येन न पापेन लिप्यते नेतरेण च ॥१२॥ (६।१२२।५)
वासनाग्रन्थयश्छिन्ना इव त्रुट्यन्त्यलं शनैः ।
कोपस्तानवमायाति मोहो मान्द्यं हि गच्छति ॥१३॥ (६।११६।४)
मुदिताद्याः श्रियो वक्त्रं न मुञ्चन्ति कदाचन । (६।११६।३)
न निन्दन्ति न नन्दन्ति जीवितं मरणं तथा ॥१४॥ (६।१२।२)
केषुचिन्नानुबध्नाति तृप्तमूर्तिरसक्तधीः । (५।९३।३९)
जीवन्मुक्तो गतासङ्गः सम्राडात्मेव तिष्ठति ॥१५॥ (५।९३।२४)
परिपूर्णमना मानी मौनी शत्रुषु चाचलः । (५।९३।३९)
सम्पत्स्वापत्सु चोग्रासु रमणोत्सवेषु च ॥१६॥(५।९३।५२)
विहरन्नपि नोद्वेगी नानन्दमुपगच्छति ।
अन्तर्मुक्तमना नित्यं कर्मकर्तेव तिष्ठति ॥ १७ ॥ (५।९३।५३)
न बिभेति न वादत्ते वैवश्यं नच दीनताम् ।
समः स्वस्थमना मौनी धीरस्तिष्ठति शैलवत् ॥१८॥ (५।९३।५५)
आत्मवानिह सर्वस्मादतीतो विगतैषणः ।
आत्मन्येव हि संतुष्टो न करोति न चेहते ॥ १९ ॥ (५।८९।१६)
न तस्यार्थो नभोगत्या न सिद्ध्या न च भोगकैः ।

न प्रभावेण नो मानैर्नाशामरणजीवितैः ॥२०॥(५।८६।१८)
समग्रसुखभोगात्मा सर्वाशास्विव संस्थितः ।
करोत्यखिलकर्माणि त्यक्तकर्तृत्वविभ्रमः ॥२१॥ (५।७७।११)
उदासीनवदासीनः प्रकृतः क्रमकर्मसु ।
नाभिवाञ्छति न द्वेष्टि न शोचति न हृष्यति ॥२२॥ (५।७७।१२)
